15/-
NeH

श्रीः

परमार्थसारः

आचार्य—
अभिनवगुप्तपादानाम्

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्
(शैवदर्शनपरियोजना)
जम्मूपुरम्

PARAMARTHA SARA

OF

ABHINAVAGUPTA

a detailed commentary by

YOGARAJA

a short one by

SHRI DWARAKA NATH SHASTRI

Published by

Principal—(Dr. Murlidhar Pandeya),

SRI RANVIR KENDRIYA SANSKRIT VIDYAPEETHA,

(SAIVA DARSANA PROJECT)

JAMMU.

प्रभो शम्भो दीनं विहितशरणं त्वच्चरणयो-
र्भवारण्यादस्माद्विषमविषयाशीविषवृतात् ।
समुद्धृत्य श्रद्धाविधुरमपि बद्धादरकरं
दयादृष्ट्या पश्यन्निजतनयमात्मीकुरु शिव ॥

(आ० अमृतवाग्भवानाम्)

❀ श्रीः ❀

परमार्थसारः

(कश्मीरशैवदर्शनशास्त्रम्)

ग्रन्थकृत् —आचार्याभिनवगुप्तमहोदयः

भाष्यकृत् —योगराजाचार्यः

लघुटीकाकृत्, सम्पादकश्च —श्रीद्वारकानाथशास्त्री

प्रकाशकः

डा० मुरलीधरपाण्डेयः, प्रधानाचार्यः

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य,

जम्मूपुरस्थस्य ।

शैवदर्शनपरियोजनायाः द्वितीयः परिस्पन्दः ।

प्रथमं संस्करणम् : १०००

सन् : १९८१

पुनर्मुद्रणाधिकाराः सुरक्षिताः ।

मूल्यम् : रु० १५-३५

मुद्रकः : एस० एन० मगोत्रा प्रिंटिंग प्रेस, जम्मू ।

आभारप्रदर्शनम् ।

अस्य सरलसरलस्य सुमधुरस्य चाद्वैत-शैवशास्त्रस्य सम्पादनं गतवर्षे शैवदर्शनकोशपरियोजनया कृतम् । परं वर्तमानवर्षस्य मईमासं यावत् प्रकाशनस्य प्रबन्धो नैव जातः । इदानीं यदस्य सत्वरं प्रकाशनं रणवीरविद्यापीठेन कृतं तदर्थं राष्ट्रीयसंस्कृतसंस्थानस्य निदेशकवर्याः **डा० रामकरण**—महोदयाः धन्यवादमर्हन्ति, यतो गुणज्ञैस्तैः सत्स्वपि बहुषु प्रकाशनीयेषु ग्रन्थान्तरेषु परमार्थसारसदृक्षाणामेव ग्रन्थरत्नानां सद्यः प्रकाशनार्थमनुज्ञप्तं प्रोत्साहनं च कृतमस्माकम् ।

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य प्रधानाचार्याः डा० मुरलीधरपाण्डेया अपि धन्यवादार्हा यैरेवंविधानां ग्रन्थरत्नानां सत्वरं प्रकाशनाय सुप्रबन्धः कृतोऽत्र जम्मूपुर्यामेव ।

बलजिन्नाथपण्डितः,
शोधनिदेशकः,
शैवदर्शनकोशपरियोजनायाः ।

उपोद्घातः

अद्वैतशैवशास्त्रं सिद्धान्तपक्षे प्रयोगपक्षे चोभयत्रातीव गहनं यतः सूक्ष्मातिसूक्ष्मतराणां दर्शनसिद्धान्तानामतिगहनगतीनां च योगप्रक्रियाणां प्रकाशकम् । अस्य दर्शनसिद्धान्ता आचार्याभिनवगुप्तमहोदयैः **ईश्वरप्रत्यभिज्ञाविमर्शिन्यां विवृतिविमर्शिन्यां च** सविस्तरं प्रकाशिताः सम्यक् । योगप्रक्रियाणामपि प्रकाशनं तैः **तन्त्रालोके तन्त्रसारे च** साधु विहितम् । परं केवलं तीक्ष्णतरधिषणास्तर्ककुशलाश्च जिज्ञासव ईश्वरप्रत्यभिज्ञाविमर्शिन्यादिशास्त्रेषु गतिभाजः, तन्त्रालोकादौ चापि सम्प्राप्तशैवदीक्षाणामेव प्रबुद्धानां साधकानामधिकारः । ये तावज्जिज्ञासवः सुकुमारमतयो न तर्कबहुलेषु शास्त्रकान्तारगहनेषु प्रवेष्टुमुत्साहवन्तो न चापि शैवयोगाभ्यासे प्राप्तप्रबुद्धतापदाः, पर तथापि शिवभक्तिभाज आत्मतत्त्वज्ञानविज्ञानोत्सुकाश्च तेषां कृतेऽभिनवगुप्ताचार्यैः सरलसरलानां ग्रन्थानां निर्माणं कृतम् । ते च ग्रन्थाः यथा—**बोधपञ्चदशिका, परमार्थचर्चा, अनुत्तराष्टिका** इत्याद्याः । परमीदृशाः ग्रन्था अतीव संक्षिप्ता । तेन कारणेन न ते सकलमुख्यसिद्धान्तप्रतिपादकाः । तदेतन्मनसि निधायाचार्यवरैः सुविस्तीर्णं परं नातितर्कबहुलमद्वैतशैवदर्शनस्य सुविषदं ग्रन्थं निर्मातुं यदा सङ्कल्पितं तदा तेषां दृष्टिः पतञ्जलिकृते परमार्थसारनामके ग्रन्थे समापतिता । स च ग्रन्थस्तेभ्योऽत्यन्तमरोचत । परमसौ ग्रन्थो वैष्णवाद्वैतसिद्धान्तप्रधानः । तत आचार्यमहोदयैस्तस्य कारिकासु क्वचित् क्वचित्तथा पदपरिवर्तनं कृतं यथा शैवदर्शनसिद्धान्तानुकूलतां यातम् । अवश्यवक्तव्या ये शैवदर्शनसिद्धान्तास्तत्र न प्रतिपादिता आसन् तान् प्रतिपादयितुमभिनवाः काश्चन कारिकास्तत्र तत्र निर्माय निबद्धाः । याश्च कारिका नैवाभिप्रेता आसन् शैवदर्शनसिद्धान्तानुसारं ताः परिहायाभिनवेन रूपेण परमार्थसारः शैवशास्त्रजिज्ञासूनां कृत उपस्थापित आचार्यवर्यैः ।

आचार्याभिनवगुप्तानुसारं पतञ्जलिकृतस्य कारिकाशास्त्रस्य नाम **आधारकारिकाः** इति, ग्रन्थप्रणेतुश्च नाम **भगवानाधार** इति । तदुक्तं तैः—

आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम् ॥
आधारकारिकाभिस्तं गुरुरभिभाषतेस्म तत्सारम् ।
कथयत्यभिनवगुप्तः शिवशासनदृष्टियोगेन ॥ इति
(प. सा. २, ३)

परं नागेशादिभिः, टीकाकृता च पतञ्जलिकृतस्य कारिकाग्रन्थस्यापि नाम परमार्थसारः इत्येवोक्तं बहुशः । आधारस्तु भगवान् शेषः । पतञ्जलेस्तदवतारतां स्वीकुर्वन्तः पुरातना आचार्यास्तमाधारो भगवानित्युक्तवन्तः ।

पतञ्जलिरतिपुरातनः आचार्यः । तस्य काले वैष्णवदर्शनानामद्वैतवेदान्तदर्शनस्य च परिमार्जितं स्वं स्वं पृथक् पृथक् स्वरूपं नैव विकासमवाप्तमभूत् । तस्मिन् युगे तावदौपनिषदाः वेदान्तसिद्धान्ताः पाञ्चरात्रानुसारिणो वैष्णवदर्शनसिद्धान्ताः, मनुस्मृतौ, भगवद्गीतासूपनिषत्सु च लभ्यमानाः पुरातनाः सेश्वरसांख्यसिद्धान्ताः महाभारतादौ विकासमुपयाताश्च सिद्धजनसाधनासिद्धान्ताः सर्वेऽपि सम्मिलिता एवोपलभ्यन्तेस्म तत्र तत्र साधकपरम्परासु पण्डितपरम्परासु च । ते मिलिताः दर्शनसिद्धान्ताः पतञ्जलिना कारिकाबद्धे निजे ग्रन्थे प्रतिपादिताः । तत्र प्रकृतिपुरुषविवेकमुपादेयत्वेन प्रतिपादितं सद् योगराजाचार्येण यदा दृष्टं तदा तेनैतदेवानुमितं यदिदं शास्त्रं सांख्यमतानुयायीति । परं न तदनुमानं समीचीनम् । यतो हि योगराजकालिकं सांख्यशास्त्रमनीश्वरम् । शेषकृतश्च परमार्थसारः सेश्वरः । ततो बाहुल्येन वैष्णवोचितवेदान्तसिद्धान्तपर एवासौ परमार्थसार इति नात्र कश्चन सन्देहः । प्राचीनस्य वैष्णवदर्शनस्य पाञ्चरात्रागमानुसारित्वात्, पाञ्चरात्रागमानां च शैवागमानुकारित्वात्तत्र प्रभूतं साम्यं शैवदर्शनेन साकं दृष्टमाचार्याभिनवगुप्तपादैः । तत एव तस्य प्रतिसंस्कारं विधाय तदेव शास्त्रं शैवशास्त्रत्वेनोपहृतं सुकुमारमतीनां बहुतरज्ञानपिपासूनां साधकानां विदुषां च पुरः । वैष्णवशैवशास्त्रयोः सम्मिश्रणमुत्पलवैष्णवकृते स्पन्दप्रदीपिकाशास्त्रेऽपि बहुतरमुपलभ्यते । ततः शेषकृतः परमार्थसारो वैष्णवोचितवेदान्तशास्त्रग्रन्थः इति नात्र शङ्कायाः कोऽप्यवकाशः । परं वैष्णवशास्त्रं सदपि तदद्वैतप्रधानमेव, वल्लभीयवैष्णवशास्त्रवत् ।

अत्राभिनवगुप्तीये परमार्थसारे, परतत्त्वस्य निरूपणं,जगत्सृष्टिप्रकारः,

षट्त्रिंशत्तत्त्वनिरूपणं, बन्धमोक्षस्वरूपनिरूपणं, बद्धमुक्ततुलना, जीवन्मुक्तेर्निरूपणं, क्रममोक्षस्य प्रतिपादनं मोक्षोपायसङ्केतः इत्येवम्प्राया भूयांसो विषयाः शैवदर्शनस्य सरलया शैल्या प्रतिपादिता वर्तन्ते । इमं ग्रन्थमधीत्य जिज्ञासुः पाठकः ईश्वरप्रत्यभिज्ञाविमर्शिन्यामपि श्रमं कर्तुमलं भवति । तदयं ग्रन्थः शैवशास्त्रप्रविविक्षूणां कृते मुख्यं द्वारमिति मन्तव्यम् ।

टीकाकारो योगराजः क्षेमराजशिष्यः । क्षेमराजस्तावदात्मानं सर्वत्राभिनवगुप्तपादानां शिष्यं वदति । मधुराजेनाभिनवगुप्ताचार्यशिष्येषु तस्य प्रधानत्वं ध्वनितं गुरुनाथपरामर्शे । परं क्षेमराजस्य कृतिषु स्वपाण्डित्यस्य स्वीयधिषणायाश्चानन्यसाधारणत्वं प्रकटयितुं कोऽपि तीव्रोऽभिलाषस्तत्र तत्राभिव्यक्ततां याति । एवंविधस्याभिलाषस्य पूर्त्तये तेन सरलसरलाः दर्शनोपासनसिद्धान्तास्तथा वक्रया शैल्या प्रतिपादिता यथा ते दुरूहतां विकृततां च प्रयाता भूरिशः । एवं प्रतीयते यद् बाल्यादेव तस्यैवंविधां प्रवृत्तिमुपलभ्यासन्तुष्टतां यातस्तदुपरि महागुरुरिति । अत एव बहूनां शिष्याणां नामोल्लेखं, प्रशंसां च कुर्वन्नप्यभिनवगुप्ताचार्यमहोदयो न क्वापि क्षेमराजस्य नामोल्लेखं कृतवान् । यश्च पितृव्यतनयः क्षेमस्तेन तन्त्रालोके स्मृतो, नासौ क्षेमराजोऽपि तु क्षेमगुप्तः । क्षेमराजो वंशान्तरीयः कदाचिद् भूतिराज-हेलाराजादित्यराजादीनां कुले क्वापि जातस्स्यान्न पुनरभिनवगुप्तीये कुले गुप्तनाम्नैव सुप्रथां गते । योगराजकृते परमार्थसारभाष्येऽपि क्वचित् क्वचित् क्षेमराजीया दोषाः प्रसृतास्तत्र तत्रान्वेष्टव्याः परिहार्याश्च सुधीभिः । परं तथापि प्रविविक्षूणां कृतेऽतीव लाभप्रदोऽयं ग्रन्थः ।

विश्वविद्यालयीयासु संस्कृतकक्षासु पठतां छात्राणां शोधकारिणां च हितायास्माभिरस्य शास्त्रस्य सुविस्तृता हिन्दीटीकापि निर्मितास्ति । तस्याः प्रकाशनार्थं प्रयतामहे । तस्याः सारमादाय श्रीद्वारकानाथशास्त्रिभिर्विरचिता परमार्थसारस्य लघ्वी टीकाप्यत्र योगराजकृतभाष्येण साकमेव प्रतिपद्य प्रकाशिता वर्तते । मन्ये सापि भवेद्धिताय पाठकानाम् । श्रीव्रजनन्दनशर्मभिर्निर्मिता अनुक्रमणिका अपि संस्करणस्य महत्त्ववर्धिन्यः ।

जम्मू पुरम्
ता० २१-८-१९८१

बलजिन्नाथपण्डितः,
शोधनिदेशकः,
शैवदर्शनकोशपरियोजनायाः

शुद्धिपत्रम्

पृष्ठ	पंक्तिः	अशुद्धः पाठः	शुद्धः पाठः
१०	९	कममि	कर्मपि
१३	६	नामित	नामति
,,	७	ततास	तनाम
१६	२७	वनाप	वमाप
१७	१	गायादि	मायादि
१८	२	चयन	चयन्
,,	१३	प्रभूयते	शक्यते
,,	१४	सिद्धय	सिद्धय
२१	६	सर्वंश्व	सर्वश्च
,,	१८	दर्पण	दर्पणे
२२	११	मलम	मलम्
,,	२५	नाह	नाहं
२३	१४	भिमुख	भिमुखं
२४	१०	तस्व	तत्त्वं
,,	२३	स्फठि	स्फटि
,,	२४	करणं	करणे
२७	२	मेदेन	भेदेन
,,	२	परं इ	परम् इ
,,	२७	बोव	बोध
,,	१३	प्रमुख	प्रमुखा
३१	१४	परम	परमं
,,	,,	तन्त्र्य	तन्त्र्य
३२	६	सम्यम्	सम्यग्
३३	६	सर्वज्ञ	सर्वज्ञ
,,	९	भवनि	भवति
३४	१९	स्यात्तदा	स्याद् यदा
३५	३	कञ्चुक	कम्बुक
,,	१४	वद्धि	बुद्धि
३६	५	बन्धः	बन्ध
,,	१५	रोनु	रानु
,,	१७	क्षुजि	क्षुजि
३७	७	मायं	मान्यं
,,	१०	त्मफं	त्मकं
३८	७	ते यः	तेभ्यः
३९	७	प्रहरूप	प्रहरूपं
४०	२१	वैचित्र	वैचित्र्य
,,	२२	जानति	जानाति

पृष्ठ	पंक्तिः	अशुद्धः पाठः	शुद्धः पाठः
४२	६	तस्चु	तस्तु
४५	३	वसत्य	असत्य
,,	१४	ब्रह्मण	ब्राह्मण
,,	२१	तयः	तपः
४६	९	नामप्रकाशः	नाप्रकाशः
४७	१३	भेदेनात्म	भेदेनानात्म
४८	९	जढ	जड
,,	२२	मत्वम	मत्वम्
५०	१७	त्रमेण	क्रमेण
५१	९	त्मनं	त्मानं
,,	१२	तत्त्र्यम्	तन्त्र्यम्
५२	२०	तास्मिः	ताभिः
५३	१७	यजत्रं	यजत्रै
,,	१९	यथा रसप्रः	तथा स्वप्नः
५५	४	शास्त्रं	शास्त्रे
५५	२२	ईश्वरोय	ईश्वरीय
५६	२	सुषप्त्य	सुषुप्त्य
,,	३	ज्ञाघना	ज्ञानघना
५६	५	मात्गनः	मात्मनः
,,	१८	द्भगतः	द्भगवतः
५७	८	तांसतान्	तांस्तान्
५९	७	पुननि	पुर्नानि
,,	२९	भासन	भासनं
६०	९	चूर्णोकरोति	चूर्णीकरोति
,,	१५	शास्त्रष	शास्त्रेषु
,,	२३	परमीश्वर	परमेश्वर
६३	९	मायीम	मायीय
६५	१२	यावौ	यदादौ
६७	३	ज्ञावते	ज्ञायते
,,	४	नाकास्यत्	नाचकास्यत्
,,	२०	तद्वयति	तद्वयति
,,	२४	स्वांरम	स्वां परमे
६८	२४	लातन	लासन
६९	१	रिक्तामि	अतिरिक्तामि
,,	८	कृत्वा	कृत्य
७१	६	दिष्वान्त	दिष्वन्त
,,	२१	वद्यं	वेद्यं
७२	२४	रूपताः	रूपतः

पृष्ठ	पंक्तिः	अशुद्धः पाठः	शुद्धः पाठः
७३	२	घड़	घट
,,	३	ततस्मि	तस्मि
,,	१०	घ्नतृ	घ्रातृ
,,	१५	कतृता	कर्तृता
,,	,,	अपेक्षि	आपेक्षि
७४	१४	ल्लङ्घ	ल्लङ्घ्य
७६	२	मच्छाद्य	माच्छाद्य
,,	१९	आज्ञाः	अज्ञाः
७८	१५	भोगभोग्य	भोगयोग्य
७९	४	मापन्नाः	मापन्नः
,,	१६	साग्रय	सामग्रय
,,	२५	योपदे	योपादे
८०	६	प्राणिभ्वो	प्राणिभ्यो
,,	१२	वधिभूतो	वधिभूतो
८२	१६	संह्वार	संहार
८४	८	साक्षत्कारे	साक्षात्कारे
८६	१४	प्रढेः	प्ररूढेः
८७	१	शरीरी	अशरीरी
,,	१५	समत्तीर्ण	समुत्तीर्णं
८८	३	भिनाम्	भिमानम्
,,	२०	तत्तथैव	तत्तत्तथैव
,,	२२	कुटस्थम्	कूटस्थम्
,,	२४	व तानि	व्रातानि
			(अत्र क्लीबत्वं चिन्त्यम्)
८९	२४	तुर्भावाउभ	तुरुभ
,,	,,	द्यहभावात्	द्यहम्भावाभावात्
९०	१७	तस्य कर्म	तत्तस्य कर्म
९१	१५	देहरूपी	देहो
९२	६	शिभावे	शिवभावे
,,	१८	च्छरोरी	च्छरीरा
९३	८	ज्ञानौ	ज्ञानी
९५	२०	स्व त्म	स्वात्म
९७	६	त्वात्कि	त्वात् कु
९८	१४	स्वशीर	स्वशरीर
९९	१०	राश्मि	रश्मि
१००	७	योऽन्नर	योऽन्तर
,,	२०	निश्चिय	निश्चय
१०२	२	चित्रौक्त	चित्रोक्त

पृष्ठ	पंक्ति:	अशुद्धः पाठः	शुद्धः पाठः
१०२	१५	स्व	तस्मात् स्व
१०३	२५	दूर्लभो	दुर्लभो
१०४	९	भ्रामतति	भ्रामयति
१०५	११	अलौकिो	अलौकिको
१०७	४	कत्तर्व्य	कर्त्तव्य
,,	६	वाह्यन्	बाह्य
१०८	१८	कधनां	कथनां
१०९	३	स्भृत्यु	स्मृत्यु
,,	१६	श्रोगीता	श्रीगीता
,,	२३	नोपदेश	नोपदेशः
११०	१८	वांम्द्	वाग्द्
११३	२३	तद्व प	तद्र प
११४	५	निष्ठन्त्यापि	तिष्ठन्त्यपि
११५	२०	भासये	भासते
११७	११	मनुयत्वम्	मनुष्यत्वम्
,,	१५	गुण्येम	गुण्येन
,,	१६	अवौच्या	अवीच्या
११९	१	सूढाः	मूढाः
,,	५	वलशात्	वशात्
१२०	२	रूपा	रूपायां
,,	१३	नश्यति	विनश्यति
१२१	२२	सम्वधाः	सम्बद्धा
१२२	१२	परमार्थांत	परमार्थात्
,,	२२	रुजा	तथा रुजा
१२३	१४	१३ | १४	१४ | १४
१२७	६	भुत्वा	भूत्वा
१२८	७	गमेन	गमेनं
,,	१४	योग	योग
,,	१९	इच	इव
,,	२५	लध्वा	लब्ध्वा

॥ श्रीः ॥

परमार्थसारः

चिद्घनोऽपि जगन्मूर्त्या श्यानो यः स जयत्यजः ।
स्वात्मप्रच्छादनक्रीडाविदग्धः परमेश्वरः ॥ १ ॥
योऽयं व्यधायि गुरुणा
युक्त्या परमार्थसारसंक्षेपः ।
विवृतिं करोमि लघ्वीम्
अस्मिन् विद्वज्जनार्थितो योगः ॥ २ ॥

इह शिवाद्वयशासने देहादिप्रमातृताप्राधान्यस्व-संकल्प-समुत्थशङ्का-तङ्कालस्य-संशयादिरूपविघ्नौघ-प्रसरप्रध्वंस-पूर्विकां शास्त्र-निष्पत्तिं मन्यमानः, परिमित-प्रमातृताधस्पदीकारेण चिदानन्दैकघन-स्वात्म-देवता-समावेशशालिनीं समस्तशास्त्रार्थसंक्षेपगर्भां प्रथमतस्तावत् परमेश्वर-प्रवणतां परामृशति ।

परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्व-चराचरस्थं त्वामेव शम्भुं शरणं प्रपद्ये ॥१।

त्वाम् सर्वप्रमातृस्फुरत्तासारं स्वात्मदेवतारूपमेव शम्भुं अनुत्तर-श्रेयःस्वभावं सत्तात्मकं शरणं त्रातार त्वत्समावेश-समापत्तये संश्रये । एवकारः शम्भुं स्वात्मदेवताकारमेव प्रपद्ये, न पुनः मायान्तश्चारिणं कंचिद् भिन्नं देवम्—इति अन्ययोगं व्यवच्छिनत्ति । अन्यच्च किंभूतम् परं पूर्णं

चिदानन्देच्छा-ज्ञान-क्रियाशक्तिनिर्भरम्, अनुत्तरस्वरूपम्, तथा **परस्थं गहनात्** इति, गहनान्मायाभिधानात्तत्त्वात्परस्मिन् पूर्ण एव शिवादिविद्यातत्त्व-पर्यन्ते शुद्धाध्वनि स्वरूपे तिष्ठन्तं, न पुनः तत्तदवस्थावैचित्र्येणापि स्फुरतः, ततः परस्मात्पूर्णात्स्वरूपात्तस्य प्रच्यावो भवति । यदुक्तम्—

'जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति ।
निवर्तते निजान्नैव स्वरूपादुपलब्धृतः ॥' (स्प० १ | ३)

इति स्पन्दशास्त्रे । **अनादि पुराणं** सर्वप्रतीतीनामनुभवितृतया प्रमातृत्वेनादिसिद्धत्वात् । **एकम्** इति असहायम्, चिदैक्येन स्फुरणात् भेदस्यानुपपत्तेः । तथा **निविष्टम्** इत्यादि एवं-जातीयकमपि स्वस्वातन्त्र्येण **बहुधा** नानाप्रकारैः भेदैः **गुहासु** रुद्रक्षेत्रज्ञरूपासु हृद्गुहासु अन्तराविष्ट-चैतन्यरूपोऽपि स्वयं जडाजडात्मतामाभास्य नटवत् नानाप्रमातृतया स्थितः—इतियावत् । अत एव **सर्वालयम्** इति, **सर्वस्य** रुद्रक्षेत्रज्ञादि-प्रमातृ-प्रमेयरूपस्य जगतः **आलयम्** विश्रान्तिस्थानम् । सर्वमिदं किल पूर्णप्रमातरि स्थितं सत्, ग्राह्यग्राहक-युगलकापेक्षया उन्मग्नमिव भेदेन प्रकाशमानं नानारूपैर्व्यपदिश्यते, अन्यथा एतस्य प्रकाशाद् भिन्नस्य सत्तैव न स्यात्, कुतः इदं विश्वं—इति सर्वनामप्रत्यवमर्शः । न एतावता भगवतः समुत्तीर्णं स्वरूपम्—इत्याह **सर्वचरा-चरस्थम् इति** सर्वमिदं यत् जडाजड-स्वभावं विश्वम् तद्रूपतया तिष्ठन्तम् ।

'कर्तासि सर्वस्य यतः स्वयं वै
विभो ततः सर्वमिदं त्वमेव ।'

इति न्यायेन हि व्यतिरिक्तस्य—अन्यस्य-अप्रकाशमानस्य कार्यत्वानुपपत्तेः ।

'भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ।'
(स्प० ३ | २)

इति भगवानेव तथा तथा चकास्ति इति । एवंविधं त्वाम् अनुत्तरं

सर्वस्य स्वात्मदेवतास्वरूपं पराहन्ताचमत्कार-सारमपि गृहीतनानात्वम्, अथ च अत्यन्ताखण्डित-स्वस्वातन्त्र्य-परमाद्वय-प्रकाशस्वभावं भगवन्तं शंभुं प्रपद्ये शरीरादिकृत्रिमाहङ्कारगुणीकारेण—एतादृशं त्वामेव स्वात्मानं पराहन्ताचमत्कारस्वरूपं समाविशामि—इति यावत् । अनेन ग्रहणकवाक्येन परमोपादेयां स्वस्वभावसमावेशमयीं दशामुपदिशता गुरुणा वक्ष्यमाणहेयोपादेयतया सकलग्रन्थार्थोपक्षेप: कृत: ॥ १ ॥

—सर्वेषां परे वर्तमानं मनसा वाचागोचरायाः पराशक्तेरपि परे विराजमानम् अद्वैतस्वरूपम्, बद्धप्राणिभ्य आरभ्य आमन्त्रमहेश्वराणामन्तस्तलेषु चैतन्यरूपेणानन्तेष्वाकारेषु विलसन्तं सर्वेषामाधारस्वरूपम् स्थावरजङ्गमेषु व्यापकरूपेणविद्यमानम्, ब्रह्मविष्ण्वादिभ्योऽप्यधिकं परमेश्वरं, स्वानुग्रहशक्त्या सर्वकल्याणकरं शरणमायामि ।

एवं प्रकरेण तात्पर्यमद्वयस्वरूपं स्तुतिद्वारेण प्रतिपाद्य, इदानीं शास्त्रावतारमभिदधत् सम्बन्धाभिधेयादिकं ग्रन्थकृत् आर्याद्वयेन आह ।

गर्भाधिवासपूर्वक-
मरणान्तकदुःखचक्रविभ्रान्तः
आधारं भगवन्तं
शिष्यः पप्रच्छ परमार्थम् ॥ २ ॥

आधारकारिकाभिः
तं गुरुरभिभाषतेस्म तत्सारम् ।
कथयत्यभिनवगुप्तः
शिवशासनदृष्टियोगेन ॥ ३ ॥ (युगलकम्)

कश्चिद् भगवत्प्रसादात् संमुत्पन्नवैराग्यः संसाराद् विरतमतिः गुरोः शासनीयोऽस्मि इति मत्वा, सद्गुरुम् आधारं भगवन्तम् शेषाख्यं मुनिं

सम्यक् आराध्य परमार्थोपदेशस्वरूपम् पृष्टवान् । तदा तद्योग्यतापरिपाक-स्वरूपपरिशीलन-क्रमेण तं शिष्यं विगलितान्तःकरणं मत्वा सोऽपि अनन्त-नाथो निःशेषशास्त्रोपदेशज्ञः परमार्थसारनाम्ना **आधारकारिकाभिः** इत्यपरा-भिधानग्रन्थेन सांख्यनयोक्तोपदेशानुसारेण प्रकृतिपुरुषविवेकज्ञानात् परब्रह्मा-वाप्तिः—इत्येवं एतं शिष्यं प्रोक्तवान् । स एव ब्रह्मोपदेशः परमाद्वय-स्वरूपस्वातन्त्र्यदृष्टया प्रतिपादितः सन् युक्तियुक्तो भवति – इति मत्वा सर्व-जनम् अनुग्रहीतुं परमाद्वयशैवनययुक्त्या **गुरुरभिनवेन** अलौकिकेन चिच्चम-त्कारस्फारेण **गुप्तो** गुह्यः सरहस्यः – इति । सोऽयं पुण्यनामाक्षरावलिः **तत्सारम्** तस्य परमार्थोपदेशस्य यत् सारं, दध्नो नवनीतमिव उपादेयं, परानुग्रहप्रवृत्तः सन् प्रतिपादयति – इति । एवं संबन्धाभिधेयाभिधान-प्रयोजनादय उपपादिताः, न इह पुनः शास्त्रगौरवभयात् प्रतन्यन्ते । कीदृशः स शिष्यः ! इत्याह **गर्भाधिवास इति** । गर्भाधिवासप्रारम्भं जायते अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति—इति तत्तदवस्था-वैचित्र्येण षड्भावविकारनेमियुक्तं यत् **मरणान्तकदुःखस्वरूपम्** आविर्भाव-तिरोभावात् संसरणस्वभावतया चक्रमिव **चक्रम्** तस्मिन् **विभ्रान्तो** विपरिवृत्तः । अनेन अस्य प्राग्जातिस्मरणस्वभावो बोधाविर्भावो द्योतितः, अन्यथा कथं काष्ठाप्राप्तिलक्षणं प्रश्नकुतूहलित्वं स्यात् । एवं च यः समुत्पन्नवैराग्यः परमेश्वरानुग्रहशक्तिविद्धहृदयः समुदितसम्यग्ज्ञानः उपदेश-पात्रतामवाप्य परमेश्वराकारं समुचितमपि गुरुं समासाद्य, परमाद्वयज्ञानम् अभिलषते, स एव च गुरूपदेशभाजनं स्यात्—इति । एतदेव च अन्यत्र उक्तम् ।

'शक्तिपातवशाद्देवि नीयते सद्गुरुम्प्रति ।'

इति ।

'दीयते परमं ज्ञानं क्षीयते कर्मवासना ।'

इति च । इह च पुरस्ताद् वक्ष्यते ॥ २ | ३ ॥

(१) **गर्भवासादारभ्य मृत्युपर्य्यन्तमनुभूयमाने दुःखावर्ते पतितो**

व्याकुलः परमेश्वरानुग्रहलीलायाः पात्रतां गतश्च शिष्यो जगदाधारस्वरूपं महर्षि पतञ्जलिं वास्तविकस्य परमार्थस्य सत्यतत्त्वरूपस्य मूलाधारभूतान् सत्यसिद्धान्तान् प्रतिपादयितुं सप्रणिपातं सानुनयं प्रार्थयत् ।

(२) आधारकारिकासंज्ञितेन कारिकाबद्धेन "परमार्थसार" इत्यपरनामधेयेन ग्रन्थेन भगवान् पतञ्जलिर्वैष्णवानामित-प्राचीन-मूलविशुद्धाद्वैत-सिद्धान्तमाश्रित्याज्ञाततामधेयं शिष्य-मुपादिशत् ॥ ३ ॥

अधुना समुत्पत्तिक्रमेण पीठिकाबन्धं विधाय, विश्ववैचित्र्यचित्रेऽस्मिन् जगति पारमैश्वरम् अनुत्तमं स्वातन्त्र्यनेकमेव संयोजनवियोजनकतृत्व-हेतुः इति तच्छक्तिविकासमेव विश्वमण्डचतुष्टयमुखेनावेदयन् ग्रन्थ-मवतारयति ।

निजशक्तिवैभवभराद्

अण्डचतुष्टयमिदं विभागेन ।

शक्तिर्माया प्रकृतिः

पृथ्वी चेति प्रभावितं प्रभुणा ॥ ४ ॥

चिदानन्दैकघनेन **प्रभुणा** स्वतन्त्रेण भगवता महेश्वरेण **अण्ड-चतुष्टयम्** विश्वाच्छादकत्वेन कोशरूपतया वस्तुपिण्डभूतम् **इदम्** यदुक्तम्

'...... वस्तुपिण्डोऽण्डमुच्यते ।'

इति । **प्रभावितं** प्रकाशितं, भवनकर्तृकतया वा प्रयुक्तम् । कस्मात् —इत्याह **निजशक्तिवैभवभराद्**—इति । **निजः** आत्मीयोऽसावसाधारण इच्छाद्यः **शक्तिप्रचयः** तस्य यद् **वैभवं** विचित्रः प्रसरः तस्य योऽसौ **भरः** समुद्रेकस्तस्मात्—इति । भगवतः किल स्वशक्तिविकासस्फार एव जग-न्निर्माणम् । यदुक्तं श्रीसर्वमङ्गलाशास्त्रे

'शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते ।
शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः ॥'

इति । किंरूपा अण्डचतुष्टयसंख्या ? इत्याह **शक्तिर्माया, प्रकृतिः, पृथ्वी च इति ।** विश्वस्य प्रमातृप्रमेयरूपस्य पराहन्ताचमत्कारसारस्यापि स्वस्वरूपापोहनात्माख्यातिमयी निषेधव्यापाररूपा या पारमेश्वरी शक्तिः सैव-आच्छादकत्वेन बन्धकतया शक्त्यण्डम् इत्युच्यते । सदाशिवेश्वर-शुद्धविद्यातत्त्वपर्यन्तदलं सद्वक्ष्यमाणम् अण्डत्रितयमन्तः समन्ताद् गर्भीकृत्या-वतिष्ठते — इति कोशरूपतया एषा शक्तिः अनेन शब्देन संज्ञिता । एतस्मिन्नण्डे सदाशिवेश्वरावेवाधिपती ।

अन्यच्च मलत्रयस्वभावं मोहमयं भेदैकप्रवणतया सर्वप्रमातॄणां बन्धरूपं पुम्स्तत्त्वपर्यन्तदलं मायाख्यमण्डमित्युच्यते । तच्च वक्ष्यमाणमण्ड-द्वयमन्तः समन्तात्स्वीकृत्य स्थितम् । अण्डाधिपतिश्चात्र गहनाभिधानो रुद्रः ।

तथा सत्त्वरजस्तमोमयी "**प्रकृतिः**" कार्यकरणात्मना परिणता सती, पशुप्रमातॄणां भोग्यरूपा सुखदुःखमोहरूपतया बन्धयित्री प्रकृत्यभिधा-मण्डमुच्यते । तत्रापि महाविभूतिः श्रीभगवान् विष्णुर्भेदप्रधानोऽ-ण्डाधिपतिः ।

तथा पृथ्वी च एव मनुष्यस्थावरान्तानां प्रमातॄणां प्रतिप्रकाररूप-तया स्थूलकञ्चुकमयी बन्धयित्री — इति कृत्वा पृथ्व्यण्डमित्युच्यते । तत्रापि चतुर्दशविधे भूतसर्गे प्रधानतयाण्डाधिपो भगवान् ब्रह्मेति । एवं परमेश्वर-विजृम्भितमिदमण्डचतुष्टयं भगवतेत्थं प्रकाशितं परिस्फुरति ॥ ४ ॥

(४) **परमशिवः स्वमहिमप्रभावात्स्वस्वातन्त्र्यशक्तिविकासस्फार-रूपमण्डचतुष्टयात्मकं जगत् (पृथ्वी-प्रकृति-माया-शक्ति-श्चेत्यण्डचतुष्टयरूपं विश्वाच्छादकत्वेनकोश रूपतया वस्तु-पिण्डभूतम्) अरचयत् ॥ ४ ॥**

एवमेतदण्डचतुष्टयं प्रतिपाद्यात्रैव भोग्यभोक्तृत्वप्रतिपादनपरतया विश्वस्वरूपनिरूपणाय कारिकामाह ।

तत्रान्तर्विश्वमिदं

विचित्रतनु-करण-भुवनसंतानम् ।

भोक्ता च तत्र देही

शिव एव गृहीतपशुभावः ॥ ५ ॥

"तत्र' तेषु चतुर्षु अण्डेषु आगमप्रसिद्धेषु **"विश्वमिदमन्तः"** मध्ये वर्तते । कीदृशम् ! – इत्याह **"विचित्र"** इति । रुद्र-क्षेत्रज्ञभेदभिन्ना नानामुखहस्तपादादिरचनारूपाः **'तनवः'** आकारा विशिष्ट संस्थानरूपेण आश्चर्यभूताः । तथा अन्योन्यभेदेन सातिशयानि **"करणानि"** चक्षुरादीनि । तद्यथा - रुद्रप्रमातॄणां निरतिशयानि सर्वज्ञत्वादिगुणगणयुक्तानि, तैः किल सर्वमिदमेकस्मिन् क्षणें युगपद्ज्ञायते, संपाद्यते च । क्षेत्रज्ञानां पुनरेतान्येव करणानि परमेश्वरनियतिशक्तिनियन्त्रितानि सन्ति घटादिपदार्थमात्रज्ञानकरणसमर्थान्येव, न तैः सर्वं ज्ञायते, नापि क्रियते । तत्रापि योगिनामतिशयः करणानाम्, — यन्नियतिशक्तिसमुल्लङ्घनात्तदीयैः करणैः दूरव्यवहित विप्रकृष्टमपि परिच्छिद्यते, परप्रमातृगतं च सुखदुःखादि ज्ञायते । एवञ्च तिरश्चामपि नियतिशक्त्या संकुचितानामपि मनुष्येभ्योऽतिशयः करणानां विद्यते । तद्यथा गाव स्वगृहं व्यवहितमपि पश्यन्ति, अश्वा रात्रावपि मार्गमीक्षन्ते, गृध्रा योजनशत गतमप्यामिषमवलोकयन्ति, पक्षिणो मक्षिका मषकपर्यन्ता आकाशविहारिणो दृश्यन्ते, सरीसृपा उरसा पन्थानं गच्छन्ति, दृशा च शृण्वन्ति शब्दान्, उष्ट्रा दूरादपि गर्त्ताच्छ्वासमात्रेण सर्पमाकर्षयन्ति इति । एवं सर्वत्र करणवैचित्र्यम् ऊह्यम् । *यथा* **भुवनानि** आगमप्रसिद्धानि वर्तुल-त्र्यश्रचतुरश्रार्धचन्द्र-छत्राकारतया सातिशयसंस्थानानीति । एवं **विचित्रो** नानातिशयाद्भुतस्वभावः – एषां **"तनुकरणभुवनानां सन्तानः"** अविरतबन्धप्रवाहो यस्मिन्विश्वस्मिंस्तदेवंविधं विश्वम् एवं विधे चात्र भोग्यस्वभावे विश्वस्मिन् भोक्त्रा भाव्यमित्याह **भोक्ता च तत्र देही** इति । मलत्रयाघ्रातो देहो भोगायतनं विद्यते यस्य अणोः स **देही**, सुख-

दुःखादिस्वभावः शरीरी, सुखदुःखादिमयेऽस्मिन् भोक्ता सुखदुःखाद्यनुभविता पशुप्रमाता — इति कथ्यते । ननु परप्रमात्रपेक्षयाणुमात्रस्यापि न भेदो विद्यते, कुतस्तद्व्यतिरिक्तो देही नाम वराकः । यदुक्तम् ।

'प्रदेशोऽपि ब्रह्मणः सार्वरूप्यम्
अनतिक्रान्तश्च अविकल्प्यश्च ।'

इति ।

'एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता ।'

इति न्यायाच्चैकएव स्वशक्तियुक्तो महाप्रकाशवपुरेव परमेश्वरः प्रमाता सर्वतोऽभिन्न एवावभासते । ततो भिन्नस्याप्रकाशमानस्य देहिनोऽस्तित्वाभ्युपगमेऽपि प्रकाशमानत्वानुपपत्तेर्न सत्ता निश्चीयते । प्रकाशते चेत्तस्मिन् परब्रह्मात्मनि तर्हि प्रकाशाभिन्न एवैकः प्रमाता—इति, पुनरपि किंपरत्वेनायं भोग्यभोक्तृलक्षणः सन् भेदः !—इति सर्वं समर्थयमान आह **"शिव एव गृहीतपशुभावः"** इति योऽयंभगवान् समनन्तरं प्रतिपादितश्चिदानन्दैकघनः स्वातन्त्र्यस्वभावः शिवः स एव स्वरूपगोपनासतत्त्वः सन् स्वेच्छया नट इव देहप्रमातृभूमिकां समापन्नः, पाल्यत्वात्पशुत्वात्पशुसत्तालक्षणश्च सुखदुःखादिमये स्वयं निर्मितेऽस्मिन् भोग्ये भोक्ता देही— इति कथ्यते, न पुनः शिवव्यतिरिक्तं किञ्चित् पदार्थजातमस्ति । एष एव च भगवान् शिवः स्वातन्त्र्यात् भोक्तृभोग्यलक्षणं प्रमातृप्रमेययुगलकं क्रीडनकमिव समुत्थापयति, यदपेक्षयायं भेदप्रधानो व्यवहारः । तस्मादेतदेव परमेश्वरस्य स्वातन्त्र्यं निरतिशयं यत् पूर्णस्वरूपतापरित्यागेन भोक्तृभोग्यस्वभावं पशुभावमापन्नोऽपि सर्वप्रमातॄणामनुभवितृतया स्वात्मनि प्रस्फुरंश्चिदानन्दैकघनः शिव एव ॥ ५ ॥

(५) तेष्वेव चतुर्ष्वण्डेषु दृश्यमानं सकलंविश्वं विद्यमानमस्ति । अस्मिन्नेव च विश्वस्मिन् विचित्रशरीरेन्द्रियसत्त्वविशिष्टानां कालाग्निरुद्रादिनामधेयानां ११८ भुवनानां विस्तारोऽस्ति । अत्र भोक्ता जीवः । वस्तुतः स शिव एव जीवरूपः, स एव हि पशुभावनापन्नो जीवभावं भजते ॥५॥

एवमपि एकश्चित्स्वभावः प्रमाता, स यदि मायादिप्रमातृप्रमेयवैचित्र्येण नानात्वादनेकः—इति कथं विरुद्धयैकतया व्यवह्रियते, एकश्चेत् किमिति नानारूपः— इति छायातपवत् विरोधाद्विरुद्धधर्माध्यासः समापतति, न पुनरनेकरूप एकश्च पदार्थः स्यात् । यदुक्तम्

'अयमेव भेदो भेदहेतुर्भावानां यद् विरुद्धधर्माध्यासः कारणभेदो वा ।' इति ।

लौकिकमत्र दृष्टान्तं प्रदर्शयन् दार्ष्टान्तिके चोद्यं समर्थयते

नानाविधवर्णानां
रूपं धत्ते यथाऽमलः स्फटिकः ।
सुरमानुषपशुपादप-
रूपत्वं तद्वदीशोऽपि ॥ ६ ॥

"**यथा**" एकोऽपि **स्फटिकमणिः** तत्तल्लाक्षानीलाद्युपाधिवैचित्र्यसहस्रेण तत्तद्वैचित्र्यं स्वात्मनि धारयन् तथा विचित्रितो भवति, न पुनस्तस्य स्फटिकताहानिः एतावता समुत्पद्यते । एतदेव स्फटिकमणेर्मणित्वम्, यत्तद्विशेषेणाच्छुरितेऽपि तस्मिन्, स्फटिकमणिरयमित्यबाधिता सर्वस्य सर्वदैव प्रतीतिः । केवलमत्रामी लाक्षादयः स्फुरन्तीति व्यवह्रियते, न पुनर्लाक्षाद्युपाधिः पटमिव तं विशिनष्टि, येन स्वरूपविप्रलोपोऽस्य स्यात् । तस्मादेतदेवामलत्वं मणेर्यदुपाधिरूपानाकारान् बिभर्ति, स्वस्वरूपतया च प्रथते । तथैवायमीश्वरः स्वतन्त्रश्चिदेकघन एककोऽपि स्वच्छे स्वात्मदर्पणे देव-मनुष्य-पशु—पक्षि-स्थावरान्तानां रुद्रक्षेत्रज्ञादिपदार्थरूपाणां विशेषाणां स्वयं निर्मितानाञ्च "**रूपत्वं**" वर्णवैचित्र्यं स्फटिकमणिवत्स्वात्माभेदेन धारयन् ततोऽपि समुत्तीर्णत्वादहमित्येवमखण्डचमत्कारोपबृंहितं नानारूपमप्येकं स्वात्मानं प्रत्यवमृशति । इत्थमप्यस्यैकताखण्डनामयो भिन्नरूपो देशः कालो वा न कश्चिद्विद्यते, यदपेक्षयैतस्य स्वात्ममहेश्वरस्य विरुद्धधर्माध्यासादिदूषणमुच्येतापि । साक्षात्कारलक्षणं चित्रज्ञानं नानाभेदसंभिन्नमपि परैरप्येकमेव तदभ्युपगतम् । यथा—

'नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् ।
अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन ॥'

इति प्रमाणवार्तिके । किं पुनः सर्वतः पूर्णस्य ज्ञातुश्चिदेकवपुषः स्वतन्त्रस्य, याविमौ देशकालौ भेदकतयाभिमतौ मूर्तिवैचित्र्यक्रियावैचित्र्याभ्यां यस्य समुल्लासकतया स्थितौ, कथं तस्यैव भगवतो व्यवच्छेदकौ स्याताम् । यदि नाम देशकालयोः कदाचित् संविदो भेदेन स्थितिरभविष्यत्, तदा तत्कृतोऽपि विरुद्धधर्माध्यास उदपत्स्यत — इति तत्र सम्भावना स्यात् । यावता तयोः संवित्प्रकाशे नैव स्वात्मसत्तासिद्धिः—इति सिद्ध एवानेकस्वभावोऽयेक एक महेश्वरः चिन्मूर्तिः, भेदधर्मे पुनः विरुद्धधर्माध्यासो दुरुद्धार एवेति ॥ ६ ॥

(६) यथा निर्मले स्वच्छे एकस्मिन्नपि स्फटिकमणौ लाक्षानीलपीतादीनि रूपाणि प्रतिबिम्बितानि भवन्ति, तैश्च रूपैस्तस्मिन्न कोपि विकारः परिणामो वा आधातुं प्रभूयते—एतेन तस्य मणेरुत्कृष्टता स्वच्छता च सिद्धयति । एवमेव एककोऽपि स्वात्म-महेश्वरः स्वच्छे स्वात्मदर्पणे देव-मनुष्यपशुपक्षिस्थावरान्तानां रुद्रक्षेत्रज्ञादिपदार्थरूपाणां स्वयं निर्मितानां रूपं प्रतिबिम्बरीत्या धारयन्नपि स्वं परमेश्वरत्वमभिव्यनक्ति ॥ ६ ॥

नन्वेक एव संवित्सतत्त्वः प्रमाता अभ्युपगतस्तनु-करण-भुवनतां समापन्नः सन् स एवानेकतां यातः — इति चेत् तर्हि तन्वादिविनाशे स एव विनष्टः स्यात्, तदुत्पत्तौ वैष एव तदा उत्पद्येत । एवं प्रतिप्रमातृ स एव जायते, अस्ति, इत्यादि षड्भावविकारतया व्यवच्छिद्यते, पुण्यपापस्वभावकर्मवैचित्र्येणैतस्यैव भगवतः स्वर्गनरकादिभोगः प्राप्तः—इति कथमुच्यते स्वस्वरूप एव शिवः ?—इति ।

दृष्टान्तद्वारेण एतदपि समर्थयते

गच्छति गच्छति जल इव

हिमकरबिम्बं स्थिते स्थितिं याति ।

तनु-करण-भुवनवर्गे

तथाऽयमात्मा महेशानः ॥ ७ ॥

यथा जलप्रवाहे याति सति **हिमकरबिम्बं** चन्द्रवपुः वस्तुवृत्तेनाकाशस्थं स्वयमचलत्तात्मकं जलप्रवाहान्तः पतितमपि तत् **गच्छति** प्रयाति **इव** तथा तस्मिन्नेव क्षणेऽन्यत्र जलाशये निःस्तिमिते सति, तदेव **हिमकरबिम्बं स्थितिं** गच्छतीवेत्युभयथा सर्वप्रमातृभिः एतत्सम्भाव्यते, न पुनः परमार्थेन तत्तथैव स्यात् । नापि जलगतौ देशकालौ भेदकतया चन्द्रमसः स्वरूपं गगनस्थं परामृशतः, केवलं जलमेव तादृशम्, अथ च तत् प्रतिबिम्बितस्य चन्द्रबिम्बस्य जलगतचलत्ताचलत्तादिको भेदो व्यवह्रियते—इत्येतावता गङ्गाजलगतस्य, कर्दमपतितस्य वा शशिनः स्वस्वरूपतायां न काचित्क्षतिः । **तथैवायमात्मा** चैतन्यस्वभावः स्वयं निर्मिते **तनु-करण-भुवनसमूहे** परिक्षीणे सति, समुत्पन्ने वा प्रक्षीणः, समुत्पन्नश्चेति मायाव्यामोहितानां व्यवहारमात्रमेतज्जलगतचन्द्रवन्न पुनः स्वात्मा जायते; म्रियते वेति । गीतास्वेवमेवोक्तम्—

'न जायते म्रियते वा कदाचित्

नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो

न हन्यते हन्यमाने शरीरे ॥' भ. गी. २ । २०

इति

तस्मादयमात्मा महेशानः स्वतन्त्रः सर्वस्य स्वात्मप्रत्यवमर्शस्वभावः सर्वप्रमातृणामनुभवितृतया प्रथमानस्ततस्तत्तदवस्थाविप्रलोपे समुत्पत्तौ वा स्वस्वरूप एव । एतदेव च दुर्घटकारि महेशानत्वं संवित्तत्त्वस्य यत्तथा-

तथा पशुप्रमातृतया स्वर्गनरकादिभोगभोक्तापि सर्वानुभवितृतया संवित्स्वरूप एव। प्रत्युत पुण्यपापस्वर्गनरकक्षुत्पिपासादिको योयं पशुभावो बन्धकतया नियतः स यदि भगवता स्वात्मप्रकाशेन प्रकाशितः परामृष्टश्च स्यात्तदा यथोक्तां स्वात्मनि सत्तां लभते, अन्यथा निःस्वभाव एवैष—इति कथ स्वात्मनः तस्यैव महेशस्य स्वरूपविप्रलोपायोच्यते। सर्वथा निर्मितमेव वस्तु संहार्यं, समुत्पाद्यं वा देहादिरूपं स्यात्। न पुनर्नित्ये भगवति चैतन्ये समुत्पत्तिविनाशौ कदाचिद्भवेताम्। तस्मादेक एवात्मा ग्राह्यग्राहकतया नानारूपस्वभावः सन्, पुनरपि सर्वानुभवितृतया सर्वस्यैकतया प्रथते—इति न कदाचिदद्वयवादक्षतिः ॥ ७॥

(७) यथा जले प्रतिबिम्बितं चन्द्रबिम्बं प्रमातृभिर्गतिशीले जले याति निश्चले च निश्चलमस्तीति कथ्यते, तथैवायं सर्वस्वरूपश्चैतन्यस्वभावः परमेश्वरस्तेषु तेषु शरीरेषु करणेषु भुवनसमूहेषु च तात्कालिकेन स्वात्मरूपेण प्रकाशते ॥ ७ ॥

इत्थमपि सर्वेषामयमात्मा विश्वप्रपञ्चस्वभाव एव सविन्मात्रपरमार्थः सर्वाविभासः सर्वत्र संविदनुगमादिति युक्त्यागमाभ्यां प्रतिपादितश्चेत्किमिति लोष्टादावपि अविशेषात्स्वात्मतया स न प्रतीयते, अभ्युपगमे वा-जडाजडव्यवस्थेयं भासमाना न सङ्गच्छते, लोकव्यवहारश्च जडाजडरूपः—इति कथमेतत्स्यात्? इत्याह—

राहुरदृश्योऽपि यथा
शशिबिम्बस्थः प्रकाशते तद्वत्।
सर्वगतोऽप्ययमात्मा
विषयाश्रयणेन धीमुकुरे ॥ ८ ॥

आकाशदेशे **राहुः** सर्वत्र परिभ्रमन्नपि नोपलभ्यते, स एव पुनः ग्रहोपरागकाले चन्द्रमूर्तिस्थः प्रथमानः, अयं राहुः—इति परीक्ष्यते, अन्यथा

स्थितोऽपि भचक्रेऽस्थित इव । तथैवेहापि सर्वान्तरतमत्वेन स्थितोऽपि **अयमात्मा** स्वानुभवैकस्वरूपतया प्रत्यक्षपरिदृश्यमानः सर्वस्य तथा नोपलक्ष्यते। यदा पुनः पुर्यष्टकप्रमातॄणां बुद्धिदर्पणे प्रतिभामुकुरे ग्राह्यव्यवस्थाकाले शब्दादिविषयस्वीकारेण **शृणोमि** इत्येवमहंप्रतीतिविषयो भवति, तदा ग्राहकस्वभावतया लोष्टादावपि स्थितः सन् स्फुटरूपः, तत्रैव स्वात्मा **प्रकाशते** सर्वैश्च स्वानुभवैकरूपः प्रतीयते, लोष्टादावत्यन्ततमोमयत्वात् स्थितोऽप्यस्थितकल्पोऽसौ प्रथते, राहुः—आकाशे यथा। एवमयं भगवान् मायाशक्त्या स्वात्मकल्पेऽपि भाववर्गे कांश्चित्पुर्यष्टकस्वरूपान् वेद्यखण्डानपि अहन्ताव्यवस्थारसाभिषिक्तान् वेदकीकरोति, कांश्चिद्वेद्यीकरोति, तदपेक्षयायं जडाजडव्यवस्थास्वरूपो भेदव्यवहारः सुस्थित एवोपपद्यते । तेन लोष्टादिः वेद्यत्वाद् जडः, वेदकत्वात्पुर्यष्टकप्रमाताप्यजडः। तेन पुनः परमार्थेन परमेश्वरापेक्षया जडाजडव्यवहार इति ॥ ८ ॥

(८) यथागगने सर्वदा परिभ्रमन्नपि राहुर्नदृष्टिगोचरो भवति, परं चन्द्रसूर्ययोरुपरागकाले छायाभूतः सर्वदृश्यो भवति, तथैवेश्वरस्य सततोदितं चैतन्यात्मकं स्वरूपं समस्तेषु जडचेतनेषु समरूपेण वर्तमानमपि जडपदार्थेषु जनसाधारणस्य गम्यं न भवति, तत्रादृश्यरूपं भजमानमपि तत्सत्त्वगुणप्रधाने निर्मले बुद्धिदर्पणेऽभिव्यक्तं भवति । अर्थात् आत्मतत्त्वं बुद्धितत्त्वे एव प्रकाशते नान्येषु मलिनेषु जडतत्त्वेषु। अतो योगयुक्तानां पुनः शुद्धज्ञानदृशा पश्यतां सिद्धानां सदा सर्वत्र परार्द्धतपरशिवस्य साक्षात्कारो भवति ॥ ८ ॥

ननु सर्वप्रमातॄणां बुद्धौ चेत् स्वात्मनोऽप्यविशेषेण प्रस्फुरणं तर्हि ते सर्वे किमिति स्वात्मविदो न स्युः, तज्ज्ञानवन्तो मा वा भूवन्, विशेषाभावात्। यत्पुनः संसारावस्थायामपि केचन स्वात्मज्ञानाज्जीवन्मुक्ताः सर्वज्ञत्वसर्वकर्तृत्वशालिनः, केचन स्वात्मज्ञानयोग्या आरुरुक्षवश्च दृश्यन्ते, अपरे स्वात्मज्ञान-

रहिताः सन्तो धर्माधर्मनिमित्तशुभाशुभकर्म-निगडप्रबन्धबद्धा संसारिण एवेति कथमेतत्संगच्छते ? इत्थमन्तस्सर्वं कृत्वा पारमेश्वरः शक्तिपातो विशृङ्खलः — इति प्रतिपादयति —

आदर्शे मलरहिते
यद्वद् वदनं विभाति तद्वदयम् ।
शिव-शक्तिपातविमले
धीतत्त्वे भाति भारूपः ॥ ९ ॥

दर्पणे मालिन्यरहिते यथा निर्विशेषरूपादिगुणगणयुक्तं मुखं चकास्ति। न स देशोऽस्ति यं विनिवृत्तमल आदर्शो न स्वीकुरुते । समले दर्पणे तु मुख-मनन्यातिशयमपि ध्यामलत्वाद्वैपरीत्येन प्रकाशते । नापि मलिनस्तदीयान् गुणान् स्वीकर्तुमलम। प्रत्युत तन्न्यस्तमुखमन्यथैव ध्यामलत्वाद्युपेतमव-लोक्य स्वात्मनो लज्जामावहति विकृत मद्वदनमिति । तथैव **शिवस्य** स्वात्मनो यासावनुग्रहाख्या **शक्तिः** तस्याः **पातः** स्वकिरणविस्फारः, तेन समार्जिते आणव-मायीय-कार्ममलवासनाप्रक्षयाद्विशदीकृते, केषांचि-दपश्चिमजन्मनां प्रमातॄणां **भाः** प्रकाशो **रूपं** यस्येति स **भारूपः** स्वात्मा यावत्सर्वज्ञत्वादिगुणगणयुक्तस्तावानप्यवभासते, येन केचनैव ते स्वात्म-स्वरूपप्रथनात्संसारमध्यपतिता अपि मुक्तकल्पाः सातिशयाश्च । केषाञ्चिदेव परमेश्वरतिरोधानशक्त्या — आणवमायीयकार्ममलसमाच्छादिते बुद्धितत्त्वे भारूपोप्यात्मा मालिन्याद् भातोप्यभातकल्पः, येन ते सांसारिणः पशवः — इत्यभिधीयन्ते, अन्येऽनुभयशक्तियोगात् प्रमातार आरुरुक्षवः—इति इत्थं तीव्र-मन्द-मन्दतरादिभेदेन शक्तिपातवैचित्र्यं सर्वत्राप्यूह्यम् । अत्र न मायान्तःपातिनियतिशक्तिसमुत्थमश्वमेधादिकं जपध्यानादि वा अन्यद्यत्किञ्चित् कर्म मोचनहेतुः—आत्मनस्तस्यहि मायातः समुत्तीर्णत्वाद् भेदप्रधानं वस्तु तत्साध-नाय न प्रकल्प्यते । यद् गीतम्

'नाह वेदैर्न तपसा न दानेन न चेज्यया ।'
(भ० गी० ११ | ५३)

तस्मादेकमेवात्र परमेश्वरानुग्रहः कारणमकृत्रिमं भव्यबुद्धीनाम्—यदुक्तम्

'ईशितुः शक्तिपातांशे ख्यापयित्री स्वतन्त्रता ।
धीः कारणकलाघ्राता नैव किंचिदपेक्षते ॥'

इति

पशुप्रमातॄणां तु परमेश्वरतिरोधानशक्तिः संसरणहेतुरेव, येनैते स्वस्वरूपाप्रथनाय शुभाशुभकर्मनिरताः सुखदुःखादिभोगभाजः पुनः पुनरस्मिन् संसरन्ति । तस्मात् प्रमातॄणां साधारणेऽपि स्वात्मनि, प्रकाशाप्रकाशरूपे अनुग्रहतिरोधानशक्ती द्वे एव ते मोक्षबन्धप्रविभागहेतू । यदुक्तम् "अवधूत-सिद्धपादैः"

'बध्नाति काचिदपि शक्तिरनन्तशक्तेः
क्षेत्रज्ञमप्रतिहता भवपाशजालैः ।
ज्ञानासिना च विनिकृत्य गुणान् अशेषान्
अन्या करोत्यभिमुख पुरुषं विमुक्तौ ॥'

इति ॥ ९ ॥

(९) यथा निर्मले मणौ जले वा मुखप्रतिबिम्बं यथावत् प्रतिभाति न तथा प्रस्तरे कुड्ये काष्ठफलके वा प्रतिफलति, एवमेव निर्मल बुद्धितत्त्वयुक्ते जीवे परप्रकाशस्वरूपः परमशिवः षट्-त्रिंशत्तत्त्वात्मकः प्रकाशते, अर्थात् निर्मलबुद्धौ निश्चलात्मके ज्ञाने समुदिते सति ज्ञाता परशिवं सर्वव्यापकं, शुद्धप्रकाश-स्वरूपं मन्यमानः आत्मानं समस्तं विश्वञ्च तन्मयमनुभवति । योगाभ्यासेन भक्तिसाधनया च मानवो निर्मलबुद्धियुक्तो भवति ।

एवमिदं सर्वमागमानुभवयुक्तियुक्तं प्रतिपाद्य यत्प्राक् शक्त्याद्यण्ड-

चतुष्टयं प्रतिपादितं तदन्तरालवर्ति समुत्पत्तिक्रमेण षट्त्रिंशत्तत्त्वात्मक जगद्यल्लग्न भाति, तत्प्रथमतः कारणकारणं परमशिवस्वरूप कारिकाद्वयेनाह

भारूपं परिपूर्णं

स्वात्मनि विश्रान्तितो महानन्दम् ।

इच्छासंवित्करणैर्

निर्भरितम् अनन्तशक्तिपरिपूर्णम् ॥

सर्वविकल्पविहीन

शुद्धं शान्त लयोदयविहीनम् ।

यत् परतत्त्व तस्मिन्

विभाति षट्त्रिंशदात्म जगत्

॥ १० | ११ ॥

यत् एवंविधं **परं** पूर्णं शिवतत्त्वं, तत्र शिवादिधरापर्यन्तं वक्ष्यमाणं विश्वं विश्रान्तं सत्प्रकाशते, तदभिन्नमेव चकासद्युक्त्या उपपद्यते – इति यावत् । ननु तन्यते सर्वं तन्वादि यत्र तत्-तत्त्वं, तननाद्वा तदाप्रलयं, तस्य-भावः – इति वा तत्त्वम्, इत्येवमपि तत्त्वव्यपदेशोऽयं जाड्यापदकः कथं चिद्रूपे भगवति परमशिवे स्यात् ?— उच्यते – उपदेश्यजनापेक्षया यावत् शब्देन प्रतिपाद्यते, तावता तत्र तत्त्वव्यपदेशो, न वस्तुतः । कीदृश तत्परं तत्त्वम् ? **भाः** प्रकाशो **रूपं** स्वभावो यस्य, महाप्रकाशवपुः – इत्यर्थः । तथा **परिपूर्णं** निराकाङ्क्षम् । निराकाङ्क्षमपि स्फटिकमणिदर्पणादि जडं वस्तु भवति— इत्याह **स्वात्मनि विश्रान्तितो महानन्दम्** इति **स्वस्मिन्** स्वभावे अखण्डाहन्ताचमत्काररसे विश्रमात् **महान्—आनन्दः** परानिर्वृतिर्यस्येति । तदेवं परमाह्लादकस्फुरत्तासारत्वात्प्रकाश्यस्फटिकादेर्जडाद्वैलक्षण्यमुक्तं भवति । अत एव आह **इच्छासंवित्करणैर्भरितम्** इति । इच्छाज्ञानक्रिया-शक्तिस्वभावमेव, न पुनः शान्तब्रह्मवादिनामिव शक्तिविरहितं जड-कल्पम् । अन्यच्च **अनन्तशक्तिपरिपूर्णम्** इति **अनन्ताः** निःसंख्या घटपटाद्या

नानारूपात्मिकाः **शक्तयः** इच्छाज्ञानक्रियाशक्तीनां पल्लवभूता ब्राह्म्याद्याः शब्दराशिसमुत्थाः, ताभिः **परितः** समन्तात् **पूर्णं** व्याप्तं, तत एवोल्लसन्त्यस्तत्रैव शाम्यन्तीति । एवं परावाग्रूपं भगवति स्वातन्त्र्यमुक्तं स्यात् । ननु वाग्रूपं चेत्परं तत्त्वं, तर्हि काल्पनिकं, शब्दसन्निभत्वात्, कथं शुद्धप्रकाशवपुषि कल्पनायोगः ?—इत्याशयेनाह **सर्व-विकल्पविहीनम्** इति । परप्रमातरि योऽयं पराहन्ताचमत्कारः स वाग्रूपोऽपि निर्विकल्पः । विकल्पो ह्यन्यापोहलक्षणो ह्ययं घटाघटरूपमाक्षिपन्नघटाद्व्यवच्छिन्नं घटं निश्चिनोति । प्रकाशस्य पुनः पराहन्ताचमत्कारसारस्यापि नाप्रकाशरूपः प्रकाशादन्यः प्रतिपक्षतया विद्यते,, यद्व्यवच्छेदात्तस्य विकल्परूपता स्यात् । व्यवच्छेद्यो ह्यर्थोऽप्रकाशात्मा प्रकाशवपुषि प्रकाशते चेत्तर्हि

'तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ।'

(स्प० ३ | २८)

इत्यादिन्यायेन योप्यर्थः प्रकाशस्वभावतां यातः सन् स कथं स्वात्मनस्तस्यैव व्यवच्छेदकः स्यात्, येन विकल्परूपतां तत्र समावहेत् । अथ प्रतिपक्षतया न प्रकाशते—इति कथमिह प्रकाशमानः पदार्थः प्रतिपक्षरूपोऽस्तीति परिच्छेतुमपि शक्येत ? इति यत्किञ्चिदेतत् स्यात् । यतः **सर्वैः** व्यवच्छेदात्मकैः **विकल्पैर्विहीनम्** अपरिच्छिन्नस्वभावं परं तत्त्वम् । अत एव आह **शुद्धम्** इति विमलं, विकल्पमय्या अशुद्धिमय्या अभावात् । तथा **शान्तम्—इति** । ग्राह्यग्राहकसमुत्थक्षोभाभावाच्छक्तिसामरस्येन स्वस्वरूपस्थं, न पुनरश्मशकलकल्पम् । अन्यच्च **लयोदयविहीनम् इति**

'सकृद्विभातोऽयमात्मा ।' (श्रु०)

इति कृत्वा सनातन एव । अतो भूतभविष्यद्वर्तमानवपुः कालस्तत्र न क्रमते, यतः कालस्य तत एव समुल्लासः—इति समुत्पत्तिविनाशबहिष्कृते परतत्त्वेऽभ्युपगते विश्वस्य विश्वत्वमुपपन्नमिति प्रतिपादितं स्यात् ॥ १०।११ ॥

(१०–११) असौ परमशिवः परतत्त्वरूपोऽस्ति । तस्य पारमार्थिकं-रूपं चैतन्य प्रकाशरूपमस्ति । सर्वतन्त्रस्वतन्त्रः स सर्वदा सर्वत्र स्वमहिम्ना स्वयमेवाभिव्यक्ततां याति । सर्वञ्च विश्वं तदभ्यन्तरे स्थितं प्रतिभाति । सर्वसंकोच-विहीनत्वादनन्तशक्तिपरिपूर्णत्वात्सर्वथा सर्वत्रानव-च्छिन्नःसन्स्वात्मनि विश्रान्तितो महानानन्दमयः । विश्वस्मिन् परिदृश्यमानं दृश्यजातं परमशिवस्यैवाभि-व्यक्ततां गतं शक्तिविलसितमस्ति । सर्वविकल्पविहीने-शुद्धे शान्ते तस्मिन् परतत्त्वे षट्त्रिंशत्तत्त्वात्मकं जगत् प्रकाशते ।

नन्वेवंविधे परतत्त्वे जगद्भातीति यत्प्रतिपादितं तत्कथमेतत्स्यात्, यावता परतत्त्वापेक्षया न किञ्चिद्भेदेन भातु प्रगल्भेत ? ततो भिन्नं चेज्जगद्भासते; तदा—अद्वयवादखण्डना, अभिन्नं चेद् जगत्प्रकाशते इति कथं वाचो-युक्तिः ? इति दृष्टान्तद्वारेण तद्भेदाभेदरूपं तत्त्वमुपदर्शयन्नेतत्समर्थनायाह—

दर्पणबिम्बे यद्वन्-
नगरग्रामादि चित्रमविभागि ।
भाति विभागेनैव च
परस्परं दर्पणादपि च ॥ १२ ॥

विमलतमपरमभैरव-
बोधात् तद्वद् विभागशून्यमपि ।
अन्योन्यं च ततोऽपि च
विभक्तमाभाति जगदेतत् ॥ १३ ॥

यथा निर्मले मुकुरान्तराले नगर-ग्रामपुरप्राकाराट्टस्थल-नदनदीज्वलन-वृक्षपर्वतपशुपक्षि-स्त्रीपुरुषादिकं सर्वं प्रतिबिम्बतया चित्रं स्वालक्षण्येन

नानारूपं भासते—**अविभागि** दर्पणादविभक्तं सद् **भाति** तदभेदेनैव अन्तर् आकारं समर्पयति, तत्राभेदेन भासमानमपि भाति **विभागेनैव च परस्परं** इति अन्योन्यस्वालक्षण्येन घटात्पटो भिन्नः, पटाद्घटः इति विभक्ततया स्फुरति। तदन्तर्गता हि भावा एव पृथक्त्वेन परामृश्यन्ते, न पुनस्तं दर्पणं त्यक्त्वा पृथक् किञ्चिदुपलभ्यते, किन्तु दर्पणसामरस्येन स्थितमपि सर्वतो भिन्नं जगत् प्रतीयते। एवमपि घटादिप्रतिबिम्बेन दर्पणस्तर्हि-अन्तर्हितः स्यादिति—एतन्नेत्याह **दर्पणादपि चेति** न केवलं स्वय भावा दर्पणान्तर्गता अपि भिन्नाः प्रकाशन्ते, यावद्दर्पणादपि व्यतिरिच्यन्ते। यतो दर्पणस्तत्तत्प्रतिबिम्बमयोऽपि तेभ्यः प्रतिबिम्बितेभ्यः समुत्तीर्णरूपतया चकास्ति, न पुनस्तन्मयः सम्पद्यते, येन च **न दर्पणः** इति प्रतीतिः स्यात्। सर्वस्य पुनस्तत्तत्प्रतिबिम्बग्रहणेऽपि **दर्पणोऽयमिति** अबाधिता प्रतिपत्तिः। नापि घटादि दर्पणं विशिनष्टि येन अयं घटदर्पणः, अयं पटदर्पणः इति स्वस्वरूपताहानिस्तत्र जायते। देशकृतः कालकृतो वा भेदो न तत्र स्वभावविप्रलोपाय भवति। तस्मात्तत्तत्प्रतिबिम्बसहिष्णुः सन् स्वात्मनि दर्पणो दर्पण एव—इति न काचित् प्रतिबिम्बवादक्षतिः। अथोच्यते भ्रान्तिरेषा—यद् उत दर्पणे हस्तीति परामृश्यते, नतु पुनर्दर्पणे स कश्चिद्विद्यते, तथात्वेनार्थक्रियाविरहाद् भ्रान्त्यैव एष निश्चयः—इति। एतावता प्रतिबिम्बवादेन दृष्टान्तस्तावत्सिद्धः। भ्रान्तेस्तु स्वरूपं समनन्तरं निरूप्यते। **तद्वत्** तथैव दर्पणनगरादिप्रतिबिम्बदृष्टान्तेन **विमलतमपरमभैरवबोधात्** अतिशयेन विगलितकालिकात् पूर्णानन्दोद्रिक्तात्प्रकाशाद् **जगद्** विश्वं **विभागशून्यमपि** दर्पणप्रतिबिम्बवत्ततः प्रकाशाद् अविभक्तमपि परस्पर च विभक्तत्वेन ग्राह्यग्राहकापेक्षया नानारूपं प्रथते **ततोऽपि च** इति बोधादप्युन्मग्नमिव **आभाति** यतो बोधस्तद्रूपतयापि प्रथमानस्ततः समुत्तीर्णः प्रथते, यथा प्रतिबिम्बेभ्यो दर्पणः। एवमपि विश्वभावप्रतिबिम्बसहिष्णुः प्रकाशो विश्वभावेभ्यः समुत्तीर्णः सर्वस्यानुभवितृतया स्वस्वरूपेण प्रथते। भावगतोऽपि देशकालाकारभेदः केवलमत्र प्रकाशते दर्पणवत्, न पुनः स्वं रूपं संभिनत्ति। अतएवैकानेकस्वरूपोऽपि बोध एक एव, बौद्धाभ्युपगतचित्रज्ञानवत्। किन्तु दर्पणप्रकाशात् सचमत्कारस्य चित्प्रकाशस्येयान् विशेषो यद्दर्पणे स्वच्छतामात्र-

सनाथे भिन्नं बाह्यमेव नगरादि प्रतिबिम्बत्वेनाभिमतं भाति, नतु स्वनिर्मितम् । अतो दर्पणे अयं हस्तीति यो निश्चयः स भ्रान्तः स्यात् । प्रकाशः पुनः स्वचमत्कारसारः स्वेच्छया स्वात्मभित्तावभेदेन परामृशन्स्वसंविदुपादानमेव विश्वमाभासयति । विश्वस्याभासनमेव निर्मातृत्वं भगवतः — इति परामर्श एव प्रकाशस्य जडाद्दर्पणप्रकाशादेर्वैलक्षण्यापादकं मुख्यं रूपमिति । एतदेव ग्रन्थविवृतिविमर्शिन्यामुक्तम् —

'अन्तर्विभाति सकलं जगदात्मनीह
यद्वद् विचित्ररचना मुकुरान्तराले ।
बोधः पुनर्निजविमर्शनसारयुक्त्या
विश्वं परामृशति नो मुकुरस्तथा तु ॥'

"तन्त्रसारे"

इति । इत्थं परमेश्वरापेक्षया स्वाङ्गनिर्मिते भावराशौ न काचिद्भेदभ्रान्तिर्मायाप्रमात्रपेक्षया तु योऽयं भेदावभासः, एषापूर्णत्वाख्यातिरूपा भ्रान्तिः पूर्णस्याद्वयात्मनो रूपस्याख्यानमप्रथा, पूर्णं न भासते, किन्त्वपूर्णं द्वयरूपं भासते, भेद एव प्रतीयते—इति यावत् । तस्मान्निरवद्योऽयं प्रतिबिम्बवादः ॥ १२ । १३ ॥

(१२–१३) यथा निर्मले मुकुरान्तराले नगरग्रामादिकं प्रतिबिम्बतया प्रकटितं भवति, एकस्मिन् दर्पणे च विद्यमानं तत्तस्मादभिन्नं प्रतीयते, तथापि तत् पारस्परिकेण भेदेन विभक्तमेवावलोक्यते तद्वत् समस्तं जगत् प्रतिबिम्बन्यायेन सदैव शिवस्य शुद्धे प्रकाशे आभासमानं ततोऽभिन्नमपि प्रतीयमानं प्रतिपदं भिन्नभिन्नस्वरूपं दरीदृश्यते । इत्थंभूतोऽसावीश्वरः शिवः सर्वस्य विश्वस्य पूरकत्वात् सत्ताप्रदानाच्च भैरव इत्युच्यते । परमेश्वरस्य शुद्धः प्रकाशः सर्वदा सर्वथा परिपूर्णः, अतः कारिकायामसौ परमरभैवोऽपि संज्ञितः ॥

इत्थं परतत्त्वस्वरूपनिरूपणपूर्वं प्रकाशाभेदेन जगतः षट्त्रिंशत्तत्त्वात्मकस्य स्थिति विधाय पुनरप्येतस्य समुत्पत्तिक्रमेण प्रतितत्त्वं स्वरूपं कारिकाभिः प्रतिपादयति

शिव-शक्ति-सदाशिवता-

मीश्वर-विद्यामयीं च तत्त्वदशाम् ।

शक्तीनां पञ्चानां

विभक्तभावेन भासयति ॥ १४ ॥

योऽयं परमशिवः परतत्त्वनिरूपणया समनन्तरप्रतिपादितस्वरूपः स्वस्वरूपरूपाः याः शक्तयश्चिन्निर्वृतीच्छाज्ञानक्रियाख्याः पञ्चानन्तशक्तिव्रातहेतुभूतास्तासामेव **पञ्चानां शक्तीनां** भिन्नत्वेनातद्व्यावृत्त्येमां **तत्त्वदशां** पञ्चसंख्यावच्छिन्नामेव **भासयति** स्वालक्षण्येन प्रकटयतीत्यर्थः । कीदृशीं ताम्? इत्याह **शिव** इत्यादि **शिवश्च शक्तिश्च सदाशिवश्च,** तेषां भावो यस्याः सा तथोक्ता ताम्, तथा **ईश्वरविद्ये** प्रकृतिः यस्यां सा तथेति । अत्र प्रतितत्त्वं स्वरूपं प्रदर्श्यते । तथाहि सर्वप्रमातॄणामन्तः पूर्णाहन्ताचमत्कारमयं सर्वतत्त्वोत्तीर्णं महाप्रकाशवपुर्यच्चैतन्यमेतदेव शिवतत्त्वम् । अत्र तत्त्वनिरुपणमुपदेश्यजनापेक्षयेति । तस्यैव भगवतश्चिद्रूपस्यानन्दरूपा, **विश्वंभवामि** इति परामृशतो विश्वभावस्वभावमयी संविदेव किञ्चदुच्छूनतारूपा सर्वभावानां बीजभूमिरियं शक्त्यवस्था । एषैव विश्वगतसृष्टिसंहारोपचारात्कृशपूर्णोभयरूपाप्येकैव सर्वरहस्यनयेषु गीयते । पुनरप्यत्रैव विश्वसमुत्पत्तिबीजभूमौ महाशून्यातिशून्याख्यायां महेशस्य **अहमिदम्** इत्यभेदेन पूर्णाहन्तामयो यश्चमत्कारो ज्ञानप्राधान्यात्क्रियाभागस्याहन्ताविश्रान्तेः, सेयं सदाशिवदशा । अत्र मन्त्रमहेश्वराः प्रमातारस्तिष्ठन्ति । तथात्रैव **अहमिदम्** इत्यभेदेनाहन्तेदन्तयोः समधृततुलापुटन्यायेन यः स्वात्मचमत्कारः सैषा तस्येश्वरावस्था । अत्रापि मन्त्रेश्वराः प्रमातारः । अत्रापीदन्ताप्राधान्येनाहन्तागुणीकारेण यः—**अहमहम् इदमिदम्**—इत्येवंरूपश्चमत्कारः सद्योजातबालस्येव शिरोङ्गुलीनिर्देश्यः, एतदेव बोधसारत्वा-

द्भगवतः शुद्धविद्यातत्त्वम् । अत्र विद्येश्वरैः सह सप्तकोट्यस्तु मन्त्राणां वाचकतयानुग्रहस्वभावात्पशून्द्धर्तुं वाच्यान् मन्त्रमहेश्वरमन्त्रेश्वरान् प्रत्यवतिष्ठन्ते । अत्र विद्यातत्त्वे विद्येश्वरप्रमातॄणां बोधरूपत्वाविशेषेऽपि या भेदप्रथा सा मायाशक्तिकृतैव— इत्यागमेषु गीयते --

'मायोपरि महामाया ....'

इति । येन तत्रस्था मन्त्रा महामायानुप्रवेशादणवः— इत्युच्यन्ते । मायातत्त्वोपरि शुद्धविद्याधश्च विज्ञानाकलाः प्रमातारः —आणवमलभाजनम् । —एवमेकमेवेदं शिवस्वरूपं तुर्यातीतमपि तुर्यरूपतया तत्त्वपञ्चकतया गीयते । तस्मादेक एवैषः स्वतन्त्रः कर्ता प्रशस्यते, यस्य अहमिदम् इति सदाशिवेश्वर-भूमौ यः प्रकाशः, एतदेव शुद्धवेदनरूपं करणं, वक्ष्यमाणो मायातत्त्वादि-धरान्तस्तत्त्वसर्गश्च कार्यमित्येवं कर्तृकरणक्रियारूप एक एव स्वात्ममहेश्वराख्यः परमप्रमाता विजृम्भते ।। १४ ।।

(१४) असौ सर्वदा सर्वथा परिपूर्णः परमशिवः प्रमुखनां स्वात्मीयानां शक्तीनां चिन्निर्वृतीच्छाज्ञानक्रियारूपाणां प्रतिबिम्बान् क्रमेण प्रकाशयन्— शिवादारभ्य शुद्धविद्यातत्त्वपर्य्यन्तानां पञ्चतत्त्वानां दशामभिव्यनक्ति । अर्थात् चिच्छक्तिः स्वयं परमेश्वरस्वरूपास्ति, तस्यां यदा आनन्दशक्तिः प्रतिबिम्बिता भवति, तदा शिवतत्त्वतयावभासो भवति । वस्तुतश्चिच्छक्तेरेव— अनन्देच्छारूपे द्वे शक्ती स्तः । तस्यान्तर्मुखं स्पन्दनम् आनन्दो, वहिर्मुखं स्पन्दनं — चेच्छास्ति । अत एव अन्तर्मुखदृशा परमशिवः शिवः, स एव वहिर्मुखतादृशा शक्तिरित्युच्यते ।

मायातत्त्वस्वरूपम् आह

परमं यत् स्वातन्त्र्यं
दुर्घटसम्पादनं महेशस्य ।

देवी मायाशक्तिः

स्वात्मावरणं शिवस्यैतत् ॥ १५ ॥

परमम् अनन्यापेक्षं **यत्** परमेशितुः **स्वातन्त्र्यम्** विश्वनिर्मातृत्वं सैवेयं **मायाख्या शक्तिः** तस्य शक्तिमतः । मीयते परिच्छिद्यते धरान्तः प्रमातृप्रमेयप्रपञ्चो यया सा माया, विश्वमोहकतया वा माया । एषा देवस्य क्रीडाशीलस्य सम्बन्धिनीति कृत्वा **देवी** न पुनर्ब्रह्मवादिनामिव व्यतिरिक्ता काचिद् मायोपपद्यते – इति । कीदृशं तत्स्वातन्त्र्यम् ? **दुर्घटसम्पादनम्** इति । दुःखेन घटयितुं शक्यमिति **दुर्घटस्य** कार्यस्य प्रमातृप्रमेयरूपस्य संपादनं प्राप्तिप्रापकम् । एषैव माया स्वेच्छया पशुभावमापन्नस्य **शिवस्य स्वात्मावरणम्** स्वरूपगोपनाख्यमाणवादिमलत्रितयम् ।१५॥

(१५) अन्यानपेक्षस्य परमशिवस्य मायाशक्तिमायातत्त्वयोर्विवेचने- सति —असम्भवस्यापि सम्भवकरणशीला, अभेदेऽपि भेदावभासनशीला-तस्य मायाशक्तिरस्ति, इदमेवेश्वरस्य ''परम यत्स्वातम्न्त्र्यम् दुर्घटसपादनम्'' **अप्युच्यते । अस्या मायाशक्तेरेव स्फुटं प्रतिबिम्बं मायातत्त्वरूपेण प्रकाशते । तेन मायातत्त्वेन शिवः स्वस्वरूपस्य तिरोधानं कृत्वा तत्प्रभावेण स्वं स्वातन्त्र्यम्, स्वां शुद्धसविद्रूपताम्, सर्वज्ञतां, सर्वशक्तिमत्तां विस्मरति जीवरूपं विकसयति । एतदेव शिवस्य स्वात्मावरणमस्ति ।**

वक्ष्यमाणे च प्राधानिके सुखादिरूपे भिन्ने भोग्ये यद्भोक्तृरूपं पुंस्तत्त्व तत्स्वरूपमाह —

मायापरिगृहवशाद्

बोधो मलिनः पुमान् पशुर्भवति ।

काल-कला-नियतिवशाद्

रागाविद्यावशेन संवद्धः ॥ १६ ॥

माया— स्वीकारपारतन्त्र्यात् सर्वज्ञत्व-सर्वकर्तृत्वमयोऽपि **बोधः** सर्वज्ञत्वादिगुणापहस्तनेनाख्यातिरूपमाणवं मलमापन्नः, येन घटाकाशवत्पूर्णस्वरूपाच्चिदाकाशादवच्छेद्य परिमितीकृतः संस्तदेव पुंस्तत्त्वमुच्यते। अतो मायायाः पाल्यः पाश्यश्चेति पशुः आणवमायीयकार्ममलस्वभावानां पाशानां भाजनम्। अन्यच्च **कालकला** इति वक्ष्यमाणस्वरूपैः **कालादिभिः** ओतप्रोततया सम्यम् **बद्धो** रुद्धः—इत्येवं तत्त्वषट्कवेष्टितं पुंस्तत्त्वम् ॥ १६ ॥

(१६) **शुद्धप्रकाशस्वरूपः परमशिवः स्वमाययात्मानमावृतं स्वीकृत्य तत्प्रभावेण मलिनः सन् प्रतिबिम्बन्यायेन पुरुषरूपतां श्रयति। एवं कर्मादिवन्धनैर्बद्धो जीवः पशुरप्युच्यते। शुद्धसंवित्स्वरूपस्य अभाव एव मालिन्यावभासनम्। इत्थं सर्वं कर्तुं समर्थस्यापि तस्य क्रियाशक्तेः सङ्कोचः कला कथ्यते, तस्य ज्ञानशक्तेः सङ्कोचः विद्या, अशुद्धविद्या वा उच्यते। तस्य विनाशशङ्काङ्कितावस्था राग इत्युच्यते। मायायास्तृतीयो विस्तारो नियतिः पाशवीं क्रियां, सा च क्रिया ज्ञानं सङ्कोचयति। मायायास्तुर्यो विस्तारः काल इत्युच्यते। एवं कालकलादिभिरावेष्टितं चैतन्यं पुंस्तत्त्वं भवति।**

कालादीनां तत्त्वानां चैतद्वेष्टनक्रमेण स्वरूपमाह

अधुनैव किंचिदेवे-
दमेव सर्वात्मनैव जानामि।
मायासहितं कञ्चुक-
षट्कमणोरन्तरङ्गमिदमुक्तम् ॥ १७ ॥

इत्थं स्वतन्त्रोऽपि बोधः स्वमायया यथाणुत्वं प्राप्तस्तथैव तदीये ज्ञानशक्ती संकुचितेऽस्य पशुरूपस्य विद्या-कले—इति उच्येते। यथा राज्ञापहृतसर्वस्वस्यानुकम्पया जीवनार्थं किञ्चिद्धनं स्तोकं दीयते, तथैवाणुत्वमाप-

पन्नस्य बोधस्यापहृतसर्वज्ञत्वादेः किञ्चित्कर्तृता परमार्थज्ञत्वमुपोद्वल्यते- इति ज्ञत्वस्यैव प्राधान्यात् कालादीनां ज्ञानातिनान्वयो दर्शितः । इदङ्क- ञ्चुकषट्कमुक्तरूपया मायया युक्तम् **अणोः** आणवमलापहस्तितसर्वज्ञत्वादेः पुंसः स्वरूपाच्छादकम्, सुवर्णस्य कालिकेव **अन्तरङ्गम्** निज कथितम्। किंरूपम् ? इत्याह **अधुना** इत्यादि **अधुनैव जानामि** इति सोऽणुः वर्त- मानतया, इद प्राङ्मयाज्ञातम् जानामि ज्ञास्यामीति—एवमपि कृतं करोमि करिष्ये वेति ज्ञानक्रिया स्वरूपेण भावानपि तथा कलयन्नवच्छिनत्ति चेत्येषोस्य कालः । तथा **किञ्चिदेव** इत्यवच्छिन्नमेव करोति, सर्वं कर्तुं नालम्, घटमात्रकरणाय प्रभवति, न पटादौ—इत्येतदस्याणोः कलातत्वम् । **इदमेव** इति नियमात्कारणान्नियतं कार्यं यदर्थयते यथा वन्हेरेव धूमः, अश्वमेधादिकर्मण एव. स्वर्गादि फलम्, न सर्वस्मादित्येव नियमेन स्वसङ्कल्पकृत-कर्मप्रबन्धसमुत्थपुण्यापुण्यैः आत्मा नियम्यते येन तदस्य नियति तत्त्वम् । तथा **सर्वात्मना** इति येयमपूर्णम्मन्यता सर्वं ममेदमुपयुज्यते, भूयासं माकदाचिन्न भूवमित्येतत्पशोः रागतत्त्वम् । बुद्धिधर्मो यो रागः स एकत्र कुत्रापि कान्ता लक्षणेऽर्थेऽन्यदपोह्य "अत्र मे राग" इत्यभिवङ्गमात्रम्, न सर्वा- काङ्क्षामयस्य रागतत्त्वस्य समानः । तथा "जानामि" इतिकिञ्चिदेव पुरोवर्ति घटादिकं, न पुनर्दूरव्यवहितं वस्तु इति विद्यातत्त्वम् । शुद्ध- विद्यापेक्षया कारिकायां **"अविद्या"** इति कथितम् । न पुनर्वेदनाभावात् । **"मायासहितम्"** भेदप्रथाप्रयुक्तमेतत् कञ्चुकषट्कं पशोः इति ॥ १७ ॥

(१७) मायामारभ्य कालादि तत्त्वानां षण्णां संज्ञा "अणुतां गतस्य पशोः" कञ्चुक षट्कमुच्यते । कञ्चुकषट्कं पशोर- न्तरङ्गधर्माः सन्ति । अत एवाहमपहृत सर्वज्ञत्वादिसा- मर्थ्यः अस्मिन्नेव काले किञ्चित्किञ्चिद् जानामि, नतु सर्वम् । एतेन कालस्य, कलायाः, अशुद्ध विद्यायाश्च प्रभावस्य निरूपणं कृतम् । जीवः कमपि विशिष्टं विषयमेव जानाति यत्र तस्य स्वल्पापि रुचिर्भवति न तु सर्वम् । एतेन रागतत्त्वगतस्य प्रभावसय वर्णनं कृतं भवति । तमेव

विषयं कर्तुं शक्नोमि-यत्कर्तुं नियति शक्त्या बलं प्रदत्तमस्ति। एतेन नियतितत्त्वस्य निरूणं भवति।

कथमेतस्य कञ्चुक षट्कस्याणुं प्रत्यन्तरङ्गत्वमित्याह—

कम्बुकमिव तण्डुलकण-
विनिविष्टं भिन्नमप्यभिदा।
भजते तत्तु विशुद्धि
शिवमार्गौन्मुख्ययोगेन ॥ १८ ॥

वास्तवेन वृत्तेन "भिन्नमपि कञ्चुकम्" यथा "अभिदा तण्डुलकणविनिविष्टम्" इत्यभेदेन तण्डुलान्तश्च ऊतं भासते, निपुणैरपि प्रक्षिप्यमाणं तण्डुलस्यान्तरङ्गत्वान्न पृथगवतिष्ठते, तथैतन्मायादिकञ्चुकमणोस्तण्डुलस्थानीयस्यान्तरङ्गत्वात् कम्बुकस्थानीयं व्यतिरिक्तमव्यतिरिक्ततया पूर्णसंवित्स्वरूपमाच्छाद्य स्थितमिति शेषः। एवमपि दुर्निवार कथं तद्विलीयते? इत्याह **भजते** इत्यादि। **तु**: विशेषे नान्योऽत्र उपायः। **शिवस्य** स्वात्ममहेश्वरस्य योसौ **मार्गः** परमाद्वयचिदानन्दैकघनोऽस्मि, ममैवेदं विश्वं स्वशक्तिविजृम्भणमात्रम् इति या स्वात्मस्वरूपविभूतिप्रत्यवमर्शरूपा सरणिः **तदौन्मुख्यं** दाडर्येन तन्निभालनपरत्व सैष **योगः** पूर्णरूपतया-अणोः स्वात्मनि स्वस्वरूपत्वेन सम्बन्धः, तेन तद् उक्तस्वरूप कञ्कुकं विशेषेण **शुद्धि भजते** स्वयमेव निःशेषेण विलयं सेवते। एतदुक्तं स्यात्तदा परमेश्वरशक्तिपातविशुद्धहृदयः पशुर्भवति, तदा "अहमेव महेश्वरः" इति स्वात्मज्ञानाविर्भावात्स्वयमेव पशुत्वापादकं कञ्चुकावरण विलीयते! न पुनरत्र स्वात्मज्ञानं विहाय मायीयं किञ्चिन्नियतिशक्तिसमुत्थं कर्म प्रगल्भते—इति ॥ १८ ॥

(१८) यथा तण्डुलेषु वाह्याभ्यन्तररूपंकोषयुगलमस्ति, वाह्यं तुषरूपम् आभ्यन्तरं तण्डुलेषु संसक्तं कम्बुकनामधेयं पीताव-

मासं वस्तु भवति । आद्यस्योपलमुसलादिभिः पृथक्करणं सुकरम् । आन्तरिकस्य तण्डुलानामङ्गतां गतास्य पीत-वर्णस्य कञ्चुकनामधेयस्य यन्त्रादिसहयोगेन पृथक्करणे कृते सति तण्डुलानां शुभ्रो वर्णो भवति, तथैवात्मनो भिन्नोप्ययं षट्कञ्चुकवर्गस्तादङ्गतां गतः सन्नपि शाम्भव-शाक्ताणवादिषु मुक्तिप्रदेषु शैवमार्गेष्वभ्यासयोगेनावरण-रूपतां त्यजति । एवमात्मनः मलशोधनेन प्रक्षालनं भवति ।

एवं विधस्याणोर्भोक्तुश्च भोग्येन भाव्यमिति प्राधानिकं तत्त्वसर्ग-माह—

सुख-दुःख-मोहमात्रं
निश्चय-संकल्पनाभिमानाच्च ।
प्रकृतिरथान्तःकरणं
बद्धि-मनोऽहङ्कृति क्रमशः ॥ १९ ॥

सत्त्वरजस्तमसां यत् सुख-दुःख मोहात्मकं सामान्य रूपम्—अङ्गाङ्गि-भावो यत्र नोपलभ्यते-सामूलकारणं **"प्रकृतिः"**। प्रकृतेरनन्तरं कार्यरूप-मन्तःकरणमाह **निश्चय** इत्यादि । **'निश्चयः'** इदमेतादृगिति **'सङ्कल्पनम्'** मननम्, **अभिमानो** ममतेतिक्रमेण **'बुद्धिः, मनोऽहङ्कारः'** इत्येवं-रूपं त्रितयं **'अन्तःकरणम्'** अङ्गाङ्गिभावेन गुणानां कार्यभूतेन्द्रियाद्यपेक्षया च कारण-मिति ॥ १९ ॥

(१९) —सुखं सत्वगुणरूपम् दुःखं रजोगुणरूपम्, मोहस्तमोगुणरूपः, एवमेतेषां त्रयाणां सामरस्यं मूलप्रकृतिः कथ्यते । मूलप्रकृतौ-परिणामात् क्रमेणान्तः करणतत्त्वत्रयं मनोबुद्ध्यहङ्कारात्मकमभिव्यक्तं भवति । विविधानां नामरूपाणां मननाद् सङ्कल्पनसामर्थ्याद्वा मन

इत्युच्यते । जडपदार्थेषु अहन्तायाः— ममतायाश्चाभासस्य प्रकाशनक्षमस्य पुरुष सामर्थ्यस्य संज्ञा—अहंकार इति कथ्यते । निश्चयात्मकस्य ज्ञानरूपस्याध्यवसायस्य सामर्थ्यं बुद्धितत्त्व-मुच्यते । पुरुषस्य तत्तद्व्यापारेषु व्यवहारेषु च साधन भूतानामेषां करणानां वाह्यविषयैः सह साक्षात् सम्बन्धः मनपेक्षमाणानां संज्ञा-अन्तःकरणमिति ।

वाह्यकरणमाह—

श्रोत्रं त्वगक्षि रसना-

घ्राणं बुद्धीन्द्रियाणि शब्दादौ ।

वाक्पाणि-पाद-पायू-

पस्थं कर्मेन्द्रियाणि पुनः ॥ २० ॥

वक्ष्यमाणे शब्दादौ विषये ज्ञानप्रधानानि श्रोत्रादीनि पञ्चेन्द्रियाणि, क्रियाप्रधानानिचे न्द्रियाणि पञ्च वागादीनि । वचनादान-विहरण-विसर्गानन्दात्मकाः कर्मेन्द्रियाणां विषयाः । इत्युभयथा च "श्रृणोमि, कथयामि"— इत्यहङ्कारोनुगमादहङ्कारकार्याणि ॥ २० '।

(२०) शब्दस्पर्शरूपरसगन्धनामकानां विषयाणां ग्राहकाणि श्रोत्र-त्वक्चक्षुजिह्वाघ्राणरूपाणि बुद्धीन्द्रियाणि, ज्ञानेन्द्रियाणि वा कथ्यन्ते । अत्र चक्षुर्गोलकादीनि स्थूलरूपाणि—इन्द्रियाणि च सूक्ष्माण्युच्यन्ते । कथनसामर्थ्यं वाणी, ग्रहणसामर्थ्यं-पाणिः, प्रचलनसामर्थ्ययुतौ पादौ, मलत्यागसामर्थ्ययुक्तं-पायुः, आनन्दाभिव्यक्तिसाधनसामर्थ्यस्य-उपस्थैतिसंज्ञास्ति ।

एषां शब्दादिविषयस्वरूपं कथयति—

एषां ग्राह्यो विषयः

सूक्ष्मः प्रविभागवर्जितो यः स्यात् ।

तन्मात्रपञ्चकं तत्

शब्दः स्पर्शो महो रसो गन्धः ॥ २१ ॥

ज्ञेयकार्यतया स्वीकार्यो **य एषां** इन्द्रियाणां **विषयो** गोचरःस्यात् । स कीदृशः ? **प्रविभागवर्जितः** विशेषेणबहिष्कृतः सामान्यात्मा **सूक्ष्मो** योर्थो- भवेत् **तदेव** शब्दादि सामान्यरूपं **तन्मात्रम्** शब्दसामार्यं शब्दतन्मात्रमिति । एवमन्यानि । विषय—विषयिणोः परस्परापेक्षित्वादिन्द्रियवदिदमपि **तन्मात्र- पञ्चकम्** आहङ्कारिकमेवेति ॥ २१ ॥

(२१) **ज्ञानेन्द्रियग्राह्यं विभागवर्जितं पञ्चात्मकं सूक्ष्मं तत्त्वं तन्मात्रमुच्यते । तद्यथा शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूप- तन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्रम् कथ्यते ।**

विषयाणां परस्परसाङ्कर्येण पृथिव्यादीनि कार्यमित्याह—

एतत्संसर्गवशात्

स्थूलो विषयस्तु भूतपञ्चकताम् ।

अभ्येति नभः पवन-

स्तेजः सलिलं च पृथ्वी च ॥ २२ ॥

एतेषां **संसर्गवशात्** परस्परसंघर्षसामर्थ्यात् यो विशेषः **स्थूलो विषयः** स एव भूतरूपतां याति । तथाहि—शब्दतन्मात्राच्छब्दविशेषो नभो जायते, शब्दस्पर्शाभ्यां पवनः, रूपसंयुक्ताभ्यामेताभ्यां तेजश्च; एभ्यो रसयुक्तेभ्यश्चापः, गन्धसंयुक्तेभ्यश्च पृथ्वीति पञ्चभूतानि **कार्यं कारणानुगुणम्** इति कृत्वा एकोत्तरगुणानि—इति । एवमेषा प्रकृतिः कार्यकारणात्मा पुरुषस्य परमे-

श्वरस्येच्छया भोग्यतया प्रवृत्ते ति षट्त्रिंशत्तत्त्वात्मकं जगत् विभज्य प्रतितत्त्वं निरूपितम् ॥ २२ ॥

(२२) वर्णितानां पञ्चतन्मात्रतत्त्वानां पारस्परिकसंक्षोभसामर्थ्यादिन्द्रियाणां स्थूल - विषयाणां पञ्चमहाभूतानां क्रमेणाविर्भावो जायते— शब्दतन्मात्रात्— शब्द विशेष गुणंनभः, शब्दस्पर्शाभ्यां —शब्दस्पर्शगुणो वायुः, शब्दस्पर्शरूपेभ्यस्त्रिभ्यस्तेजः, एभ्यो रसयुक्तेभ्यश्चतुर्भ्यश्च आपः,गन्धयुक्तेः यः शब्दस्पर्शरूपरसेभ्यः गन्ध गुणा पृथ्वी च जायते । एवम् एतानि पञ्च महाभूतानि "कार्यं कारणानुगतम्" इति कृत्वा एकोत्तरगुणानि जायन्ते ।

मायाकञ्चुकवत् प्रकृतेः कञ्चुकतां पुरुषं प्रत्याह—

तुष इव तण्डुलकणिका-
　　मावृणुते प्रकृतिपूर्वकः सर्गः ।
पृथ्वीपर्यन्तोऽयं
　　चैतन्यं देहभावेन ॥ २३ ॥

अयमपि प्राधानिकः **सर्गो** धरापर्यन्तः **तण्डुलकणं** यथा **तुषो** धान्यचर्म **आवृणुते** समाच्छादयति तथैव मायाकञ्चुकेन कम्बुकस्थानीयेन-समावृतं **चैतन्यं** पुनरपि तुषस्थानीयेन **देहभावेन** एतत् तत्समावृणुते, तत्प्रति प्राकारतया स्थगयति । अत्रेमे प्रमातारः कलाभिरिन्द्रियमात्राभिर्विशेषान्ताभिः देहस्वभावाः **सकलाः** - इत्युच्यन्ते, विशेषवर्जिता विदेहाः प्रलयाकलाः —इति च । एवं शिवादिसकलान्तप्रमातृसप्तकसनाथं रुद्र-क्षेत्रज्ञाधिष्ठितं जगदिति ॥ २३ ॥

(२३) **यथा तुषरूपं धान्यच्छदं तण्डुलकणम् आवृणुते, तथैव-चैतन्यात्मकं संवित्स्वरूपं, प्रकृतिपूर्वकः पृथ्वीपर्य्यन्तः स्थूल-सूक्ष्मशरीरस्वरूपः तत्त्वसमूहः स्थगयित्वावतिष्ठते ।**

कञ्चुकत्रितयस्य पर-सूक्ष्म-स्थूल रूपतामाह—

परमावरणं मल इह

सूक्ष्मं मायादि कञ्चुकं स्थूलम् ।

बाह्यं विहग्रहरूपं

कोशत्रयवेष्टितो ह्यात्मा ।। २४ ।।

चैतन्यस्य स्वस्वरूपापहस्तनसतत्त्वाख्यातिरेवाणवो **मलः** आन्तरः, स्वर्णस्य कालिकेव **परम्** अन्तरङ्गम् **आवरणम्** छादनम्, तादात्म्येन स्थितत्वात् मायादि-विद्यान्तं कञ्चुकषट्कं **सूक्ष्मम्** आत्मन **आवरणम्** **तण्डुलस्य** कम्बुकमिवावरणं पृष्ठपातित्वेनास्ते, येन भेदमयी ज्ञत्व-कर्तृत्वादि-प्रथा प्रथते—इत्येष मायीयो मलः । एतदपेक्षया **बाह्यं** तुषस्थानीयं प्राधानिकं शरीरसत्तालक्षणमावरणं **स्थूलं** त्वङ्मांसादिरूपत्वादेष तृतीयः कार्मोमलः, येन प्रमाता शुभाशुभकर्मसञ्चयभाजनं भवति । एवमनेन पर-सूक्ष्मस्थूलरूपेण **कोषत्रयेण वेष्टितो** विकस्वरोऽपि घटाकाशवत्संकुचिती-कृतः **आत्मा** इति **अणुः**—इति **पशुः**—इत्युच्यते ।। २४ ।।

(२४) **ज्ञानसंकोचरूपं मूलमज्ञानमलमुच्यते, तदेवात्मनः सूक्ष्मतर-माणवमलभूतमतिसमीपस्थं प्रथममावरणमस्ति ।**
मायादिविद्यान्तं कञ्चुकषट्कं सूक्ष्ममन्तरङ्गमात्मनोद्वि-तीयमावरणम् । एष मायीयो मल उच्यते ।
तुषस्थानीयं प्राधानिकं शरीरसत्तालक्षणं त्वङ्मांसादिरूपं बाह्यावरणमुच्यते । एषतृतीयः कार्मोमलः येन प्रमाता शुभाशुभकर्मसंचयभाजनं भवति ।

एवं कोषत्रयेणावेष्टितो घटाकाशवत् संकुचितोकृत: आत्मा- अणु: — पशुरिति कथ्यते।

एतत्सम्बन्धादुपहत इव भवतीत्याह —

अज्ञान-तिमिरयोगाद्

एकमपि स्वं स्वभावमात्मानम्।

ग्राह्य-ग्राहकनाना-

वैचित्र्येणावबुध्येत ॥ २५ ॥

एष कोषत्रयसम्बद्ध आत्मा, आत्माख्यात्यन्धकारसंबन्धात् **'एकमपि'** अद्वयस्वभावमपि **स्वं** निजं नान्यस्मादुपनतम् **आत्मस्वभावं** चैतन्यमात्मसत्तालक्षणं स्वरूपं-प्रमातृ-प्रमाणप्रमेयनानारचनाप्रपञ्चेन जानाति, अभेदविपरीतेन भेदेनाभिमन्यते,—इति यावत् । यथा रेखातिमिरोपहत: पुरुष एकमपि चन्द्रं पश्यन् द्वौ चन्द्राविमौ **नभसि** स्त:—इति परिच्छिन्दन् लोकमपि दर्शयति **द्वौ चन्द्राविमौ पश्येति**। वस्तुवृत्तेन एक एवासौ चन्द्र: — इति तिमिरवशात्तथा भासते, येनोद्वेगलक्षणामानन्दलक्षणां वार्थक्रियां स तैमिरिक: प्राप्नोति । तथैवाज्ञानतिमिरप्राप्तभेदप्रथ: सर्वं स्वात्मनोऽभिन्नमपि भेदेन व्यवहरन् भिन्नं कर्मफलमर्थयते, येन भूयो भूय: स्वर्गनिरयादिभोगभाग्भवति। अतश्चाज्ञानस्य तिमिरेण रूपणा विपरीताभासनात् ॥ २५ ॥

(२५) यथा कश्चिद् रेखा तिमिररोगकारणाद्रुग्ण:—एकमपि रूपमनेकरूपविशिष्टं पश्यति तथैवाज्ञानतिमिररोगकारणाज्जीव: शुद्धमसीममद्वयस्वभावं परिपूर्णं निजं परासंविद्रूपं ग्राह्य-ग्राहकवैचित्र्यरूपेण प्रमेय-प्रमातृ-प्रमा-प्रमाणाद्यनन्तप्रकारेण जानाति। एतेन विपरीतावभासनेनात्मनोऽभिन्नमपि सर्वं भिन्नं मन्य-मानो जीवो भूयोभूयो स्वर्गनरकादिकमनुभवति।

आत्माद्वयं दृष्टान्तेन दर्शयति—

रस-फाणित-शर्करिका-

गुड-खण्डाद्या यथेक्षुरस एव ।

तद्वद् अवस्थाभेदाः

सर्वे परमात्मनः शंभोः ॥ २६ ॥

रसादय इक्षुभेदा **यथा** एक एवेक्षुरसः परमार्थतः सर्वत्र माधुर्यानुगमात्तथैव जाग्रदादि **अवस्थाभेदा** ग्राह्य-ग्राहक प्रपञ्चरूपाः **सर्वे** विशेषाः **परमात्मनः** स्वस्वभावस्य **शम्भोः** चैतन्यमहेश्वरस्यैव । यतः स एव भगवान् सर्वस्य स्वात्मभूतः, तथा ग्राह्य-ग्राहकाद्यवस्थाविशिष्टः प्रथते, **यथेक्षुरसः** न पुनः स्वात्मनस्तस्माद्भिन्नं किञ्चिदस्ति—इति स एक एव, सर्वावस्थासु संविदनुगमात् । इत्थं सर्वत्रैकरूपतादर्शनात्प्रमाता सर्वदृश्वा भवति । यथाह शम्भुभट्टारकः—

'एको भावः सर्वभावस्वभावः

सर्वे भावा एकभावस्वभावाः ।

एको भावस्तत्त्वतो येन दृष्टः

सर्वे भावास्तत्त्वतस्तेन दृष्टाः ॥' इति

भगवद्गीतास्वपि—

'सर्वभूतेषु येनैकं

भावमक्षयमीक्षते ।

अविभक्तं विभक्तेषु

तज्ज्ञानं विद्धि सात्त्विकम् ॥'

(१८ । २०)

इति ॥ २६ ॥

(२६) यथा रसः, फाणितम्, गुडः, शर्करादयः सर्वे इक्षुभेदा एव तथा, प्रमाता, प्रमेयं, प्रमाणमित्यादिकं विभिन्नं सर्वमेव पदार्थजातमेकमात्रस्य तस्यैव शम्भोश्चैतन्यस्वरूपस्य महेश्वरस्य परशिवस्यैवावस्थाभेदाः सन्ति । एवं सर्वत्र-समत्वदर्शनात्प्रमाता सर्वदृश्वा सम्भवति ।

तीर्थान्तरपरिकल्पितस्तु भेदः संवृत्यर्थमभ्युपगतोऽपि न सत्यभूमावकल्पते —इत्याह

विज्ञानान्तर्यामि-
प्राण-विराड्देह-जाति-पिण्डान्ताः ।
व्यवहारमात्रमेतत्
परमार्थेन तु न सन्त्येव ॥ २७ ॥

विज्ञानम्—इति बोधमात्रं केवलमनुपाधि, नामरूपरहितमप्यनादि-वासनाप्रबोधवैचित्र्यसामर्थ्यान्नील-सुखादिरूपं बाह्यरूपतया नाना प्रकाशते—इतिविज्ञानवादिनः ।

'पुरुष एवेदं सर्वम् ···· ······ ।'
'नेह नानास्ति किंचन ············ ।'

इति न्यायेन अन्तर्यामि सर्वस्येति परं ब्रह्म वानाद्यविद्यावशाद्भेदेन प्रकाशते – इतिब्रह्मवादिनः । अत्रोभयत्रापि वेदनस्य स्वातन्त्र्यं जीवितभूतं विश्वनिर्माणहेतुरिति न चेतितम् ।

अन्ये प्राणब्रह्मवादिनस्तु यथाप्राणनमेव विश्वमागूर्य वर्तते, नहि प्राणनादृतेऽन्यत्किंचिद् ब्रह्मणो रूपमिति सविमर्शं शब्दब्रह्म,—इत्याहुः ।

अपरे प्रतिपन्ना यथा विराड्देह इति वैराजमपि ब्रह्मणः सत्यभूत-मिति—यथोक्तम्—

'यस्याग्निरास्यं द्यौर्मूर्धा
खं नाभिश्चरणौ क्षितिः ।
सूर्यश्चक्षुर्दिशः श्रोत्रे
तस्मै लोकात्मने नमः ॥'

इत्येवमादि ।

जातिः इति महासत्तासामान्यलक्षणं सर्वगुणाश्रयं वस्तु परमार्थसत् —इतिवैशेषिकादयो ब्रुवते । अन्ये **पिण्डा** इति व्यक्तय एव परमार्थसत्यो, नहि सामान्यं नाम किञ्चिदेकमनेकगुणाश्रयं प्रकाशते, नाप्युपपद्यते वेति व्यक्तीनामेव व्यवहारः परिसमाप्तः, किं सामान्येनेति नानावृत्तिविकल्पैः सामान्यं विवदमाना 'व्यक्तयो नानुयन्ति,—अन्यदनुयायि न भासते, इत्येवमादि बहु ब्रुवन्तो **जातिर्न परमार्थः** इति प्रतिपन्नाः—इत्येव **विज्ञानादिः पिण्डोऽन्ते** येषां भेदानां ते तथोक्ताः, **व्यवहारमात्रमेतद्** इत्यस्मिन् स्वातन्त्र्यवादे प्रकाशमानस्य वस्तुनोऽनपह्नवनीयत्वादेते भेदाः संवृतिसत्यत्वेन प्रकाशन्ते **परमार्थेन तु न सन्त्येवेति** न पुनः सतत्त्वतयैते भेदाः, तीर्थान्तरपरिकल्पितभेदा विद्यमाना एव । तस्मादेक एव परमप्रकाशपरमार्थः स्वतन्त्रश्चैतन्यमहेश्वर इत्थमित्थं चकास्ति, यतोऽन्यस्यैतद्व्यतिरिक्तस्याप्रकाशरूपस्य प्रकाशमानताभावात् । यदुक्तम्

'तीर्थक्रियाव्यसनिनः स्वमनीषिकाभि-
रुत्प्रेक्ष्य तत्त्वमिति यद्यद् अमी वदन्ति ।
तत् तत्त्वमेव भवतोऽस्ति न किंचिदन्यत्
संज्ञासु केवलमयं विदुषां विवादः ॥'

(२७) विज्ञान वादिनः बौद्धाः शुद्धं—प्रभास्वरं चित्तमात्रं शुद्धविज्ञानं मन्यन्ते । वैदिकेषूपनिषत्सु वेदेषु च सर्वजीवेष्वन्तर्यामिरूपो व्यापक ईश्वर एव परमार्थ सत्यरूपेण गृह्यते ।

विमर्शनक्रियात्मिकां प्राणनशक्तिमपि केचन वैयाकरणा: प्राणब्रह्मवादिन: परमार्थसत्यमामनन्ति । भागवतसंज्ञका वैष्णवा: सर्वव्यापकं विराड् नामकं समष्टिशरीरविशिष्टं महान्तमात्मानमेव सत्यपदार्थं स्वीकुर्वन्ति । वैशेषिकाश्च व्यक्ते: स्वरूपं कार्यद्रव्यञ्च नश्वरं परमाणुरूपं द्रव्यं जातिरूपं सामान्यञ्चानश्वरं सत्यं मन्यन्ते ।

इति ॥ २७ ॥

इदानीं भ्रान्तेरसदर्थप्रतिपादनसामर्थ्येन निदर्शनमाह—

रज्ज्वां नास्ति भुजङ्ग-
स्त्रासं कुरुते च मृत्युपर्यन्तम् ।
भ्रान्तेर्महती शक्ति-
र्न विवेक्तुं शक्यते नाम ॥ २८ ॥

भ्रान्ते: पूर्णत्वाख्यातिरूपाया — अताद्रूप्यप्रतिभासने महती शक्ति: उत्तमं सामर्थ्यं न केनचिद्विवेक्तुं शक्यते न केनचिद्विचारयितुं पार्यते— इति यावत् ।

यथा वस्तुवृत्तेन रज्जु: परिदृश्यमाना, दीर्घत्व-कुण्डलिनी-रूपत्व-भ्रमात्सर्पोऽयम्—इति—अध्यवसातॄणां रज्जुद्रव्येप्यसदर्थप्रतिभासोऽयं सर्पाध्यवसाय: सदर्थप्रतिभासाद्भयं मरणावसायं विदधाति । अनुभवसिद्ध-मप्येतत् स्थाणुं भूतमिति मत्वा स्वयं भीषणीयं वाकारं समुल्लिख्य भ्रान्ता: सन्तो हृद्भंगनाशं के नाम न याता:— इति विभ्रम एवापूर्णत्वप्रथने हेतुरिति ॥ २८ ॥

(२८) भ्रान्तेस्तादृश्युत्तमा सामर्थ्यशीला शक्तिरस्ति, यस्या विवेचनं कर्तुं न पार्यते यत्सा कथं कीदृशी कियन्मात्रा वास्ति ।

सा हि वातेन परिसर्पन्त्यां रज्जौ सर्पत्वाभावेऽपि मारकोऽयं सर्पः— इति मृत्युभयंमुत्पादयति । अर्थाद् भ्रान्तेः सामर्थ्यात् असत्यमपि सत्यमिव प्रतीयते ।

एतत्प्रकृते समर्थयते —

तद्वद् धर्माधर्म-
स्वर्निरयोत्पत्ति-मरण-सुख-दुःखम् ।
वर्णाश्रमादि चात्म-
न्यसदपि विभ्रमबलाद्भवति ॥ २९ ॥

एवं यथा रज्जुः परमार्थसती भ्रान्त्या सर्पतया विमृष्टापि सर्पगतामर्थ-क्रियां करोति तथैव देहात्ममानिनां चेतसि धर्मादि-असदपि तत्त्वतोऽविद्यमानं **विभ्रमवशात्** मायाव्यामोहसामर्थ्यादिव **"भवति"** एतदेव तत्त्वमिति भ्रान्त्या सत्तां लभते । **धर्मः** अश्वमेधादिः **अधर्मो** ब्रह्महननादिः **स्वः** निरतिशयाप्रीतिः, **निरयो** यातना **उत्पत्तिर्जन्म** **मरणं** जन्माभावः **सुखम्** आल्हादः, **दुःखं** राजसः क्षोभस्तथा **वर्णो** ब्रह्मणोऽस्मि-इत्यादि **आश्रमो** ब्रह्मचारीत्यादि **आदि** ग्रहणात्तपःपूजाव्रतानीति सर्वं कल्पनामात्रसारं विभ्रमविजृम्भितमेव माया-शक्त्या देहाद्यात्मतयाभिमन्यते । एतत्सर्वं भ्रान्तेः प्रभवति ययानवरतं स्वर्ग-नरक-जन्म-मरण-प्रबन्ध-भाजः पशवः, न पुनः परमार्थतः स्वात्मनोऽनवच्छिन्न-चिदानन्दैकघनस्य धर्माधर्मादिकं किञ्चिद्विद्यते — इति ॥ २९ ॥

(२९) भ्रान्तेरसदर्थप्रतिपादनसामर्थ्यं समर्थयन्नाह — शुद्धं संवित्स्वरूपमेव स्वमहिमबलात् स्वस्वातन्त्र्याच्च धर्माधर्म-स्वर्ग-नरक-सुखदुःख - जन्म-मृत्यु-वर्णाश्रमादिव्रततपःपूजादिषु च सर्वेषु भावेषु प्रकाशते । परमार्थसत्यतया धर्माधर्मादयो न सन्ति, किन्तु परमेश्वरस्य स्वशक्तीनां प्रतिबिम्बभूताः केवलमाभासन्ते ।

एवमसदर्थप्रतिभासने भ्रान्तेः सामर्थ्यं विचार्य तदुत्पत्तिमाह—

एतत्तदन्धकारं

यद् भावेषु प्रकाशमानतया ।

आत्मानतिरिक्तेष्वपि

भवत्यनात्माभिमानोऽयम् ॥ ३० ॥

एतत्तदन्धकारम् इत्येषा सा समनन्तरप्रतिपादिता विश्वमोहिनी पूर्णत्वाख्यातिरूपा भ्रान्तिः यद् भावेषु प्रमातृप्रमेयरूपेषु विश्वर्वतिषु पदार्थेषु **प्रकाशमानतया**—इति

'......................नामप्रकाशः प्रकाशते ।'

इति प्रकाशमानतान्यथानुपपत्त्या प्रकाशशरीरीभूतेषु **आत्मनश्चैतन्य-महेश्वरादपृथग्भूतेषु सत्स्वपि** यः **अयम्** अतिरेकेणामी भावा ग्राह्या, बाह्या मत्तो भिन्नाश्चेति-**अनात्माभिमानो** वास्तवचिद्रूपतापहस्तनेन यत्तेष्ववास्तवं जडत्वापादनम् । अयमाशयः—भावप्रकाशनेऽन्यस्याप्रकाशरूपस्य बाह्यवासना-देर्हेतोरनुपपद्यमानत्वात्स्वात्मप्रकाश एव स्वतन्त्रः—अर्थात् नीलसुखादिना प्रकाशते । अतः प्रमातृप्रमेयरूपतया चित्स्वरूपोहमेव प्रकाशे—इति यद्वास्तवं रूपं तन्न प्रकाशते, केवलमेवा वास्तवो भेदः प्रथते इति-तात्त्विकप्रथनाभावाद् भ्रान्तेरन्धकारेण रूपणमिति ॥ ३० ॥

(३०) समस्तभावाः संविदनुग्रहेणैव प्रकाशमानाः सन्तो भासन्ते, यतोहि अप्रकाशमानस्य वस्तुन आभास एव न भवितुमर्हति । जड़वस्तुजातं न क्वापि स्वसामर्थ्यात् प्रकाशते । अत एव धर्माधर्मादयो भावाः प्रकाशमानाः सन्तः-प्रकाशस्वरूप-स्यात्मनो व्यतिरिक्ताः न विलसन्ति, अपितु आत्मस्वरूपा एव

भवन्ति । एतेन भ्रान्तेरसदर्थाऽवभासने सामर्थ्यं प्रदर्शितं भवति ।

आत्मन्यनात्माभिमानपूर्वोऽनात्मन्यात्माभिमानो भवति—इति प्रतिपादयन् भ्रान्तेः सुतरां मोहरूपतामाह --

तिमिरादपि तिमिरमिदं
गण्डस्योपरि महानयं स्फोटः ।
यदनात्मन्यपि देह-
प्राणादावात्ममानित्वम् ॥ ३१ ॥

आदौ तावदेकसंवित्सतत्त्वेष्वपि भावेषु भेदमय जाड्यापादनमख्यातितिमिरेण कृतं यत्स्वात्मनोऽभिन्नानां भावानां ततो भेदेन प्रथनम्, अत एव तिमिरमिव **तिमिरम्** अख्यातिः । यथैकोऽपि चन्द्रश्चक्षुस्थेन रेखातिमिरेण द्विधा भास्यते **द्वौ चन्द्रौ** इति, तथैवाख्यातितिमिरमेकमपि सर्वं स्वात्मस्वरूपं वस्तु भेदेनात्मरूपं प्रकाशितवत् । एवमवस्थिते **तिमिरम्** अपरमायातम्, मोहान्मोहोऽयमापतितो **गण्डस्योपरि पिटकोद्भवश्च, यत्** अख्यात्यपहस्तितचित्स्वरूपेष्वपि विश्ववर्तिषु पदार्थेषु जाड्यमापादितेषु मध्यादुद्धृते व्यतिरिक्ते जडे **देहप्राणादौ** वेद्यखण्डे कृशोऽहं, स्थूलोऽहं, क्षुधितोऽहम्, सुख्यस्मि न किञ्चिदहमिति प्रमातृतया-अनात्मभूते **आत्ममानित्वम्** अताद्रूप्ये ताद्रूप्यप्रतिपत्तिः, एतदतिवैशसम् । यदि तावदात्माभिमानेन विना वैशसमस्ति, तन्नीलसुखादिष्वप्यस्तु, मा वा कुत्रापि भूत्, यत् पुनः कतिपये जडे देहादौ लोष्टप्राये आत्मतयाहन्तारसाभिषेकः, अन्यत्र नील-सुखादावविदन्तयानात्मप्रतिपादनम्, एष एव पूर्णः संसारः शोचनीयो यदभिमानोपनतो द्वन्द्वाभिघातः कर्षति पशूनिति । यदुक्तं मार्कण्डेय पुराणे योगिन्या मदालसया ।

यानं क्षितौ यानगतश्च देहो
देहेऽपि चान्यः पुरुषो निविष्टः ।

ममत्वमुर्व्यां न तथा यथा स्वे
देहेऽतिमात्रं च विमूढतैषा ॥ २५ | १८ ॥

इति ॥ ३१ ॥

(३१) आत्मन्यनात्माभिमानः, अनात्मनि चात्माभिमानः भ्रान्तेः सुतरां मोहरूपतात्मकात् कारणाद् भवति—भ्रान्तेः कारणाज्जीवः शरीरादीन् जड़पदार्थान् स्वस्वरूपं मन्यमानः आपेक्षिकाणि क्षुद्रसुखानि जन्म, जरा, मृत्युरूपाणि दुःखान्यनुभवति। तस्य स्वशुद्धसंवित्स्वरूपस्य विस्मरणं तिमिररोगायते। परं देहादिष्वनात्मरूपेषु जड़पदार्थेषु-आत्मरूपकलनात्मकं वस्तु तिमिररोगऽपरो घनतिमिर रोगो गण्डस्योपरि विस्फोटरूपतां धत्ते।

एवमनाख्याति वशान्मिथ्याविकल्पैरित्थमात्मानं बध्नातीत्याह—

देह-प्राणविमर्शन-
धीज्ञान-नभः प्रपञ्चयोगेन।
आत्मानं वेष्टयते
चित्रं जालेन जालकार इव ॥ ३२ ॥

अख्यात्यपहस्तितचैतन्यः सर्वः प्रमाता स्वोत्त्थविकल्पनिगडैर्व्यापकमपि **आत्मानं वेष्टयते**। कथमित्याह—**देह**-इत्यादि। **देहप्राणयोर्विमर्शनं धियो ज्ञानम्**, निश्चयः **नभसां प्रपञ्चो** विस्तारः **तद्योगेन** देहादिविकल्पसम्बन्धेन। यथा कृशः, स्थूलो रूपवान् पण्डितश्चास्मीति बालाङ्गनापामराः कार्षिकाः इत्थं स्वविकल्पेन देहमेवात्मत्वेन प्रतिपन्नाः। किञ्चिद्विवेचकंमन्याः देहस्तावदिहैव प्रलीयते, कुतोस्यात्मत्वम्? अतो यः क्षुधितः पिपासितः सोऽहम् इति प्राणात्ममानिनश्च विवेचकंमन्यतराः।

देहप्राणौ जडौ लोष्टादिवत्, कुतोनयोः—आत्मभावः ? ततः सुखी अहं, दुःखी अहं इतियः सुखदुःखादि चेतते, स आत्मा – इति पुर्यष्टकाभिमानिनो मीमांसकादयोऽपि विवेचकतमाश्च ।

एतत्सुखदुःखाद्यपि बुद्धिधर्मः कथमात्मतया वक्तुं शक्यः ? ततो देह-प्राण-धीविकल्पानां यत्र अभावः स आत्मा—इति शून्याभिमानिनः । एवं यत्किञ्चिदिदं भाति तन्नाहमित्यप्रथारूपं शून्यमेव सर्वापोहनस्वभावमात्मा—इति नभःशब्देनोक्तः । तदपि शून्यं यदा समाधानावसरे वेद्यीकुर्वते—एतदपि शून्यं वयं न भवामः । तदा शून्यान्तरमात्मत्वेन विदधानाः **न** इति **न** इति ब्रह्मवाद्यभ्युपगततत्तच्छून्यपरित्यागेन तां तां शून्यात्मतां परिगृह्णन्ति इति नभःप्रपञ्चः कारिकायां निरूपितः। इत्थं सवित्स्वरूपापर्यवसानात् शून्यात्ममानिनो योगिनः सुषुप्तगुहानिमग्ना जडात्मानो भ्रान्ता एवात्मानं संवित्स्वरूपमपि जाड्येनानुबध्नन्ति । **चित्रम्** इत्याश्चर्यमेतद्यदुत वैशसंनैतत्स्वयं कर्तुं पार्यते—इति। अत्र दृष्टान्तमाह—**जालेन** इत्यादि । यथा **जालकारः** कश्चित्कृमिर्वा स्वनिर्मितेन फेनेन जालम्—आवरण निर्माय सर्वतोगतम् **आत्मानं वेष्टयते** स्वं स्वात्मनिधनाय बध्नाति, येनोत्तरत्र तत्रैव निधनं याति, तथा देहाद्यात्ममानी तु स्वविकल्पकल्पितैः **अहं-मम** इति विकल्पैः स्वात्मानमेव बध्नाति-तथा च बौद्धाः—

'सत्यात्मनि परसंज्ञा
स्वपरविभागात् परिग्रहद्वेषौ ।
अनयोः संप्रतिबद्धाः
सर्वे दोषाः प्रजायन्ते ॥'

इत्याहुः ॥ ३१ ॥

(३२) यथा क्षौमकरः कीटः, स्वमुखनिर्गतेन लालारूपेण जालस्रवेण सामोदं विविधाः क्रीडाः कुर्वन् तैरेवावेष्टितो म्रियते—तथैवाज्ञो जीवोऽपि विकल्पितेषु चिन्तनसमूहेष्वात्मानं-

वेष्टयित्वा संसारस्यानेकान् कष्टान् अनुभवन् स्वाज्ञानस्य दुःखरूपं फलमनुभवति । सर्वमिदं तस्याज्ञानजन्यांया भ्रान्तेरेव फलमस्ति । वस्तुतः परमेश्वर एव जीवभावमापन्नः सन् स्वबन्धनलीलायास्तेषु तेषु भावेषु अभिनयं करोति । एषा बन्धनलीला निगूहलीला, पिधानकृत्यलीलापि च कथ्यते ।

कथमेष दुर्निवारो महामोहो देहादिप्रमातृतासमुत्थः प्रलीयते ? इति—भगवत्स्वातन्त्र्यमेवात्र हेतुरित्याह—

स्वज्ञानविभवभासन-
योगेनोद्वेष्टयेन्निजात्मानम् ।
इति बन्धमोक्षचित्रां
क्रीडां प्रतनोति परमशिवः ॥ ३३ ॥

स्वस्य आत्मनश्चैतन्यलक्षणस्य यद् **ज्ञानं** स्वस्वातन्त्र्यावगमस्तस्य **विभवो** देहाद्यभिमानगलनेन यच्चित्स्वरूपे पराहन्ताचमत्काररूपस्य स्वस्वातन्त्र्यस्य स्फीतत्वं चिदानन्दैकघनः स्वतन्त्रोऽस्मीति तस्य बोधस्वातन्त्र्यस्वरूपस्य विभवस्य भासनं प्रकाशः **सर्वो ममायं विभवः** इति बाह्यतयाभिमतस्य सर्वस्य स्वात्मन्येव स्वीकारस्तस्य **योगः** एवं परिशीलनक्रमेणात्मनि यद् विमर्शदार्ढ्यमेवमेतेन **स्वज्ञानविभवभासनयोगेन निजमात्मानम्** नान्यत उपनतं चैतन्यस्वभावम् **उद्वष्टयते** देहप्राणपुर्यष्टकशून्यपरामर्शनानिगडैर्यो वेष्टित आसीत्तमेव **चैतन्यस्वरूपः स्वतन्त्रोऽस्मि** इति विमर्शनेन पुनरपि **भगवानेवोद्वेष्टनं** विगतवेष्टनं कुरुते इति । एवमख्यातिबलादागतं स्वात्मनो देहाद्यावरणं तत्पुनरपि ख्यातिबलाद्विनश्यति—इति स्वविकल्पकल्पित इयान् दोषः इति श्रीमद्ग्रन्थकृता तन्त्रसारे निरूपितम्—

'यो निश्चयः पशुजनस्य जडोऽस्मि कर्म-

संपाशितोऽस्मि मलिनोऽस्मि परेरितोऽस्मि ।

इत्येतदन्यदृढनिश्चयलाभयुक्त्या

सद्यः पतिर्भवति विश्ववपुश्चिदात्मा ॥' इति

किमिति बध्नाति मुञ्चति च भगवान् ? इत्याह – **इतिबन्ध** इत्यादि । **इति** प्राक्प्रतिपादितेन क्रमेण भगवान् स्वतन्त्रः **परमशिवः** पूर्णचिदानन्दैकघनलक्षणः स्वरूपगोपनसतत्त्वक्रीड़ाशीलत्वादख्यात्यवभासनपूर्वं स्वात्मानमेव देहादिप्रमातृतापन्नं विधाय स्वरूपं प्रच्छाद्य च बन्धं विदधाति, तथैव पुनः स्वेच्छातः स्वात्मज्ञानप्रकाशक्रमेण देहादिप्रमातृताबन्धं निवार्य, स एव तं स्वात्मानं मोचयति इत्युभयथा **बन्धमोक्षचित्राम्**— संसारापवर्गस्वरूपाश्चर्यमयीं **क्रीडां** खेलां **प्रतनोति** विस्तारयति **एकाकी न रमाम्यहम्** इति स्वभाव एवैष देवस्य, यत्तां तामप्यवस्थामापन्नः स्वरूपरूपः सन् सर्वत्रानुभवितृतया प्रथते— इत्येतदेव स्वातन्त्र्यम् ॥ ३३ ॥

(३३) **परमः शिवः स्वानुग्रहलीलाया अभिनयं कुर्वन् कदाचित् कमपि जीवं प्रति स्वसाक्षात्स्वरूपेण— अपरोक्षानुभवेन च तं तस्य स्वाभाविकस्य पारमैश्वर्यविभवस्यावभासनं करोति । स्वज्ञानविभवभासनयोगेन तस्य जीवस्य वास्तविकं स्वरूपं स्वभावञ्च अनावृतं प्रकटयति येनासौ स्वात्मानं परमेश्वरस्वरूपेण परिचिनोति समस्तं च जगत् स्वशक्तीनामभिव्यक्तिरूपेण पश्यति निश्चयं करोति यदहमेवास्मि शुद्धः, स्वतन्त्रः, असीमः, शुद्धसंवित्स्वरूपः परमेश्वरः इति ।**

नकेवलमेतद्यावदपरः कश्चिदवस्थाविशेषः स्वस्मिन् रूपे विश्रान्त एवाभास्यते-भगवता —इत्याह—

सृष्टि-स्थिति-संहारा

जागृत्स्वप्नौ सुषुप्तमिति तस्मिन् ।

भान्ति तुरीये धामनि

तथापि तैर्नावृतं भाति ॥ ३४ ॥

विश्वापेक्षया ये सर्गादयो, मायाप्रमातृगताश्च ये जाग्रदादयोऽवस्था-विशेषास्ते उभयथैतस्मिन् भगवत्यानन्दघने **तुरीये धामनि** चतुर्थेपूर्णाहन्तामये पदे **भान्ति** तद्विश्रान्ताः स्वरूपसत्तां कल्पितप्रमात्रपेक्षया बाह्यतया लभन्ते। परमेश्वरभित्तौ यन्न प्रकाशते तद्बाह्यतयापि न प्रकाशते अतः—

'त्रिषु चतुर्थं तैलवदासेच्यम्।' (३ | २० शि० सू०)

इति सर्वास्ववस्थासु तुरीयं रूपमनुस्यूतत्वेन स्थितमिति परमार्थः। एतावता तत्र तैः स्वरूपमाच्छादितं स्यान्न वा ? इत्याह **तथापि तैर्नावृतं भाति** इति। इत्थमपि तैः स्वरूपसत्तार्थमावृतमपि तेभ्यः समुत्तीर्णतया सर्वानुभवितृतया सर्वत्रावभासत एव, न पुनस्तदावरणेन पूर्णस्वरूपतां तत्र तिरोधत्ते — इति शिवधाम सर्वावस्थास्वपि सदैव परिपूर्णम् ॥ ३४ ॥

(३४) **परमेश्वरस्य लीलायाः कृत्यभेदस्यावस्थाभेदस्य च वैचित्र्यमधिकृत्याह—परमेश्वरस्य शुद्धसंविदो यत्सततोदितं स्वरूपं तत्तुर्यातीतमुच्यते। शिवशक्तितत्त्वस्थं तद्रूपं तुरीयदशायाः परमोच्चं सोपानमस्ति तज्जाग्रत्स्वप्न-सुषुप्त्यपेक्षया चतुर्थमुच्यते। तस्यामवस्थायां जीवः स्वं शुद्धं रूपं वास्तविकंनिजं स्वभावञ्च सम्यक् परिचिनोति। तस्मिंस्तुरीये शुद्धसंविदः प्रकाशाभ्यन्तरे जाग्रत्स्वप्न-सुषुप्तिरूपास्तिस्र-अवस्था आभासिताः भवन्ति। तास्मिः सृष्टिस्थितिसंहाररूपं पारमेश्वर्यं कृत्यजातमपि प्रकाशते। यथा दर्पणः परिष्कृते स्वीये रूपे अन्यान् प्रतिबिम्बितान् भावान् उद्भावयतिपरंतैर्नावृतो भवति, तद्वत् तुरीया-**

चेतनापि जाग्रदादीनां, सृष्टिस्थित्यादीनां च अवभासनेन कदापि नावृता भवति ।

वेदान्तभाषाभिर्जाग्रदादीनां त्रयाणां स्वरूपं व्यवहरंस्तदनुस्यूतमपि ततः परं तुरीयमावेदयति—

जागृद्विश्वं भेदात्

स्वप्नस्तेजः प्रकाशमाहात्म्यात् ।

प्राज्ञः सुप्तावस्था

ज्ञानघनत्वात्ततः परं तुर्यम् ॥ ३५ ॥

जाग्रदवस्थैव **विश्वं** ब्रह्मणो वैराजं स्वरूपं, कुतः ? **भेदात्** शब्दादिविषयपञ्चकस्य बाह्यतया परमेश्वरसृष्टस्यैव सर्वप्रमातॄणां चक्षुरादीन्द्रियप्रवृत्तेः, इत्येकस्यैव ब्रह्मणो विषयविषयिभावेन स्थितस्य नानेन्द्रियज्ञानवैचित्र्यम्—अत एव शिवसूत्रेषु

"ज्ञानं जागृत्" (१ | ८) इति

एषा ब्रह्मणो विराडवस्था गीयते । यच्छ्रुतिः—

यो विश्वचक्षुरुत विश्वतो मुखो

विश्वतो हस्त उत विश्वतस्पात्

संबाहुभ्यां नमते संयजत्रे-

द्यावापृथिवी जनयन्देव एकः ॥ इति ।

यथा **स्वप्नः** तेजोऽवस्था ब्रह्मणः । कुतः ?—इत्याह **प्रकाशमाहात्म्यात्** इति । स्वप्ने बहिष्करणानि शब्दादौ विषये तावन्न प्रगल्भन्ते नापि तत्र बाह्यं शब्दादिकं नाम किञ्चित्परमार्थसद्विद्यते नापि बाह्यताध्यवसायस्याविद्यादि किञ्चिद्भिन्नमभिन्नं वा कारणान्तरमुपलभ्यते, युक्त्या विचार्यमाणं वोपपद्यते ।

अथ च स्वप्ने सर्वं प्रकाशते, अत इदमर्थबलादायातम् - यत्स एव भगवान् स्वस्वभावो देवस्तत्तत्प्रमातृतां समाविष्टः स्वप्नायमानः स्वात्मानमेव प्रकाशस्वातन्त्र्याद् गृह-नगराट्टालाद्यनेकप्रमातृवैचित्र्यरूपतया प्रविभज्य प्रतिप्रमातृ स्वप्नेऽसाधारणमेव विश्वं प्रकाशयत्येव, इति ब्रह्मणः स्वातन्त्र्यं स्वप्न एव ब्रह्मवादिभिरभ्युपगतम्

यतो वेदान्तेष्विदमुक्तम्—

'प्रविभज्यात्मनात्मानं
सृष्ट्वा भावान् पृथग्विधान् ।
सर्वेश्वरः सर्वमयः
स्वप्ने भोक्ता प्रकाशते ॥'

इति प्रकाशमाहात्म्यमेवात्र हेतुः । अतः स्वप्नो ब्रह्मनस्तेजोऽवस्थेति । तथा **प्राज्ञः सुप्तावस्था इति ।** सर्वप्रमातॄणां या **सुप्तावस्था** सुषुप्तं सा प्राज्ञः इति ब्रह्मणः प्राज्ञावस्थेति । यतः सर्वप्रमातॄणां ग्राह्यग्राहकप्रपञ्चविलयान्महाशून्यत्वरूपे ग्राह्यादिविलये संस्कारशेषे सुषुप्ते विश्वस्य बीजभूतस्य ब्रह्मण एव प्रज्ञा, ब्रह्म प्रज्ञातृतयान्तरतममवशिष्यते—इति यावत् । सर्वस्य प्रमातुः नीलसुखादिविश्ववैचित्र्यप्रथायाः सैषा संस्कारभूमिस्ततः प्रबुद्धस्य प्रागनुभूतवद्व्यवहारदर्शनात्,—अन्यथा यद्यस्यां भूमौ स्थिरं प्रज्ञातृस्वभावं सर्वकोडीकारेण ब्रह्म न प्राकाशिष्यत, कुतस्तत उत्थितस्य प्रमातुः प्रागनुभूतवस्तुनः **तथैवतत्** इत्यनुभूतचरत्वेन स्मृतिरुदपत्स्यत, नापि सुखमहमस्वाप्सम्, दुःखमहमस्वाप्सम् गाढमूढोऽहमासमित्यनुभवः प्रादुरभविष्यदिति । तथा च भट्टदिवाकरवत्सः—

'सर्वेऽनुभूता यदि नान्तरर्था-
स्त्वदात्मसात्कारसुरक्षिताः स्युः ।
विज्ञातवस्त्वप्रतिमोषरूपा
काचित् स्मृतिर्नाम न संभवेत्तत् ॥'

इति इत्थं सुषुप्तं चिन्मयमेव ब्रह्मणः प्राज्ञावस्थेति गीयते कुतः **ज्ञानघनत्वादिति** सुषुप्ततुर्ययोः साधारणोऽयं हेतुरित्युभयत्र योज्यम् । एषा सुषुप्तभूमिः **ज्ञानघना** प्रकाशमूर्तिः, केवलं विश्वप्रलयसंस्कारेण ध्यामला सती शुद्धचिन्मयी न भवतीति । यदुक्तं स्पन्दशास्त्रे ।

ज्ञानज्ञेयस्वरूपिण्या

शक्त्या परमया युतः ।

पदद्वये विभुर्भाति

तदन्यत्र तु चिन्मयः ॥

(१ नि० १८ का०)

इति । तथा **ततः परं तुर्यम् इति** । तस्मात् सुषुप्तात् **परं** अन्यत् निःशेषपाशववासनासंस्कारपरिक्षयाच्छुद्धपूर्णानन्दमयं ब्रह्मणस्तुरीयं रूपमनुगुण नाम । यदत्र नाम अन्वर्थं न किञ्चिदुपपद्यते, अतो व्याख्यातस्यावस्थात्रयस्य विश्रामभूतं सर्वान्तिरतमत्वेनानुस्यूतमिति चतुःसंख्यापूरणेन **तुर्यम्** इति पूरणप्रत्ययेन संख्याव्यपदेशोऽत्र कृतः । कथमवस्थात्रयस्यानुस्यूतमपि ततः परमेतदित्याह—"**ज्ञानघनत्वात्**" इति । यतो जाग्रदादयोऽवस्थाः सर्वा भेदप्रवणत्वात् प्रमातॄणामज्ञानमय्यः, तुरीयं ग्राह्यग्राहकक्षोभप्रलयसंस्कारपरिक्षयात् ज्ञानघनप्रकाशानन्दमूर्तिः, अतस्तदन्तस्थमपि ताभ्योऽवस्थाभ्यश्चिन्मयतया सुमुत्तीर्णत्वात्परमन्यदिति । एवमवस्थाविचित्रं परमाद्वयस्वभावं स्वतन्त्रं ब्रह्मैव पूर्णं विजृम्भते ।। ३५ ॥

(३५) सर्वभेदमयं स्थूलं जगत् परमेश्वरस्य जाग्रदवस्थारूपमस्ति । भेदप्रधानत्वादस्य संज्ञा विश्वमस्ति । अस्यामवस्थायां परमशिव एव प्रकाशते । इयमैश्वरीयलीलाया भेदप्रधानाया जाग्रदवस्था विश्वमित्यपि कथ्यते । जाग्रदवस्थायां जीवोऽपि विश्वमित्युच्यते । स्वप्नावस्था तु परमेश्वरस्य तेजोऽवस्थास्ति । सुषुप्तिकाले

जीवोऽपि सुषुप्तिरूपः कथ्यते । प्रकाशमहिमबलात्तस्य संज्ञा तैजस इति । सा सुषुप्त्यवस्था यस्यां स्वस्वरूपस्याहमिति सततोदितं ज्ञानं भवति ज्ञाघना इत्युच्यते । ज्ञानघनत्वादेव सा सुषुप्त्यवस्था प्राज्ञःज्ञानमयः इति वा कथ्यते ।

एवमपि शुद्धस्य परमात्मनः सर्वप्रमात्रनुस्यूतत्वेन स्थितत्वादवश्यं प्रमातृगणगतमख्यातिमालिन्यमायातीति यत्तन्नेति दृष्टान्तेनावेदयति —

जलधर-धूम-रजोभि-

मलिनीक्रियते यथा न गगनतलम् ।

तद्वन्मायाविकृतिभि-

रपरामृष्टः परः पुरुषः ॥ ३८ ॥

यथा मेघ-धूम-धूलिपुञ्जैः आकाशस्थैरप्याकाशपृष्ठममलिनं स्वभावतो न मलिनं विधीयते, नापि नित्यतावैतत्यखण्डनां वा नीयते, केवलं दर्पणप्रतिबिम्बवत्तदवस्थाविचित्रं गगनं गगनमेव, सर्वदा तथात्वेन प्रत्यभिज्ञानात् । **तद्वत्** इति तथैव **मायाविकृतिभिः** अख्यातिसमुत्थैर्विकारैर्नानाप्रमातृगतैर्जन्ममरणाद्यनेकविचित्रावस्थामयैर्भगवत्स्थैरपि भगवान् न **परामृष्टः** न तैरपहृतस्वरूपः, यतः स एव **परःपुरुषः** इति सर्वपुरुषाणां जीवानामाद्य उल्लासो विश्रातिस्थानञ्चेति सर्वानुभवितृतया सदा स्फुरतीति परशब्देन निर्दिष्टः ।

तस्मान्न स्वसमुत्थैरप्रकाशरूपैर्मायाविकारैः ऐन्द्रजालिकवद्भगवतः काचित्खण्डनेति परमेष्ठिना—अजडप्रमातृसिद्धावप्युक्तम्—

'यद्यप्यर्थस्थितिः प्राण-

पुर्यष्टकनियन्त्रिते ।

जीवे निरुद्धा तत्रापि

परमात्मनि सा स्थिता ॥

तदात्मनैव तस्य स्यात्

कथं प्राणेन यन्त्रणा ।'

इति ॥ ३६ ॥

(३६) **यथा जलधरधूमरजोभिः स्वभावनिर्मलं गगनतलं कदापि मलिनीकर्तुं न पार्यते तथा मायायाः कालकलादिभिस्त्रिगुणादिविकारैः परमपुरुषः परमेश्वरः शुद्धसंवित्स्वरूपः न लिप्तो भवति । अर्थात् स्वकीये स्वातन्त्र्यरूपे तांसतान् आकारान् प्रकटयन्नपि परमेश्वरः स्वयं शुद्धसंवित्स्वरूपे स्वात्मनि सदा निर्विकारोऽवतिष्ठते । एतदेव तस्य परिपूर्णं स्वातन्त्र्यम् ।**

नन्वेकचिन्मात्रपरमार्था अपि पुरुषा विशिष्टसुखदुःख-मोह-जन्म-मरणादिनानावस्थावैचित्र्यभाजश्चेति कथमेतदिति दृष्टान्तमाह—

एकस्मिन् घटगगने

रजसा व्याप्ते भवन्ति नान्यानि ।

मलिनानि तद्वदेते

जीवाः सुख दुःखभेदजुषः ॥ ३७ ॥

यथा **एकस्मिन्** कुम्भाकाशे धूलिपुञ्जसमाच्छादिते **नान्यानि** घटाकाशानि विमलान्यपि आकाशत्वाविशेषान्**मलिनानि** रजसा आच्छादितानि **भवन्ति** । विमलं व्यापकं नित्यमपि हि गगनं यादृशं घटसंकोचसंकुचितं भवेत्तादृशमेव तस्यैव घटस्य तद्भवति, न पुनः सर्वाणि घटपटाद्याकाशानि कृष्णागुरूधूपितानि, मृगमदाधिवासितानि विठिरगन्धीनि वा एकाकाशस्वरूपत्वात्संकीर्यन्ते, स्वगतघटादिकृतविच्छेदात्, प्रत्युत एकत्रापि गगने वास्तवे स्थिते घटादयः स्वगतभित्तिसङ्कोचनियन्त्रिताः सन्तो नानागगनवैचित्र्यं प्रथयन्ति ।

इत्थं घटकृतः सङ्कोच एव गगनतया तथावशिष्यते, तथात्वेनार्थक्रियाकारित्वात्; न पुनर्गगनस्यैतत्किंचित् घटगतं मालिन्यादि स्वरूपतिरोधानाय भवति, नापि परस्परं घटाद्यवच्छिन्नानां गगनानां व्यामिश्रणा—इति। तद्वत् इति तथैवामी जीवाः एकचिन्मात्रपरमार्था अपि पारमेश्वर्या मायाशक्त्या आणवमायीयप्राकृतकोशत्रयावेष्टनेन पूर्णं व्यापि चिदानन्दैकघनं स्वरूपमपहस्त्य परिमितीकृताः, येनैकचैतन्यात्मनोऽपि स्वगतकोशत्रयविच्छेददौरात्म्यात् परस्परं भिन्नाश्चेति घटपटाद्याकाशवत्। इत्थं मायीयकोशकृतो विच्छेद एव जीवतया व्यवह्रियते, न पुनः परमेश्वरेऽनवच्छिन्नचिदानन्दैकघने जीवाः पुरुषाः, आत्मानः अणवः इति दर्शनान्तरदृष्टः कश्चित् व्यवहारः। एवमाणवादिकोशावच्छिन्ना जीवा अनादिविचित्रकर्ममलवासनाधिवासितनानादेहाः नानाशया नानापुण्यपाप स्वर्गनरकसुखदुःखजन्म मरणादिद्वन्द्वभेद भाजश्च सन्तो नान्योन्यं सकीर्यन्ते, यथा नानाद्रव्याधिवासितानि घटाद्यवछिन्नानि-घटाकाशानीति सूपपन्नम्—एकचिन्मात्रपरमार्था अपि स्वविच्छेदादन्योन्यभेदजुषश्च – इति ॥ ३७ ॥

(३७) यथैकस्मिन् घटे वर्तमानं घटगगनं रजसाभिव्याप्तम् परघटस्थमाकाशस्वरूपं न मलिनीकर्तुं प्रभवति, तथैवैते सांसारिकाः जीवाः स्वस्वविभिन्नस्वभावाः केचन सुखिनः, केचन दुःखभाजः केचन विद्वांसः, केचन मूर्खाः केचन विरक्ताः केचन रजोगुणाश्च भवन्ति, इयं जीवभावरूपा माया भूमिका भेदरसा विभाति। अस्मिन् जीवभावे समस्ताः प्रणिनः संवित्स्वरूपाः सन्तोऽपि पारस्परिकेण भेदेन युक्ता अपि व्यवहरन्ति इत्थमसम्भवमपि सम्भवं कर्तुं समर्था परमेश्वरस्य माया कथ्यते।

इत्थं जीवमण्डलगता अवस्थाविशेषा ये, ते केवलं भगवति उपचर्यन्ते न पुनस्तत्त्वतस्तेऽत्र केचित् इत्याह—

शान्ते शान्त इवायं
हृष्टे हृष्टो विमोहवति मूढः।

तत्त्वगणे सति भगवान्

न पुनः परमार्थतः स तथा ॥ ३८ ॥

तत्त्वगणे इन्द्रियवर्गे **शान्ते** उपरते सति, तद्गतः परमात्मा **शान्तो** नष्ट इव अभिमन्यते, एवं तस्मिन् **हृष्टे** साह्लादे सति, स तथैवोपचर्यते, पर तमोमये मूढे मोहवानिति, यथा स्थावरयोनौ **न पुनः परमर्थतो** वस्तुवृत्तेन **स** परमेश्वरः **तथा** तेन प्रकारेण भवति । सर्वो हि जडभाग उत्पाद्यः संहार्यो वा भवति, न पुनर्नित्ये भगवति बोधस्वभावे मायादिकञ्चुकगते विनाशोत्पत्ती स्याताम् इति भगवान् सदा समः ॥ ३८ ॥

(३८) परमैश्वर्यवान् परमशिवः स्वयमेवानन्तेषु मायीयप्रपञ्चेषु आकारेषु प्रकल्पितो भवति प्रसन्नेषु प्रसन्न इव शान्तेषु शान्त इव, मूढेषु मूढ इव मुग्धेषु मुग्ध इव प्रतीयते, एवं जडतत्त्वेष्वपि तत्तदाकारप्रकारविशिष्टः इव शान्त-घोर-मूढजड़चेतन-निर्मल-समलादिषु स्वस्वरूपेषु स्वेच्छया तत्तद्रूपाणि धत्ते, न तु तेषु परिणतो भवति अपितु तेषु तेषु आकारेषु प्रतिबिम्बवच्चकास्ति । यथैको दर्पणो-विविधेषु नीलपीतचित्रादिषु आकारेषु परिस्फुरन् स्वदर्पणत्वं निर्मलत्वञ्च न जहाति तथैवैकोऽपि पूर्णस्व-तन्त्रः संवित्स्वरूपः परमेश्वरः पूरिपूर्णः व्यावहारिकया दृष्ट्या तत्तद्रूपेषु व्यवहरन्नपि न तथा भवति ।

समुत्पत्तिक्रमेणागता भ्रान्तिः पुनर्ज्ञप्तिक्रमेण सुतरां समुन्मूलिता भवति,—इत्यत्र स्वात्मन एव स्वातन्त्र्यमित्याह—

यदनात्मन्यपि तद्रूपा-

वभासन तत् पुरा निराकृत्य ।

आत्मन्यनात्मरूपां

भ्रान्तिं विदलयति परमात्मा ॥ ३९ ॥

अनात्मनि अचेतनलक्षणे देहादौ कृशः स्थूलश्चास्मि इत्यादि यत् तद्रूपावभासनम् अनात्मनि आत्मतया परामर्शनं तत् तस्मिन् पुरा आदावेव निराकृत्य अहं चिदानन्दैकघनोऽनवच्छिन्नस्वभावः स्वतन्त्रश्चेत्यकृत्रिमाहन्तास्फुरणया कृत्रिमदेहादिप्रमातृतामपहृत्यात्मैव विगलितदेहबन्धः परमात्मतां यातः सन्नात्मनि अस्मिन् स्फुरद्रूपे विश्वपदार्थे प्रकाशवपुषि स्वाङ्गकल्पेऽपि या भ्रान्तिः देहादिप्रमातृताभिमानजनिता भेदप्रथा तां विदलयति अहमेवैको विश्वात्मना स्फुरामीत्येवं चूर्णीकरोति । इदमत्र तात्पर्य्यम् यावदनात्मनि देहादावात्माभिमानो न गलितस्तावत्स्वात्मप्रथारूपेऽपि जगति भेदप्रथामोहो न विलीयते, अतश्चानात्मन्यात्माभिमानभ्रमविनाशादात्मन्यनात्माभिमानभ्रान्तिं परमात्मैव स्वात्ममहेश्वरो भगवानेव विनाशयति, नान्यस्यात्र सामर्थ्यम् ॥ ३९ ॥

(३९) यदा स्वानुग्रहलीलया परमेश्वरः जीवमुपकुर्वन् स्वशक्तिपातं करोति— तदा तस्य शास्त्ररुचिर्भवति, गुरुं प्रति श्रद्धा वर्धते, परमेश्वरं प्रति स्नेहस्योदयो जायते, ततो गुरुकृपया प्राप्ताभियोगप्रक्रियाभिरनुदिनमभ्यासाच्चेतः निर्मलतामुपैति, येन शाम्भवाद्युत्कृष्टैरुपायैः स्वस्वरूपस्य प्रत्यभिज्ञा जायते। वस्तुतो, मायाप्रभावाज्जीवः द्विविधेन विपर्यासेन युज्यते, एकेन विपर्यासेन जीवः स्वं शुद्धं स्वतन्त्रं संवित्स्वरूपं विस्मृत्य जडं शरीरं, बुद्धिं, प्राणञ्च स्वात्मानं मन्यते, द्वितीयेन विपर्यासेन प्रमेयं विश्वं आत्मनः सर्वथा भिन्नं जानाति । परमीश्वरस्यानुग्रहलीलया विगतविपर्यासः सन् स्वात्मानं परिपूर्णं परमेश्वरं मन्यते सर्वमिदञ्च स्वात्मरूपमेव जानाति ।

एवं भ्रान्तिद्वयापसारणात्परमेश्वरीभूतस्य योगिनो न किञ्चित्कार्यमवशिष्यते— इत्याह—

इत्थं विभ्रमयुगलक-
समूलविच्छेदने कृतार्थस्य ।
कर्तव्यान्तरकलना
न जातु परयोगिनो भवति ॥ ४० ॥

इत्थं कारिकार्थप्रतिपादितप्रकारेण भ्रान्तिद्वयस्य प्ररोहविदारणे कृतार्थस्य स्वस्वातन्त्र्यस्य परिज्ञप्तेरशेषसंकोचविदलनात् कृतः प्राप्तः अर्थः पुरुषार्थलाभो येन तस्य प्रकृष्टयोगयुक्तस्य न कदाचित् कर्तव्यान्तरस्य तीर्थाटन-क्षेत्रपरिग्रह-दीक्षा-जप-ध्यानव्याख्याश्रवणादिरूपस्य कार्यशेषस्य कलना मनोव्यापारोऽपि न विद्यते—

'अयमेव परो धर्मो
यद्योगेनात्मदर्शनम् ।'

इति हि स्वात्मयोगस्य प्राधान्यमतस्तत्प्राप्त्या नान्यत्र परिश्रमः पूर्णयोगिनः । यदुक्तम्—

'यदा ते मोहकलिलं
बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं
श्रोतव्यस्य श्रुतस्य च ॥' (२—५२)

इति गीतासु ॥ ४० ॥

(४०) इत्थं विपर्यासद्वयस्य समूलकनिरासाद् उत्कृष्टो योगी अनुभवति यन्मया करणीयमासीत्तत्कृतम् प्राप्तव्यं प्राप्तम्, अतः कृतकृत्योऽहम् । अधुना न किमपि कर्त्तव्यं प्राप्तव्यं वा अवशिष्यते ।

तथापि यत्किञ्चिदसौ करोति तन्न कर्त्तव्यबुद्धया करोति. अपितु स्वविलासतः केवलं विनोदायैव करोति । अथवा शिवप्रेरणया परोपकारायैव करोति । अत एव सिद्धाः शिष्येभ्यो दीक्षाः ददति ।

सम्प्रति पृथिव्यादिमायान्तस्य भेदावभासभाजो विश्वस्य भेदाभेदमय-शाक्तभूमिकावेशेन पूर्णप्रकाशानन्दघनशाम्भवपदसमापत्त्या भेदविलायनेन तद-भेदमयताप्राप्तिमभिधाय, ततः शाम्भवात् पदात् सम्पूर्णसुधाम्भोधिकल्पात् महाप्रवाहदेशीयशाक्तप्रसरोल्लासप्रमुख तत्तत्तरङ्गभङ्गिरूपतामभिदधत् स्वानु-भवसिद्धं महामन्त्रवीर्यसारं समस्तभेदविलायनपरमाद्वयोदयं नर-शक्ति-शिव-सामरस्यात्मकं परसविद्धृदयं क्रमेणोन्मीलयिष्यन् विश्वस्यागमिकाण्डत्रयात्मता-संकलनयुक्त्या एकीकारं तावदाह—

पृथिवी प्रकृतिर्माया
त्रितयमिदं वेद्यरूपतापतितम् ।
अद्वैतभावनबलाद्
भवति हि सन्मात्रपरिशेषम् ॥ ४१ ॥

पार्थिव-प्राकृत-मायीयाण्डात्मकं यत्स्थूलसूक्ष्म पररूपं त्रिविधं वेद्य-रूपतापतितम् ज्ञानगोचरतां प्राप्तम्—

'तत्तद्रूपतया ज्ञानं वहिरन्तः प्रकाशते ।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् ॥

नहि ज्ञानादृते भावाः केनचिद्विषयीकृताः ।
ज्ञानं तदात्मता यातमेतस्मादवसीयते ॥'

इति श्रीकालिकाक्रमोक्तन्यायेन यद् **अद्वैत भावनम्** तद्बलात्-तत्प्रकर्षात् **सन्मात्रपरिशेषम्** प्रकाशमानतात्मकसत्तामात्रकं भवति । हिः यस्मादर्थे ॥ ४१ ॥

(४१) **चतुर्षु पूर्वोक्तेष्वण्डेषु प्रथमं शाक्तमण्डमुच्यते, तदुत्तमे स्तरे अभेदभावात्मकतया प्रमातृस्वरूपमेव, भवति । अवशिष्ट-मण्डत्रयं प्रमेयकोटौपरिगण्यते । तेषु बाह्यतमं पार्थिवमण्डं स्थूलप्रमेयमुच्यते । प्राकृतमण्डं सूक्ष्मप्रमेयमुच्यते, मायीममण्डं सूक्ष्मतरप्रमेयमुच्यते । पृथ्वी, प्रकृतिर्माया चेत्यण्डत्रितयं वेद्यरूपतामापतितं, क्षीणे भ्रान्तौ योगी पूर्वोक्तेषु तत्त्वेषु अद्वैतभावनामभ्यस्यति । इत्थं पूर्वोक्तेन प्रकारेण योगी विसर्गमभ्यस्यति । एवं तर्कविमर्शाभ्यासेन शिवयोगी दृश्यमान प्रपञ्चात्पराद्वैतसिद्धान्तं साध्नोति ।**

एतदेव भेदस्यावास्तवत्वप्रतिपादनाभिप्रायेणोपपादयति—

रशनाकुण्डलकटकं
भेदत्यागेन दृश्यते यथा हेम ।
तद्वद्भेदत्यागे
सन्मात्रं सर्वमाभाति ॥ ४२ ॥

यथा किल सौवर्णं रशनाद्याभरणं सुवर्णार्थिनो रशनादिविशेषपरिहारेण हेममात्रतयैवाभाति, हेम-रजत-कांस्य-ताम्र-नागादि तावन्मात्रार्थिनो लोह-

रूपतया, तद्वत्सर्वम् इदं त्यक्तहानादानादिविकल्पकलङ्कस्याविकल्पप्रतिभास-मात्रनिष्ठस्य योगिनो

'रूपादिषु परिणामात् तत्सिद्धिः ।'

इति भट्टश्रीकल्लटोक्तनीत्या भेदत्यागे सति सन्मात्रं सत्तामात्रात्मकम् आभाति ॥ ४२ ॥

(४२) यथासुवर्णनिर्मितं रशनाकुण्डल-कटकादिकं भिन्नेन—२ आकारेण, युक्तमपि वस्तुतः सुवर्णमेव भवति, एवञ्चाग्नौ परितापेन तत्सर्वं स्वं स्वं रूपं विहायैकसुवर्णपिण्डरूपतां धत्ते—एवमुभयविधमपि (अलङ्काररूपमपि-सुवर्णपिण्डमय मपि) तत्सुवर्णत्वरूपं स्वं मूलं स्वभावं न जहाति, तथैव पृथिव्याद्यण्डत्रितयं, तत्रविद्यमानंचानन्तं वैचित्र्यमयं पदार्थजातं ज्ञानाग्नौ परिदग्धं सत् स्वं भिन्नं—२ स्वभावं स्वरूपञ्च परित्यज्य एकमात्रं स्वसत्तारूपमसीमं स्वतः सिद्धस्वभावं संविद्रूपं परमाद्वैतभावं सर्वत्राव-शिष्यते। जीवः सर्वत्र सर्वदा संविद्रूपमेव पश्यति नान्यत् ।

तदियतः सर्वस्य संकोचावभासपरित्यागादागमप्रसिद्धया नररूपस्य शाक्तरूपोपारोहं मन्त्रसम्प्रदायं कटाक्षयन्नभिदधाति—

तद्ब्रह्म परं शुद्धं
शान्तमभेदात्मकं समं सकलम् ।
अमृतं सत्यं शक्तौ
विश्राम्यति भास्वरूपायाम् ॥ ४३ ॥

तत् एतत्सत्तामात्रात्मकं सर्वं बृहत्वाद् ब्रह्म । यदाहुः श्रुत्यन्तविदः

'सदेवेदं सौम्य अग्र आसीत् ।'

इति पूर्णत्वात् **परम्** हेयोपादेयभावाच्छुद्ध पृथक्त्वोपशमात् **शान्तम्**—अतएव –**अभेदात्मकम्** प्रकर्षापकर्षाभावात् **समम्** ।

'प्रदेशोऽपि ब्रह्मणः सार्वरूप्यम-
नतिक्रान्तश्चाविकल्प्यश्च ।'

इति स्थित्वा **सकलम्**-अतएव-**अमृतम्** अविनाशि,

'सत्यासत्यौ तु यौ भागौ
प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिर
सत्या व्यक्तयः स्थिताः ॥'

इति ।

'यादौ च यदन्ते च यन्मध्ये तस्य सत्यता ।'

इति तत्रभवद्भर्तृहरिनिरूपितनीत्या **सत्यम्** तदेव सत्तामात्रात्मकमेतत्सर्वं **भास्वरूपायाम्** इच्छाज्ञानक्रियारूपशक्तिसामरस्यात्मिकायां परस्यां शक्तौ विश्राम्यति

संविन्निष्ठा विषयव्यवस्थितिः ।

इति स्थित्या तन्मयीभवति— इति ।

अथ च **शान्तम्** शकारस्यान्ते यन्मूर्धन्यरूपं ततः परं यद्-**अमृतम्**-अमृतबीजात्मकं ब्रह्म सन्मात्रात्मकं सादाख्यपदस्पर्शात् **शुद्धम्** अतएव **अहमिदं**-

सर्वम् इति सर्वसमरसीकरणात् **समं सकलञ्च** अतश्चाख्यातिगलनात् **सत्यम्।** यदादिष्टं भगवता—

तृतीयं ब्रह्मसुश्रोणि............... ....।

इति श्रीत्रिशकायाम् । तदिदममृतीभावावमृष्टं सदाशिवपदोपारूढमेतद्विश्वात्मकं **ब्रह्म** प्रागुक्तायां शक्तौ विश्राम्यति ॥ ४३ ॥

(४३) तन्मात्रं शुद्धं संवित्तस्वरूपं ब्रह्म अस्ति, ब्रह्मशब्दस्य द्वावर्थौ स्तः——एकोऽर्थःबृहत्— बृहत्वात्सर्वव्यापकत्वात्सर्वगतत्वादसीमत्वात् परिपूर्णत्वाच्च-सर्वं तदेवास्ति सर्वं संविद्रूपतया सर्वंव तस्मिन्नेव विराजते । द्वितीयोऽर्थः बृंहकः— बृंहितो वा । बृंहणं वृद्धिः । ब्रह्मैव विश्वमयताया विकासकोऽपि वर्तते, स्वयमपि च विकसितो भवति । यत्किञ्चिदस्ति तदेव ब्रह्म सर्वथा परिपूर्णम्, अविनाशि सततोदितम्, स्वभास्वरूपायां शक्तौ विश्रान्तञ्चास्ति ।

क्रियाज्ञानेच्छामुखेन परशक्तौ यन्न विश्राम्यति तन्न किंचित् इत्याह—

इष्यत इति वेद्यत इति

संपाद्यत इति च भास्वरूपेण ।

अपरामृष्टं यदपि तु

नभःप्रसूनत्वमभ्येति ।४४॥

यद्वस्तु वस्तुवृत्तेन बहिर्विद्यमानमपि तद्यदि इच्छाज्ञानक्रियामुखेन भास्वरेणैतच्छक्तित्रयसामरस्यात्मकपराशक्तिस्फारमयेन बोधेन **न परामृष्टं** तत् प्रख्योपाख्याविकलं गगन पुष्पतुल्यम् । अनेन च सद्वृत्यूर्ध्ववर्ति त्रिशूलात्मकवृत्तिवीर्यं सूचितम् ॥ ४४ ॥

(४४) शैवागम शास्त्रेषु परमेश्वरस्य परमेश्वरताया आधारशिला-रूपस्य प्रधानशक्तित्रयस्य इच्छाज्ञानक्रियास्वरूपस्य महत्त्वमुक्तं वर्तते । यत्किञ्चित्क्रियते ज्ञायते, सम्पाद्यते च तत्सर्वं यदि संवित्प्रकाशेनाकास्यत् तत्प्राणभूतेन विमर्शेन च तस्य विमर्शनं नाभविष्यत्तर्हि तत्सर्वमाकाशपुष्पमिव सर्वथासत्यमभविष्यत । अतः संविदः सर्वाधिकं महत्त्वमस्ति, इयमेव सर्वेभ्योऽधिका महिमावती, इच्छाज्ञानक्रियाणामाधारशिलाप्यस्ति ।

एतच्छाक्तपदावेशमस्यानुवदन् शांभवपदसमापत्त्या तन्मयीभावमाविर्भावयति—

शक्तित्रिशूलपरिगम-
योगेन समस्तमपि परमेशे ।
शिवनामनि परमार्थे
विसृज्यते देवदेवेन ॥ ४५ ॥

तदित्थं **समस्तमपि** एतत्सत्तामात्ररूपत्वात् प्रोक्तब्रह्मपरमार्थं **शक्तित्रिशूलपरिगमयोगेन** निर्णीतयुक्त्या पराशक्तिसमापत्तिक्रमेण **शिवनामनि परमार्थे** अनवच्छिन्नचिदानन्दैकघने परमेश्वरे स्वस्मिन्स्वभावे **विसृज्यते** अन्तर्मुखविमर्शनप्रकर्षात् तत्समावेशेन तन्मयीभावमापाद्यते, **देवानां**, ब्रह्मादिसदाशिवान्तानांसर्वप्रकाशानामिन्द्रियाणाञ्च **देवेन** प्रभुणा परमशिवेनैव, न ह्यत्रान्यस्य कस्यचित्कर्तृत्वं घटते, नाप्येतद्व्यतिरिक्तोऽन्यः कश्चित् प्रमातास्ति, अस्यैव च भगवतस्तत्तद्भूमिकाधिरोहिणस्तत्तद्रुद्रक्षेत्रज्ञादिप्रमातृरूपतया स्फुरणमिति 'देवदेवेन' इति युक्तैवोक्तिः । तदित्थं विसर्गवृत्तिर्दर्शिता ॥ ४५ ॥

(४५) इच्छाज्ञानक्रियास्वरूपेण शक्तित्रितयत्रिशूलेन परिगतः परमशिवः स्वांरमेश्वरतमभिव्यञ्जयन् स्फुटभेदस्या-

भासेन युक्ताया भेदाभेदमय्याः शुद्धविद्याया भूमिकाया-
मवतीर्य ईश्वरभट्टारकरूपेण प्रकाशते । स च स्वां लीलां
प्रचालयितुं निम्नस्तरेष्ववताररूपतयावतरन् मायातत्त्वे
अनन्तनाथरूपेण, प्रकृतितत्वे च श्रीकण्ठनाथरूपेणउमा-
पतिनाथरूपेण च प्रकटीभवति । आनन्दप्रधानताया
विचारेण परमशिवः शिवः कथ्यते । इच्छाप्रधानतायाश्च
विचारेणासौ शक्तिरपि कथ्यते असौ क्रीडनशीलेषु सर्वेष्व-
धिकतमः क्रीडनशीलः-अत एवासौ देवदेवः प्रोच्यते
सृष्ट्यादिपंचकृत्यानां क्रीडास्तस्य स्वभाव एवास्ति, तदेव
च तस्य परमेश्वरत्वम् ।

एवमियता भेदात्मनो नररूपस्य जगतो भेदाभेदात्मकशाक्तपदाध्यारोहेणाभिन्नचिद्घनशिवसामरस्यापत्तिमुपसंहारदशा प्रदर्श्येदानीं चिदेकघनः शिव एव शक्तिरूपतयोल्लास्य नरात्मकविश्वरूपतया स्फुरति, न तु शिवव्यतिरिक्तं शक्तिनरयोः किमपि रूपं, शिव एव त्वित्थं निजरसाश्यानतया स्फुरति—इति प्रसरयुक्ति महामन्त्रस्फारमयीं दर्शयति —

पुनरपि च पञ्चशक्ति-
प्रसरणक्रमेण बहिरपि तत् ।
अण्डत्रयं विचित्रं
सृष्टं बहिरात्मलाभेन ॥ ४६ ॥

चिदानन्देच्छाज्ञानक्रियाख्यशक्तिपञ्चकसामरस्यात्मा यः परमशिवस्तेन चिदादिशक्तिप्राधान्यप्रथनात्मकशिव—शक्ति-सदाशिवेश्वरशुद्धविद्याख्य-भूमिकोन्मीलनयुक्त्या **'तदण्डत्रयं विचित्रम्'** इति तत्तद्भुवनादिरूपं **सृष्टं बहिरात्मलाभेन** इति बाह्याभासात्मतया स्वात्मनः प्रदर्शनेन **पुनरपि** इत्यनेनैतद्दर्शयति यत्परमशिव एव स्वतन्त्रः सदा स्वभित्तौ विश्वप्रपञ्चोल्लासनविलातनक्रीडां स्वा-

त्मानतिरिक्तामपि रिक्तामिवादर्शयन् एवमित्थं स्थितो, न तु तद्व्यतिरिक्तं किमप्यस्ति इति ॥ ४६ ॥

(४६) यथा कोऽपि कलाकारः स्वतोऽभिन्नामपि स्वात्मनि वर्तमानां कलां बहिः प्रकाशितां कृत्वा एव तस्याः पूर्णमानन्दमनुभवति, एवं सत्येवासौ कलाकारः स्वात्मानं कृतकृत्यं मन्यते, तथैव परमेश्वरोऽपि स्वात्मन्यभेदेन वर्तमानायाः परमेश्वरतायाः पूर्णं चमत्कारमास्वादयितुं तां बहिः-प्रकटयित्वा साक्षात्कृत्वा च सन्तुष्टः सन् कृतकृत्यो जायते। अतः चिदानन्देच्छाज्ञानक्रियाख्यशक्तिपञ्चकसामरस्य-रूपो यः स्वतन्त्रः परमशिव सः पूर्वोक्तप्राधान्यप्रथनात्मक शिव-शक्ति सदाशिवेश्वरशुद्धविद्याख्यभूमिकोन्मीलनयुक्त्या विचित्रं तदण्डत्रयं तत्तद्भुवनादिरूप स्वपरमेश्वरतायाः परिपूर्णं चमत्कारमास्वादयितुं एकरसस्थोप्युद्भावयते।

इत्थं विश्वोल्लासनविलायनक्रीडाशीलो भगवान् यः शिवः इति व्यपदिश्यते स कतमः कुत्र तिष्ठति, कतमेन वा प्रमाणेन प्रसिद्धः ? इत्याशङ्क्य सर्वेषां स्वात्मैव शिवः सर्वत्रादिसिद्धतया स्फुरन् सर्गादीन् विदधाति इत्यस्मच्छब्दवाचकैः शब्दैः प्रतिपादयति —

इति शक्तिचक्रयन्त्रं
क्रीडायोगेन वाहयन्देवः।
अहमेव शुद्धरूपः
शक्तिमहाचक्रनायकपदस्थः।
मय्येव भाति विश्वं
दर्पण इव निर्मले घटादीनि।

मत्तः प्रसरति सर्वं
स्वप्नविचित्रत्वमिव सुप्तात् ॥ ४८ ॥

अहमेव विश्वरूपः
करचरणादिस्वभाव इव देहः ।
सर्वस्मिन्नहमेव
स्फुरामि भावेषु भास्वरूपमिव ॥ ४९ ॥

द्रष्टा श्रोता घ्राता
देहेन्द्रियवर्जितोऽप्यकर्तापि ।
सिद्धान्तागमतर्कां-
श्चित्रानहमेव रचयामि ॥ ५० ॥

इति व्याख्यातेन प्रकारेण चिदादिशक्तिपञ्चकाक्षिप्तोऽनन्तो यः शक्तिसमूहस्तदेव **यन्त्रम्** क्रीडायोगेनवाहयन् अरघट्टघटीयन्त्रन्यायेन सृष्ट्या-द्युन्मज्जननिमज्जन-हेलामात्रेण विपरिवर्तयन्नहमेवेति– **देवः** सर्वप्राणिनाम् **अहम्** इत्यनाहतो नादात्मा पराहन्ताचमत्कारसारः स्वात्मपरामर्शः स एव सर्वस्यानपह्नवनीयोऽयं **स्वात्मैव देवः** क्रीडनशीलः स्फुरतीति । अनेन स्वस्वरूपनिष्ठ एव शिवः इति प्रतिपादितम् । तथा शुद्धरूपः इति, कल्पनाति-क्रान्तगोचरः । अन्यच्च **शक्तीनां** करणदेवतानां विषयाहरणत्यागादि-व्यवहारस्वातन्त्र्यदातृ यत् **महाचक्रनायकपदम्** तत्र तिष्ठति **तत्स्थः** । यतः करणशक्तीनां चैतन्यविश्रान्तिं विना स्वरूपसत्ता न विद्यते, अतः शक्तिमन्त-मेव स्वरूपासादनायानवरतं भजन्ते-- इत्यनेन सर्वप्रमातृहृदयाधिष्ठातृत्वाद्भ-गवतो नियतभुवनाधिष्ठातृत्व परिहृतम् । तथा यदिद किञ्चिद् विश्वतया-भिमत तत्सर्वमादर्शप्रतिबिम्बन्यायेन **मय्येवभाति** व्याख्यातरूपारमदर्थ विश्रान्त-मेवावभासते, अहन्तासारमेव स्फुरतीति यावत् । तथा **मत्तः** इति पूर्णाद-हमितिरूपात्स्वात्मनः सकलं निःशेषमिदं विश्वं **प्रसरति** प्रमात्रपेक्षयापहृ-ततया स्फुरति । कथम् ? इत्याह **स्वप्नविचित्रत्वमिव सुप्तात्** इति यथा-

निद्रितात्प्रमातुः स्वप्नावस्थायां बाह्यपदार्थाभावेऽपि पुर-प्रकारदेवगृहादि नानाश्चर्यं स्वप्नपदार्थवैचित्यमविद्यादि परिकल्पितकारणान्तराभावात्स्व-संविदुपादानमेव प्रसरति, तथैव तीर्थान्तरनियमितकारणान्तरानुपपत्तेरनव-च्छिन्नचिदानन्दैकघनादहमिति रूपाद्विश्वमिति । तथा **अहमेव विश्वरूपः** इत्यादि । अहमित्येव यः पूर्णश्चैतन्यपरामर्शः, एष एवास्मि नानादेहादि-प्रमातृतासमापन्नो विश्वरूपः, आ-गोपालबालाङ्गनादिष्वान्तरभेदेन स्फुरणा-द्विश्वानि ममैव रूपाणीति यावत् । क इव करचरणादिस्वभावो देह इव, यथा सामान्येन सर्वेषामेको देहः करचरणादिस्वभावः प्रतिप्रमातृ स्वालक्षण्येन नानारूपस्तथैवैकश्चैतन्यलक्षणः पदार्थः सर्वावासत्वाद्विश्वरूपः इति । **तथा सर्वस्मिन्** प्रमातृप्रमाणप्रमेयरूपेऽस्मिन् **अहमेव स्फुरामि** सर्वस्यस्वात्मानुभवितृत्वेन प्रकाशनात् । कथम् ? **भावेषु भास्वरूपमिवेति,** यथा नानावस्तुषु **भास्वरूपम्** अतिशयेन द्योतनलील वस्तु देदीप्यते. तथैव जडेऽस्मिन् जगत्येकश्चिद्रूपोऽहमिति । अतश्च **द्रष्टा** इत्यादि **देहेन्द्रियवर्जितो**ऽपि चिन्मूर्तत्वादहमेव पश्यामि शृणोमि, जिघ्रामि, रसयामि, स्पृशामीति सर्वत्र पूर्णाहन्ताविश्रान्तेः कृतकृत्यता । देहेन्द्रियवर्गोहि पश्यामीत्यादि मन्यते, परं स्वापाद्यवस्थासु द्रष्टृत्वाद्यभावात् तस्माद्देहेन्द्रियादिवर्गसमुल्लासकस्तद्वर्जितोऽपि चिदानन्दैकघनः सर्वभूतहृदयान्तरचारी विषयोपभोगभोक्ता अस्मच्छब्दवाच्यः परः पुरुष एव । तथा च श्रुतिः

'अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता
तमाहुरग्र्यं पुरुषं महान्तम् ॥' (श्वे उ० ३ । १९)

इति । तथा अकर्तापि सिद्धान्तागम – इत्यादि स्वयमविधातापि देव-मुनि-मनुष्याद्याशयाविष्टः संक्षेपविस्तारविवक्षया अन्तःप्रतिभास्वरूपोऽहं सिद्धान्तादीन् नानाश्चर्यान् करोमि, न पुनर्जडानां लोष्टस्थानीयानां देहेन्द्रियाणां तत्करणं शक्यमिति तत्तद्व्यवधानेनाहमेव सर्वप्रमाणनिर्मातेति । अनेन पराहन्तास्वरूपस्य

स्वात्ममहेश्वरस्य सत्तायां न प्रमाणोपयोग उपपद्यते उपयुज्यते वेत्युक्त स्यात् । एवमनपह्नवनीय: अहम् इत्येवमनुभवितृतया सर्वेषां स्वात्मैव शिव: सर्वत्रावस्थित: सर्वप्रमाणेष्वादिसिद्ध: इति ॥ ४७ | ४८ | ४९ | ५० ॥

(४७) चिदादिपञ्चकाक्षिप्तोऽनन्तो य: शक्तिसमूह: तदेव शक्तिचक्रमुच्यते, तेन चक्रेण शुद्धसंवित्स्वरूप: परमशिव: समस्तविश्वमयव्यवहारान् चालयति । परमेश्वर: अनन्तशक्तिचक्रनिर्मितस्य, विश्वयन्त्रस्य सर्वथा सर्वदा सततप्रचालनादहमेव देवानां देव: शुद्धसंवित्स्वरूप: । सर्वस्य जगत: समस्त शक्ति समूहस्य सञ्चालकोऽहमेवास्मीति न मत्त: पृथक् किञ्चिदस्तीति मन्यते ।

(४८) परमेश्वरस्य विश्वाधारता, विश्वकर्तृता च तस्मिन्नेवावभासते । शुद्धे परिपूर्णे संवित्स्वरूपे तस्मिन् सकलं जगत् तस्यैव चेतनाया: प्रकाशेन प्रकाशते । यथा निर्मले दर्पणे घटादय: बाह्यपदार्था: प्रतिबिम्बरूपेण प्रकटिता: भवन्ति तथैव मदीये शुद्धे संवित्स्वरूपे ऽकाशे समस्तं ब्रह्माण्डजातमनन्तेन सृष्टिसंहारादिरूपेण विचित्रेण प्रकारेणानुक्षणं प्रकटितं भवति । यथा च सुप्तस्य मानवस्य स्वप्नसंसारस्य सृष्टि: तस्य स्वसंस्कारैर्भवति तथैवचेदं समस्तं जगन्मत: प्रसरति । अतोऽहमेव तेषु तेषु विचित्ररूपेषु प्रमेयाकारतया प्रकटितो भवामि विश्वाधारता विश्वकर्तृता च मय्येवावभासते न तु मत्त: पृथक् ।

(४९) शुद्धोऽसीम: परिपूर्णसंवित्स्वरूपोऽहमेवास्मि । मय्येव सर्वमस्ति, अहमेव च तेषु तेषु स्वरूपेषु प्रकटितो भवामि । यथैकस्यैव शरीरस्याङ्गभूता:—करचरणादय: स्वरूपता:, आकारत: कर्मतश्च भिन्ना अपि शरीरत्वेन एकमेवशरीरमुद्घोष्यन्ते, तथैवेदं समस्तं जगन्मदीयेनैवानन्तेनाकारेण

प्रकारेण च विभिन्नमपि मत्तो न पृथग्वर्तते । यथा च कस्मिन् प्राभाकरे प्रकाशे घडपटादिकं, नीलपीतादिकं च प्रकाशते तत्तस्मिन्नेव च भास्वरूपेण भान्ति, न तु ततः पृथक्, एवमेव सर्वमेव सदा निर्विकारे संवित्प्रकाशस्वरूपे प्रकाशते । अर्थात् सर्वत्र सर्वमहमेवास्मि, सर्वेषु रूपेषु च प्रकटितो भवामि ।

(५०) शरीरेन्द्रियविषयादीनां पदार्थानामुद्भवो लयश्च दृग्गोचरो-भवति, तत एते न परमार्थतया सत्यभूताः । परं न तथा वास्तविकं सत्यं शुद्धं पारमेश्वरं संविद्रूपंमस्ति, तत् स्व-माहात्म्यात् श्रोत्रादिष्वपि वर्तमानं द्रष्टृश्रोतृ-त्वतृरूपेण पश्य-त्शृण्वद्जिघ्रदपि स्वस्वरूपमपरिहर त्सर्वदाऽलिप्तमवतिष्ठते, एवमकर्ता-अप्यसौ प्राणिभिः क्रियमाणेषु तेषु तेषु कर्मस्वनु-लिप्यते इव । एतेन तस्य सर्वत्र सर्वदा सत्यसंविद्रूपस्य सर्वकर्तृत्व सामर्थ्यस्य माहात्म्यं न हीयते । एषा ईशस्य पूर्ण-कतृता – आपेक्षिकायाः कर्तृतायाः, अपेक्षिकायाश्चाकर्तृता-याश्च मूलकारणरूपास्ति ।

तदेवं व्याख्यातेन क्रमेण भवों समायं विभवः इति दार्ढ्येन स्वात्मानं प्रत्यवमृशन् परब्रह्मस्वरूपो योगी भवतीत्याह—

इत्थं द्वैतविकल्पे
गलिते प्रविलङ्घ्य मोहनीं मायाम् ।
सलिले सलिलं क्षीरे
क्षीरमिव ब्रह्मणि लयी स्यात् ॥ ५१॥

अनेन प्रकारेण सर्वाहंभावपरिशीलनयुक्त्या द्वैतविकल्पे गलिते भेद-प्रथायां विलीनायां मोहनीं मायां प्रविलङ्घ्य अनात्मन्यात्माभिमानरूपाम-

ख्यातिं भेदप्रथाहेतुम् अहमेव विश्वात्मा इति संकोचापसरणेन समुत्सृज्य ज्ञानी ब्रह्मणि बृंहणात्मके पूर्णे चिदानन्दैकघने स्वरूपे लयी स्यात् संकोचविलयाद् ब्रह्मतादात्म्यं यायात् । किं यथा ? इत्याह—सलिले इत्यादि। यथा सलिलम् उद्धृतं नानाघटादिभिर्जलं क्षीरं वा विविधशाबलेयबाहुलेयाद्यनेक गोसहस्रसंभिन्नं पुनरपि घटशावलेयादिकृतभेदसंकोचपरिक्षयात् सलिले सलिलं प्रविष्टम् क्षीरे क्षीरं वेत्येकमेव तद्वस्तु, न तत्र भेदःस्फुरति, तथैव देहप्राणपुर्यष्टकं शून्यात्मकप्रत्ययवमर्शभङ्गाद् ब्रह्मैव संपद्यते । यथाह भट्टदिवाकरवत्सः—

'जाते देहप्रत्ययद्वीपभङ्गे
प्राप्तैकध्ये निर्मले बोधसिन्धौ ।
अव्यावर्त्यं त्विन्द्रियग्राममन्त-
विश्वात्मा त्वं नित्य एकोऽवभासि ॥'

इति कक्ष्यास्तोत्रे ॥ ५१ ॥

(५१) साधकस्यात्मसाक्षात्कारे सञ्जाते सति द्वैतविकल्पो विगलितो भवति, मोहिनी माया च समुल्लङ्घ्यते, तथा सति साधकः क्षीरे क्षीरमिव, सलिले सलिलमिव च अभेददृष्ट्या परिपूर्णे संवित्स्वरूपे ब्रह्मणि लीयते । अर्थात् सर्वथा एकमात्रमपरिमितं शुद्धं संवित्स्वरूपमेव प्रकाशते, अन्यत्सर्वं नामरूपविकल्पादिकं परिपूर्णे संवित्स्वरूपे विलीनं भवति ।

एवं ब्रह्मसत्तामधिरूढस्य योगिनो द्वन्द्वाभिभवोऽपि ब्रह्ममय एव न स्वरूपविप्रलोपाय प्रगल्भते—इत्याह—

इत्थं तत्त्वसमूहे
भावनया शिवमयत्वमभियाते ।
कः शोकः को मोहः
सर्वं ब्रह्मावलोकयतः ॥ ५२ ॥

एवं निर्णीतिन प्रकारेण गलितकञ्चुकबन्धस्य योगिनः **तत्त्वसमूहे** भूत-विषयेन्द्रियव्राते **भावनया** सर्वमिदमेका स्वसंविदिति दृढप्रतिपत्त्या **शिवमयत्वं** प्राप्ते परमाद्वयरूपतां याते शोकमोहोपलक्षिता द्वन्द्वाभिभवाः **सर्वम्** इद तत्त्वव्रात **ब्रह्म** पश्यतोऽस्य न केचनैव ते ब्रह्ममयत्वात्सर्वे स्वरूपरूपा—इति न खेदाय प्रभवन्ति ॥ ५२ ॥

(५२) आत्मतत्त्वस्य साक्षात्कारं कृत्वा साधकः स्वपरिपूर्णपरमेश्वरतायाश्चमत्कारमास्वादयितुं भावनाख्यस्य योगस्य पौनःपुन्येनाभ्यासं करोति, शैवदर्शनानुसारेण तस्य संज्ञा भावनायोगः, शाक्तोपायो वा ।

ननु परमाद्वयरूपस्यापि ज्ञानिनोऽवश्यं स्थिते शरीरेऽपि तद्धेतुकशुभाशुभकर्मफलसञ्चयः किमिति न स्यात् ? इति परिहरति

कर्मफलं शुभमशुभं

मिथ्याज्ञानेन संगमादेव ।

विषमो हि सङ्गदोष-

स्तस्करयोगोऽप्यतस्करस्येव ॥ ५३ ॥

अश्वमेध-ब्रह्महननादिरूपपुण्यापुण्यकर्मफलप्रचयसंचयोऽपि **मिथ्याज्ञानेन संगमादेव** प्रादुर्भवतिअहं शरीरीदमश्वमेधादि मम-उपायतयास्तु—इति यदनात्मन्यात्माभिमानपूर्वमात्मन्यनात्माभिमानलक्षणं वैपरीत्येन ज्ञानं, तेन योऽभिष्वङ्गस्तस्मादेव पशोः शुभाशुभकर्मफलसंचयो येनानवरताधिवासितः संसारक्लेशभाजनं भवति । ननु ब्रह्मात्मकस्यापि प्रमातुः किमित्येतावता पशुत्वमायाति ? इत्यत्रार्थान्तरमुपक्षिपति—**विषमो हि** इत्यादि । यस्मात् **सङ्गदोषः** सर्वथाऽविषह्यः यथा असाधुयोगोऽत्यन्तसाधोरपि स्वगतदोषसमर्पणं कुरुते, तथैव शुद्धस्यापि प्रमातुः अख्यातिजनितो मोहयोगः पशुत्वमापाद्य शुभाशुभकर्मसम्बन्धं ददाति ॥ ५३ ॥

(५३) परमेश्वरः स्वीयया पिधानकृत्यलीलया-निग्रहलीलया वा-स्वां संवित्स्वरूपतामच्छाद्य शरीरमेव स्वात्मतया मन्यमानः जीवदशामासाद्य प्रकटितो भवति । जगति यत्किञ्चिज्जातं जायते भविष्यति, च तस्य सर्वस्य क्रियाकलापस्येश्वर एवैको विश्वकर्तास्ति । तेन स्वसृटौ जीवेषु संकुचितकर्तृत्वाभिमानरूपमज्ञानमप्युत्पादितं वर्तते । अत एव जीवो-मिथ्याज्ञानसङ्गमात् तत्कार्यं स्वकृतिरूपं मत्वा संगदोषस्य प्राबल्यात् तस्य शुभाशुभकर्मफलभाग् भवति तथा च लोक-व्यवहारानुसारेण तस्करेण सह मित्रत्वमुपागतः सज्जनोऽपि दण्डमधिगच्छति ।

जन्ममरणाद्यपि न ब्रह्मस्वरूपस्य योगिनः, अपितु मायाप्रमातॄणा-मेव—इत्याह—

लोकव्यवहारकृतां
य इहाविद्यामुपासते मूढाः ।
ते यान्ति जन्ममृत्यू
धर्माधर्मार्गलाबद्धाः ॥ ५४ ॥

ये प्रमातारो देहात्ममानिनो भूत्वा फलकामनाकलुषिता लोकाचाररूपां पुण्यापुण्यमयीम् अविद्याम् भेदप्रथारूपां मायां जगति स्वर्गनरकादिफलप्राप्त्युपायत्वेन सेवन्ते ते मूढाः आज्ञाः पुण्यापुण्यनिगडबद्धास्तत्फलोपभोगाय पुनः पुनः जायन्ते म्रियन्ते च—इत्यनवरतसंसारक्लेशभाजो भवन्ति, न पुनः प्रक्षीणमोहावरणो विगलितधर्माधर्मबन्धो ब्रह्मस्वभावो योगी जायते म्रियते वेति ॥ ५४ ॥

(५४) अज्ञो जीवो धर्माधर्मादिलोकव्यवहाररूपिणीं मायामुपास्य व्यवहरन् जन्ममृत्युरूपे संसारचक्रे चङ्क्रमते । तदित्थं

मिथ्याज्ञानेन कर्मबन्धनं भवति, तदभावेन तदभावो भवति इत्थं "सतिमिथ्याज्ञाने कर्मबन्धनं भवति मिथ्याज्ञानाभावे कर्मबन्धनफलाभावो भवति," एतेन मिथ्याज्ञान-कर्मफलयोरन्वयव्यतिरेकसिद्धिर्भवति ।

एवमविद्योपार्जितान्यपि कर्माणि ज्ञानाविर्भावादेव क्षीयन्ते नान्यथे-त्याह—

अज्ञानकालनिचितं
धर्माधर्मात्मकं तु कर्मापि ।
चिरसंचितमिव तूलं
नश्यति विज्ञानदीप्तिवशात् ॥ ५५ ॥

अज्ञानकाले कृत्रिमप्रमातृताभिमानावसरे पुण्यापुण्यरूपं कर्म अनुगुणफलप्रार्थनया यत् निचितं स्वीकृतं, तद् विज्ञानदीप्तिवशाद् विशिष्ट ज्ञानदीप्तिवशाद् नश्यति अहमेव परं ब्रह्म इति कृत्रिमप्रमातृतादाहसमर्थं विज्ञानं, तस्य या पौनः पुन्येन प्रत्यवमर्शनात्-प्रभा, तत्सामर्थ्यात्तिरदर्शनं याति । किमिव ? इत्याह चिरसञ्चितं तूलमिव यथा चिरसञ्चितं तूलं हंसरोम वन्हिप्रदीप्तिवशाज्झटित्येव भस्मसाद्याति, तथैव सर्वः कर्मफलप्रचयो विज्ञानवन्हिसामर्थ्यात्क्षणमध्ये प्रलयमुपगच्छतीति । गीतासु—

यथैधांसि समिद्धो-
ऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि
भस्मसात्कुरुते तथा ॥

इति ॥ ५५ ॥

(५५) कस्यचित्तत्त्वस्य बुद्धौ समावेशस्तस्य ज्ञानं भवति । प्रयोगे

स्तस्य ज्ञानस्य साक्षादनुभवो विज्ञानपदवाच्यो भवति । विज्ञान-रूपेणैव-ज्ञानं सफलं परिपूर्णञ्च भवति । आत्मसाक्षात्कार-रूपेण ज्ञानेनज्ञानात्मकं पूर्वसंचितं सर्वं कर्म तथा नाश-मेति यथा चिरसंचित: तूलराशि: – आग्नेय संयोग समकालमेव कथाशेषतां याति । अत: आत्मविज्ञानाग्नि: समस्तं सञ्चितं कर्म तत्क्षणं समूलमुन्मूलयति ।

न केवलं प्राक्कृतं कर्म ज्ञानप्रसादादुपलीयते, यावदिदानीन्तनमपि कर्म ज्ञानेद्धया दृष्टया न फलोपभोगाय पर्यवस्यति — इत्याह —

ज्ञानप्राप्तौ कृतमपि

न फलाय ततोऽस्य जन्म कथम् ।

गतजन्मबन्धयोगो

भाति शिवार्क: स्वदीधितिभि: । ५६ ।

आत्ममहेश्वरप्रत्यवमर्शप्ररूढौ कृतमपि शुभाशुभादिकं कर्म कृत्रिम-प्रमातृताभिमानाभावान्नानुगुणफलदानाय प्रगल्भते — इति कर्मफलाभावात्तदुप-भोगभोग्यस्य जन्मन: केन प्रकारेण सत्ता स्यान्न भवेद्योगिन: पुनर्जन्म — इत्यर्थ: । ननु स पिण्डपातात्पुनर्न जायते चेत्तर्हि कीदृश: स्यात् ? इत्याह गतजन्म इत्यादि । गतो जन्मरूपस्य बन्धस्य योग: सम्बन्धो यस्य स एवमिति, प्रक्षीणमोहावरण: स्वदीधितिभि: चिन्मरीचिनिचयै: स शिवरूपोऽर्को भाति स्फुरति, न पुनस्तीर्थान्तरपरिकल्पितोऽस्य मोक्ष:,–कुत्रचित् प्राप्ति-रिति केवलं मायादिकञ्चुककृतसंकोचविनाशात् स्वशक्तिविकस्वरता-मापद्यते — इति । ५६ ॥

(५६) आत्मज्ञाने यथार्थतया जाते मिथ्याज्ञानं नश्यति, यतोहि कर्म-बन्धनस्य कारणं मिथ्याज्ञानमस्ति, अतस्तस्य नाशे कर्म-बन्धनस्य कारणमेव नावशिष्यते । तथा सति कदाचित् कृत-मपि धर्माधर्मरूपं कर्म न फलप्रदाने समर्थं भवति यदा

कर्मफलनाशो भवति, तदा जन्मकारणमेव नावशिष्यते, अस्यामवस्थायां जीवन्नपि जीवन्मुक्त इवावतिष्ठते। तथा— जीव: प्रारब्धकर्मणि समाप्ते सति शरीरत्यागानन्तरं शिवभावमापन्नाः सन् शुद्धं परिपूर्णं संवित्स्वरूपं कलयते यथा मेघैरपरिच्छिन्नः सूर्यः स्वयं स्वप्रकाशेन प्रकाशमानः स्वीये वास्तविके रूपे विराजते।

अत्रैव युक्तिमाह—

तुष-कम्बुक-किंशारुक-

मुक्तं बीजं यथाङ्कुरं कुरुते।

नैव तथाणवमाया-

कर्मविमुक्तो भवाङ्कुरं ह्यात्मा॥ ५७॥

यथा किंशारुकतुषकम्बुकेभ्यः पृथक्कृतं शालिबीज बीजस्वभावकिंशारुकादिसामग्र्यभावात् क्षितिजलातपमध्यवर्त्यपि नैव अङ्कुरजननलक्षणकार्ये हेतुर्भवति तथैव कम्बुकस्थानीयेन आणवेन मलेन तुषस्थानीयेन मायामलेन किंशारुकस्थानीयेन कार्ममलेन च मुक्तः पृथग्भूतः—आत्मा चैतन्यं मलत्रयरूपसाग्र्यभावान्न पुनः भवाङ्कुरं संसारप्ररोहं विदधाति, केवलं विश्वगतनानापदार्थसार्थप्रादुर्भावविनाशवैचित्र्यं स्वात्मनि परामृशन् महेश्वर एव भवति॥ ५७॥

(५७) यथा धान्यबीजं तुषकम्बुकंकिशारुकरूपेण आवरणत्रिकेण हीनं न पुनरङ्कुरतां याति तथा आणवमलैः, मायीयमलैः, कार्ममलैश्च परिमुक्तो जीवः न पुनर्भवाय कल्पते। अर्थात् मलत्रयपरिमुक्तो ज्ञानविज्ञान—निपुणो जीवः जन्ममरणकारणशून्यो भवति।

एवं ज्ञानाग्निदग्धकञ्चुकबीजस्य ज्ञानिनो न किञ्चिच्छङ्कास्थानं हेयोपदेयं वेत्यत आह—

आत्मज्ञो न कुतश्चन
विभेति सर्वं हि तस्य निजरूपम् ।
नैव च शोचति यस्मात्
परमार्थे नाशिता नास्ति ॥ ५८ ॥

यः आत्मज्ञः स्वात्ममहेश्वरस्वातन्त्र्यवित् स न कुतश्चन बिभेति न स कस्मादपि राज्ञः शत्रोः, प्राणिभ्यो वा भयमादत्ते । कुत एतत् ? इत्याह सर्वं हि तस्य निजरूपम् इति, यतः तस्य स्वात्ममहेश्वराद्वयवेदिनः सर्वं पदार्थजातमिदं विश्वं निजस्य स्वात्मनो महाप्रकाशैकवपुष एव रूपम् आकारः, सर्वत्र प्रकाशानुगमात्—इति प्रकाश एव स्वातंत्र्यात्स्वपरात्मना प्रकाशते, अत एव भयस्थानं लोके यत्किञ्चित्प्रतिभाति तत्तस्य तथैव स्वाङ्ग-कल्पमेव कथं भयजनकं स्यात् । यदुत स्वात्मनो व्यतिरिक्तः पदार्थो भयहेतुर्भवेत्, कः पुनः सर्वतः परिपूर्णस्यावच्छिभूतो भिन्नो यमादिरस्ति, यस्माद् ज्ञान्यपहस्तित-तद्देहात्ममानित्वोऽपि बिभियात्—इति सर्वत्र निजरूपोपलब्धेः संसारस्थितोऽपि एकको विगलितस्वपरविभागतया निःशङ्कं विचरत्येव । यथोक्तं परमे-ष्ठिपादैः ।

'योऽविकल्पमिदमर्थमण्डलं
पश्यतीश निखिलं भवद्वपुः ।
स्वात्ममात्रपरिपूरिते जग-
त्यस्य नित्यसुखिनः कुतो भयम् ॥'
(उत्पलस्तोत्रावल्यां १३ स्तो० १६ श्लो०)

इति । ग्रन्थकारोऽपि

'एककोऽहमिति संसृतौ जन-
स्त्राससाहसरसेन खिद्यते ।

मवश्यं प्रभवति । यत्पुनः—अशरीरी भूत्वा **सर्वं ब्रह्मास्मि** इति संविद्रूपतया कृतं, तद्वासनाप्ररोहानासादनात्कथं व्यापिन्याः चितिशक्तेर्जन्मने स्यात् ?—इति तात्पर्यार्थः ॥ ६३ ॥

(६३) संकुचितकर्तृत्वसंस्कारविशिष्टो बद्धो जीवः, शरीरं, प्राणान्, बुद्धिञ्चात्मानं मन्यमानस्तज्जन्यसंस्कारैः स्वात्मानमावेष्टितं मन्यते, एवमसौ बद्धो जीवः स्वशरीरादिभिः क्रियमाणेषु कर्मसु मिथ्याभिमानवान् जायते । अहमेव कृतानां क्रियमणानां वा कर्मणां कर्ता, फलभोक्ता, फलभोगार्थमेकस्य शरीरस्य नाशेऽपरं शरीरं कर्मानुसारं धारयन् पुनः पुनर्जायते म्रियते च सः ।

एवमनात्मतया समुचितं कर्म संसरणाय प्रमातुः भवतीति चेत्तर्ह्यात्मस्वरूपं वक्तव्यं येन संसारी न स्यादिति प्रतिपादितमपि शिष्यजनहृदयङ्गमीकर्तुं पुनः कथयति ।

यदि पुनरमलं बोधं
सर्वसमत्तीर्णबोद्धृकर्तृ मयम् ।
विततमनस्तमितोदित-
भारूपं सत्यसंकल्पम् ॥ ६४ ॥

दिक्कालकलनविकलं
ध्रुवमव्ययमीश्वरं सुपरिपूर्णम् ।
बहुतरशक्तिव्रात-
प्रलयोदयविरचनैककर्तारम् ॥ ६५ ॥

सृष्टयादिविधिसुवेधस-
मात्मानं शिवमयं विबुद्धयेत ।

कथमिव संसारी स्याद्
वितततस्य कुतः क्व वा सरणम् ॥ ६६ ॥

यदि पुनः परशक्तिपातविद्धहृदयः प्रमाता देहादिप्रमातृताभिनाम् अवस्पदीकृत्य **शिवमयं विबुद्धयेत** चिदानन्दैकघनं विजानीयात्, सुपरिज्ञातस्वात्ममहेश्वरभावः **कथमिव** केन प्रकारेण **संसारी** ससरणशीलो भवेत् ? न स्यादिति यावत्, यतश्चिदचिद्रूपपुर्यष्टकात्मा कार्ममलसम्बन्धेन संसरति, यः पुनश्चिदेकमूर्तिः शिवमयः प्रक्षीणाणवादिमलकञ्चुकः स कथं संसारीति तात्पर्यम् । ननु चिदेकमूर्तिः स्यात्संसारी च भवेदिति किं दुष्येत् ? इत्येवमाशङ्क्याह **वितत** इत्यादि । **वितततस्य** अनवच्छिन्नदेशकालाकारस्य प्रमातुः देहाद्यभिमानपूर्वस्वकृतवासनापरिक्षयात्पूर्णस्य तस्य **कुतः सरणम्** सर्वव्यापित्वात्तदतिरिक्तं किमपि यद्वस्त्वपेक्ष्य ततो विश्लिष्टोऽन्यत्र भिन्ने संसरणं गमनं कुर्यात् ? यतो देहादिप्रमातृताभिमानावच्छिन्नस्य किल अपादानाधिकरणादिकारकसम्भवः, यः पुनश्चिदेकघनो ब्रह्मभूतोऽनवच्छिन्नदेशकालः प्रमाता तस्य संसरणं वाचोयुक्तिरपि न भवेदिति । कीदृशं शिवरूपमात्मानं विबुद्धयेत ?— इत्याह **अमलं बोधम्** इत्यादि । अपगत आणवादिमलप्रचयो यस्य तम् । अत एव वैमल्यात् **बोधं** शुद्धचैतन्यम् । तथा **सर्वसमुत्तीर्णं** निरतिशयं ज्ञानक्रियास्वातन्त्र्यं प्रकृतं यस्य – इति तम्, **विततं** देशादिकृतविच्छेदाभावात् व्यापिनम् । तथा अविद्यमाने अस्तोदिते प्रलयोदयौ यस्याः **भासो** बोधदीप्तेः सैव **रूपं** देहो यस्य तम् । अन्यच्च **सत्याः** परमार्थाः **संकल्पाः** स्वेच्छाविहारा यस्य, यद्यदिच्छति तत्तथैव भवति इति तमेवंविधम् । तथा दिक्कालाकारकलनाभिः चर्चाभिर्विरहितं व्यापित्वनित्यत्वधर्मयोगात्, अत एव **ध्रुवं** कुटस्थम् **अव्ययम्** अविनाशिनम् । तथा **ईश्वरं** स्वतन्त्रम् । अन्यच्च तथा **सुपरिपूर्णं** सुष्ठु निराकाङ्क्षं । तदनु **बहुतराणि** प्रभूतानि शब्दराशिसमुत्थानि ब्राह्म्यादिशक्त्यधिष्ठितानि घटपटादिशक्तिव्रतानि तेषां लयोत्पत्तिविधौ स्वतन्त्रम् । अन्यच्च **सृष्ट्यादिविधिसुवेधसम्** सुप्रवीणं **वेधसं** विधातारमित्येवमादिविशेषणैः सर्वतः परिपूर्णं स्वात्ममहेश्वरं जानानो यत्किञ्चिदपि कुर्वाणो, दग्धकर्मबीजो न पुनः संसारभाक्, जीवन्नेव विमुक्तो भवेदिति यावत् । ६४ । ६५ । ६६ ।

विगलितसंस्काराणि देहात्ममानित्वाभावात् धर्माधर्माणि यस्य स एवं-विधः— इति अनेन **अज्ञानेन बन्धः** इति प्रतिपादितम् । तच्च विग्रहयोगेऽपि यस्य प्रक्षीणं स तदैव जीवन्नेव मुक्तो न पुनः शरीरयोगो बन्धः, तदपगमो मुक्तिः— इति, किंतु देहपातात् पूर्णो मोक्ष इति ।। ६१ ।।

(६१) आत्मसाक्षात्कारे सञ्जाते सति हृदयग्रन्थिः छिद्यते, कर्म-बन्धनं भिद्यते, सत्यासत्यविभागाश्च क्षीयन्ते – ज्ञानाग्नि-बलात्समस्तं सञ्चितं कर्मजातं भृष्टबीजातमिवाङ्कुरोत्पा-दनेऽसमर्थं जायते । सांसारिकजीवने वसन्नपि जीवो न बध्यते, अपितु मुक्त एव तिष्ठति ।

जीवन्मुक्तस्य कर्महेतौ शरीरे स्थितेऽपि शरीरयात्रामात्रार्थं ज्ञानेद्धं कुर्वाणस्य कर्म न फलाय तस्य भवति इत्यत्रोपपत्तिमाह –

अग्न्यभिदग्धं बीजं
यथा प्ररोहासमर्थतामेति ।
ज्ञानाग्निदग्धमेवं
कर्म न जन्मप्रदं भवति ।। ६२ ।।

वन्हिनिभृष्टं शालिबीजं क्षितिसलिलातपमध्यवर्त्यपि सामग्रीवैकल्या-द्यथाङ्कुरादिजनने अशक्ततां याति, तथैव **ज्ञानाग्निना दग्धं** परमाद्वयबोध-दीप्त्या प्लुष्टं **कर्म** यथा अहमेवेत्थं विश्वात्मना स्फुरामि इत्येवं रूपेण देहा-द्यात्ममानित्वहाने हेयोपादेयबुद्धिपरित्यागेन यत्किञ्चिच्छुभाशुभं कर्म क्रियमाणं, तद्दग्धवीर्यं न पुनः ज्ञानिनः पिण्डपातादनन्तरं जन्मफलप्रदं **भवति** देहनिर्माणहेतुः सम्पद्यते दग्धं बीजमिवाङ्कुरे । तस्मान्न सर्वाहंभावरूपायाः चितिशक्तेः अफलाभिसन्धानतया कृतं कर्म भूयो जन्म दातुं प्रभवतीति ।।६२।।

(६२) **यथा अग्निदग्धं बीजं अङ्कुरोत्पादने क्षीणशक्तित्वात् समर्थं न भवति तथैव ज्ञानाग्निपरिदग्धं कर्म जन्ममरणादिकं न सूते। आत्मसाक्षात्कारी जीवस्तावत्कालपर्यन्तं वर्तमानं शरीरं धारयते यावत्कालं प्रारब्धं कर्म भोगेन समाप्यते।**

एवं पुनर्विकस्वरापि चितिशक्तिः कथंकार देहवती स्यात्? इत्याह—

परिमितबुद्धित्वेन हि

कर्मोचितभाविदेहभावनया।

संकुचिता चितिरेतद्-

देहध्वंसे तथा भवति॥ ६३॥

यस्मात् **परिमितबुद्धित्वेन** अख्यातिजनितेन देहाद्यभिमानवासनापूर्वककामनाकालुष्यनिश्चयेन यत् कृत **कर्म** यथा **अहमश्वमेधेन यक्ष्ये** इहामुत्र च सुखी भूयासम्, मा कदाचन दुःख्यहं भूयासममुना कर्मणा वैन्द्रं पदं प्राप्नुयामित्येवं वासनाविशिष्टस्य कर्तुः—एवमनुगुणं कर्म, तस्य मनोवासनालब्धप्ररूढेः कर्मणः **उचित** तदनुगुणफलभोक्तृतायोग्यः असौ **भावी देहः** प्रारब्धकर्मफलभोक्तृशरीराधिकारपरिक्षयाद् यदुत्तरत्र भविष्यच्छरीरं, तस्य या **भावना** अमुनाश्वमेधादिकर्मणा साम्राज्याद्याप्नुयामित्यभिमतकर्मफलवासनाधिरूढिः, तया कर्मोचितभाविदेहभावनया—इयं सर्वतः पूर्णापि चितिशक्तिः—आणवमायीयमलमूलेन कार्ममलेनाघ्राता **संकुचिता** व्यापिन्यपि घटाकाशवत्कर्मानुगुणफलभोक्तृशरीरवासनावच्छेदवती सम्पन्ना सती **एतद्देहध्वंसे तथा भवति इति। एतस्य** प्रारब्धस्य कर्मफलस्य यो भोक्ता **देहः** तस्य भोगपरिक्षयाद् यो **ध्वंसो** मृतिस्तस्मिन् देहध्वंसे सति सा **चितिः** उद्भूतकर्मवासना **तथा भवति** येनाशयेन पूर्वकर्मफलमुपार्जितम्, तत्कर्मफलभोक्ता यो देहः—तद्वती सम्पद्यते, यद्वशाच्चितिरपि स्वर्गनरकादिभोगभाजनं स्यात्। तस्माच्छरीरी भूत्वा परिमितफललौल्याद् यत्कृतं कर्म तत् फलभोक्तृजन्म दातु-

मोक्षस्य पराहन्ताचमत्कारसारस्य कैवल्यस्य **धाम** व्यतिरिक्तं स्थानं न विद्यत एव, देशकालाकारावच्छेदाभावात्, अत एव **न चापि अन्यत्र** कुत्रचिद् व्यतिरिक्ते **गमनं** लयो मोक्षः, यथा भेदवादिनां मतेन उत्क्रान्त्या चक्राधारादि-भेदनाद् ऊर्ध्वं द्वादशान्ते लयः—एषैव मुक्तिः—इति यदुक्तम्

'व्यापिन्यां शिवसत्तायामुत्क्रान्त्या किं प्रयोजनम् ।
अव्यापिनि परे तत्त्वे ह्युत्क्रान्त्या किं प्रयोजनम् ॥' इति ।

एवंविधा अप्यन्ते तीर्थान्तरपरिकल्पिता बहवो मोक्षभेदाः सन्ति, ते प्रतन्यमाना ग्रन्थगौरवभयमानयन्तीति नेह प्रतन्यन्ते–इति सर्वत्र द्वैतमलस्य संभ-वादमोक्षे मोक्षलिप्सा मोक्षाभास एव । किं पुनः मोक्षलक्षणम् ?–इत्याह **अज्ञान** इत्यादि । **अज्ञानम्** अख्यातिजनितः आत्मन्यनात्माभिमानपूर्वोऽनात्मनि देहादावात्माभिमानलक्षणो मोहः स एव पूर्णस्वरूपसंकोचदायित्वाद् ग्रन्थिरिव **ग्रन्थिः** स्वस्वातन्त्र्यलक्षणस्य निजस्य व्यापित्वादेः देहाद्यभिमानतया बन्धः, तस्य **भित्** भेदन निजपूर्णस्वात्मस्वातन्त्र्यपरिशीलनदार्ढ्याद्देहाद्यभिमान-लक्षणस्य ग्रन्थेर्विदारणं, तेन हेतुना **स्वशक्तिभिः** स्वात्मस्वातन्त्र्यलक्षणैः **धर्मैः अभिव्यक्तता** स्वात्मशक्तिविकस्वरता, एष एव निरतिशयो **मोक्षः** इति । अयमाशयः—यथा सहजनित्यव्यापकत्वादिधर्मयुक्तमाकाशमपि घटादिभित्ति-बन्धसङ्कुचितम्, तत एव तदेवाव्यापकत्वादिधर्मयुक्तं घटाकाशमित्युच्यते आकाशाद्भिन्नमिव प्रथते, पुनरपि घटादिभित्तिकृतसंकोचभङ्गात्तदेव घटा-द्याकाशं तदैव व्यापकत्वादिधर्मयुक्त स्यात्, न पुनस्तस्य घटादिभङ्गान्नूतनः कश्चिद्धर्माविर्भाव आयातीति । तथैव देहाद्यभिमानकृतसंकोचसंकुचितं चैत-न्यं बद्धमिव-इत्युच्यते, तदेव पुनः स्वस्वरूपज्ञानाभिव्यक्तेः देहादिप्रमातृताबन्ध-संक्षयात् स्वशक्तिविवेकविकस्वरं मुक्तमिव इति अभिमानमात्रसारौ परिमित-प्रमात्रपेक्षया बन्धमोक्षौ, न पुनः परमार्थे संवित्तत्त्वे एवं किञ्चित्सम्भवतीति । तस्मान्मुक्तौ नूतनं न किञ्चित्साध्यते, निजमेव स्वरूपं प्रथते । एतदेव विष्णुधर्मेष्वप्युक्तम्

'यथोदपानकरणात्क्रियते न जलाम्बरम् ।

सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥
भिन्ने दृतौ यथा वायुर्नैवान्यः सह वायुना ।
क्षीणपुण्याघबन्धस्तु तथात्मा ब्रह्मणा सह ॥'

इति ॥ ६० ॥

(६०) **मुक्तस्य जीवस्यावस्थानाय पृथक् लोकान्तरं नास्ति, मुक्तो जीवः मर्त्यलोकमुत्क्रम्य न कमपि उच्चतरं लोकं भजते । वस्तुतोऽज्ञानमेव बन्धनमस्ति, यथार्थज्ञानञ्च मुक्तिः । आत्मसाक्षात्कारे जातमात्रे जीवो मुच्यते । स मर्त्ये लोके वसन्नपि, मानवशरीरं धारयन्नपि मुच्यते । एवमज्ञाने नष्टे ज्ञाने चाधिगते स्वस्वभावभूतायाः परमेश्वरतायाः प्रत्यभिज्ञैव मुक्तिः कथ्यते ।**

एवं प्रक्षीणज्ञानबन्धो ज्ञानी परानुग्रहार्थं शरीरमपि धारयन् मुक्तः— इत्यावेदयति—

भिन्नाज्ञानग्रन्थि-
गतसंदेहः पराकृतभ्रान्तिः ।
प्रक्षीणपुण्यपापो
विग्रहयोगेऽप्यासौ मुक्तः ॥ ६१ ॥

शरीरसम्बन्धेऽपि स्वात्मज्ञानविच्छरीराद्यभिमानाभावात् जीवन्नपि मुक्तो विकस्वरशक्तिर्भवेत् । ननु विग्रहयोग एव बन्धः, कथं तत्सम्बधेप्यसौ मुक्तः स्यात् ? इत्याह **भिन्न** इत्यादि । भिन्नो विदारितः अज्ञानरूपो ग्रन्थिः अपूर्णत्वख्यातिसमुत्थो देहाद्यभिमानरूपो बन्धो येन स एवं । तथा **गतसन्देहः** इति अत एव नष्टसंशयः । **पराकृता** न्यक्कृता परमाद्वयज्ञानलाभात् **भ्रान्तिः** द्वयरूपो भ्रमो येन स तथेति । एवं परिशीलनेन प्रक्षीणानि पुण्यापुण्यानि

एककोऽहमिति कोऽपरोऽस्ति मे

इत्थमस्मि गतभीर्व्यवस्थितः ॥'

इति । अन्यच्च **नैव च शोचति** इत्यादि । नापि आत्मज्ञः **शोचति** यथा धनदारादिकं मम नष्टं, रिक्तोऽस्मि, व्याधिनाक्रान्तोऽहं म्रिये वेत्यादि, यतो व्याख्यातेन क्रमेण **परमार्थे** तात्त्विके वस्तुनि चैतन्यरूपे अन्तर्मुखे प्रमातृमात्रे **नाशिता** क्षयधर्मित्वं न विद्यते । सर्वं हि अभिमानसारं कार्यत्वेन प्रतिभासमानमिदन्तावच्छिन्नमुपपद्यते क्षीयते च न पुनः संविन्मयस्यात्मनोऽहन्तासारस्याकृत्रिमस्य स्वतन्त्रस्य, कार्योन्मुखप्रयत्नानुपलब्धेः । न चैतावता स्वरूपविप्रलोपः स्यादिति विमृशतो योगिनो देहस्थस्यापि तद्धेतुकः शोकाद्याविर्भावः स्वरूपाच्छादकत्वेन न भवेदिति ॥ ५८ ॥

(५८) कृते आत्मसाक्षात्कारे जीवः सकलं जगदात्मरूपं कलयते । तथा चासौ स्वयं विश्वरूपः सन्नान्यस्माद्बिभेति, समस्तान् व्यापारान् व्यवहारांश्च स्वीयमेव लीलाविलासं मन्यते । रोगशोकनाशरहितश्चासावजरामरवद् भवति ।

नापि स्वात्ममहेश्वरस्वरूपपरिशीलनदार्ढ्यादस्य ज्ञानिनश्चेतस्यपूर्णत्वादिदोषः स्यात् — इति प्रतिपादयति

अतिगूढहृदयगञ्ज-

प्ररूढपरमार्थरत्नसंचयतः ।

अहमेवेति महेश्वर-

भावे का दुर्गतिः कस्य ॥ ५९ ॥

अतिगूढम् अतिशयेन गुप्तं **हृदयमेव गञ्जम्** सर्वपरमार्थस्वस्वरूपविश्रान्तिस्थानस्वभावं भाण्डागारं तत्र योऽतितीव्रतमसमाश्वासप्ररूढः **परमार्थः**

सद्गुरूपदिष्टः स्वात्मज्ञानसतत्त्वः स एव सर्वविभूतिहेतुत्वाद्रत्नसञ्चय इव **रत्नससञ्चयः** तेन हेतुना **अहमेवेति** सर्वमिदमस्मि—इति यः आविर्भूतः पूर्णः पराहन्ताविश्रान्तिलक्षणो **महेश्वरभावः** शरीरिणोऽपि स्वात्मप्रकाश-स्वातन्त्र्यं, तस्मिन् स्थिते सति **का** नाम वराकी **दुर्गतिः** दरिद्रभावः तदुप-लक्षितो वा कश्चित्कृत्रिमो विभूत्याद्यतिशयः स्यात् । आभाससारा हि सर्वे पदार्था यदैवाभासन्ते, तदैव योगिनः स्वात्मकल्पाः सन्तः कथमुत्कर्षापकर्षादौ प्रगल्भन्ते—इति न किञ्चिद्दौर्गत्यादिकं भवेत् । कस्य वा इति को वा अस्या दुर्गतेः समाश्रयः, देहाद्यात्माभिमानिनो ह्यस्या दुर्गतेः समाश्रया भवन्तु, यतस्ते व्यतिरिक्तस्यैषणीयस्य प्राप्त्या ईश्वराः, तदप्रहाराद्रिक्ताः—इति । यः पुनरकृत्रिमाहन्ताप्रत्यवमर्शपरमार्थो ज्ञानी **सर्वमस्मि** इत्यव्यतिरिक्तेनैषणी-येन महेश्वरः—स कथं व्यतिरिक्तप्राप्त्यप्राप्त्यभावाद् दौर्गत्यादेर्भाजनं स्यात् ? अत एव गञ्जशब्दस्य रत्नसञ्चयशब्दस्य ईश्वरशब्दस्य च हृदयप्ररूढपरमार्थो महान्—इत्यकृत्रिमार्थवाचकानि विशेषणान्युपपादितानि ॥ ५९ ॥

(५९) **आत्मसाक्षात्कारी जीवः परमार्थतया स्वात्मानं परिपूर्णं परमेश्वरं मन्यमानः सकलस्य विश्वस्य सृष्टिस्थिति-संहाररूपं स्वलीलाजन्यं जानाति, पारमार्थिकसत्यतत्त्व-सम्बद्धः दृढः विश्वास एव परमार्थरूपो रत्नसञ्चयः प्रोच्यते। रत्नसञ्चयस्तु कस्मिंश्चिन्निधाने सुरक्षितस्तिष्ठति । परमार्थ-रूपो रत्नसञ्चयः—आत्मसाक्षात्कारिणां जीवानां हृदय-रूपे गहने निधाने अस्ति । इत्थं विश्वरूपास्ते स्वात्म-महेश्वरे दृढं विश्वसन्तः रोगशोकादिदुर्गतिरहिताः भवन्ति ।**

इदानीं मोक्षस्वरूपमाह—

मोक्षस्य नैव किंचिद्
धामास्ति न चापि गमनमन्यत्र ।
अज्ञानग्रन्थिभिदा
स्वशक्त्यभिव्यक्तता मोक्षः ॥ ६० ॥

६४, ६५, ६६ आत्मसाक्षात्कारी सिद्धपुरुष: असीम: सर्वव्यापक-
श्च स: कुत: कुत्र कथं किमर्थं सरणं कुर्यात् ।
अपरिमितसंवित्स्वरूप: स स्वात्मानं समस्त-
विश्वसमुत्तीर्णमेकमात्रं स्वातन्त्र्येण सर्वज्ञशक्तिं,
सर्वंकर्तृत्वशीलञ्च, विशालमसीममपरिमितम्
अस्तोदयरहितं, देशकृत—कालकृत-सीमाविहीनम्
अचलम् अविकारं, परिणामरहितम्, अनश्वरं
पारमैश्वरसामर्थ्यशीलम्, बहुतरशक्तिविशिष्टं,
सृष्टिसंहारादिकरणे स्वतन्त्रं स्वात्ममहेश्वरं
मन्येत । अत: आत्मसाक्षात्कारी सिद्धपुरुषो
न पुनर्जायते, तथा सति स यावत्कालं प्रारब्ध-
वशाच्छरीरं धारयते तावज्जीवन्मुक्तदशाया-
मवतिष्ठते, शरीरावसाने विदेहमुक्तिरूपतामेकघन-
शिवतामधिगच्छति ।

एवं स्वात्मप्रत्यवमर्शोपपत्त्या ज्ञानिना विगलितकर्मफलाभिलाषेण कृतमपि कर्म न फलायेत्यावेदयन् स्वानुभवसिद्धं लोकदृष्टान्तमाह—

इति युक्तिभिरपि सिद्धं
यत्कर्म ज्ञानिनो न सफलं तत् ।
न ममेदमपि तु तस्ये-
ति दार्ढ्यतो नहि फलं लोके ॥ ६७ ॥

अहमेव चिद्घन: स्वतन्त्र: सर्वप्रमात्रन्तरतमत्वेन सर्वंकर्मकारी, नाहं वा कर्त्ता, पारमेश्वरी स्वातन्त्र्यशक्ति: —इत्थं करोतीति तमम शुद्धचैतन्यरूपस्य एतावता किमायातम् ? इति युक्तिभि: प्राक्प्रतिपादितस्वरूपाभि: उपपत्तिभि-र्व्याख्यातस्वात्मस्वरूपविद: प्रमातुर्भावा उभयथा देहाद्यहभावात् हेयोपादेयशून्य-त्वेन यत् सिद्धं कर्म निष्पन्नमपि कृतं न सफलं न तत्फलेन युज्यते, तस्य

आत्मज्ञानिन: प्रतिपादितवदुभयथा कृत्रिमत्वाभावात् कृतमपि कर्म कुत्र फलेन योगं कुर्यात् ? देहादिप्रमातृताभिमानस्वभावाश्रयाभावात् न कुत्रचिदिति यावत्। कृतस्य कर्मण: या प्रमातु: फलाभिमानरूढिरेष एवाश्रय:, ज्ञानिनस्त्वभिमानाभावात् स्वस्मिन् रूप एव प्रक्षीणं कर्म न फलेन संबध्यते— इति। नन्वभिमानादेव कर्म फलेन युज्यते—इति कुत्र यथा ? इत्याह **न ममेदमपि** इत्यादि। दृष्टञ्चैतत्, नापूर्वं, यथा **न ममेदं** यज्ञादिकं कर्म, **अपि तु तस्य** कस्याप्यर्थवतो यजमानस्य **इति** अनया बुद्धया कृतमपि यज्ञादिकं कर्म **लोके** मूल्यार्थितया फलाभिमानाभावान्न, यतस्तत्कर्म पारलौकिकेन फलेन युक्तं कल्पते। तथाहि—यजन्ति याजका: यजते यजमान:, इति न्यायेन यजतामृत्विजां यज्ञकर्म स्वयं कृतवतामपीदमश्वमेधादिकं यज्ञकर्म नास्माकं किञ्चित्, अपितु दीक्षितस्य पुण्यवत:, वयं किलेह यज्ञकर्मणि नियमितमूल्यमात्रार्थिनोऽत्र न केचनैव, यजमान: पुनरमुना कर्मणा स्वर्गादिफलभागपि, इति तेषां कर्म फलाभिमानाभावान्न स्वयं कृतमपि कर्म तदीयेन स्वर्गादिना फलेन युज्यते, यजमानस्तु तत्र यज्ञकर्म स्वयमकुर्वाण ऋत्विङ् निर्वर्त्यकर्ममुखप्रेक्ष्यपि **ममेदमश्वमेधादिकं यज्ञकर्म** मदीयेन धनेनामी ऋत्विज: कर्मणि प्रवृत्ता: इति ममैव स्वर्गादिफलं देहपातादवश्यंभावीत्यकुर्वाणस्यापि यथा समीहितकर्मफलाभिमानदाढर्यात्तस्य कर्म फलेन युज्यते। अत एव **कर्त्रभिप्राये क्रियाफले** इति दीक्षितात्कर्तु: **यजते यजमान:** इत्यात्मनेपदम्। कर्त्रनभिप्राये तु परस्मैपदं **यजन्ति याजका: इति**। इयान्महिमा दुर्लङ्घ्यो विकल्पस्वातन्त्र्यस्य—यत्स्वयं कृतमपि कर्म फलाभिमानाभावात् फलेन न युज्यते, अन्यै: कृतमपि कर्म **ममेदम्** इति अभिमानदाढर्यात् फलयुक्तं स्यात्, तस्मादृत्विग्व्यापारवत्क्रियमाणं योगिना कर्म फलाभिमानाभावान्न सफलं भवेदिति ॥ ६७ ॥

(६७) यथा कोऽपि यजमान: स्वहितलाभाय पुरोहितद्वारा किमपि यज्ञादिकं कर्म कारयति, पुरोहितश्च तत्कर्म यजमानस्य कल्याणकामनया करिष्यामि न ममेदमिति परस्मैपदप्रयोगेण दृढं प्रतिज्ञाय करोति, तस्य सकलं फलं च यजमानाय एव भवति, नतु पुरोहिताय; तथैव कृतात्मसाक्षात्कारो ज्ञानी

यद्यत् कर्म करोति नासौ तत्फलमाप्नोति, यतः स एवं विश्वसिति यदिदं कर्मजातं न मम, अपितु शिवस्यैवेति । इति तानि ज्ञानाग्निपरिदग्धानि कर्माणि फलदाने समर्थानि नैव भवन्ति । अतस्तत्कर्मजन्यं फलरूपं संसरणमपि तस्य न भवति ।

एवं सर्वकर्मसु हेयोपादेयकलङ्कपरित्यक्तबुद्धिः ज्ञानी दीप्तः स्यात्—इत्याह—

इत्थं सकलविकल्पान्

प्रतिबुद्धो भावनासमीरणतः ।

आत्मज्योतिषि दीप्ते

जुह्वज्ज्योतिर्मयो भवति ॥ ६८ ॥

इत्थं व्याख्यातेन प्रकारेण या **भावना** अहमेव चैतन्यमहेश्वरः सर्वात्मना सर्वदा एवं स्फुरामि—इति या आत्मनि विमर्शरूढिः, सैव शनैः प्रसरन्ती **समीरणो** वायुरिव तेन ज्ञानी **प्रतिबुद्धो** भस्मच्छन्नो वायुना प्रतिबोधितो वह्निर्यथा **सकलविकल्पान्** पशुरस्मि कर्मबन्धबद्धो देहरूपी मम इदं पुत्रदारादि, अमुना कर्मणा स्वर्गो निरयो वा भविष्यतीत्यादि सर्वाः कल्पनाः **अहमेवेदं सर्वम्**—इति परामर्शशेषीभूताः **आत्मज्योतिषि** चैतन्यकृशानौ **दीप्ते** पराहन्ताचमत्कारसारे **जुह्वन्** अविकल्पसंविद्रूपानुप्रवेशेन स **ज्योतिर्मयो भवति** दाह्यविकल्पेन्धन परिक्षयाद् दाहकाकारश्चिदग्निरेव संपद्यते, परप्रमात्रेकवपुरसाववशिष्यते इति यावत् ॥ ६८ ॥

(६८) **शैवदर्शनानुसारेण शैव्यां साधनायां ज्ञानयोगः भावनायोगोऽप्युच्यते । अस्यैवापरं प्रसिद्धं नाम शाक्तोपायः इति कथ्यते । निर्विकल्पकेनात्मदर्शनेन शुद्धस्य शिवभावस्य प्रकाशनं भवति नतु, सविकल्पकेन । इदमेव साक्षात्कारा-**

त्मकं ज्ञानम् अस्य भावनापि नाम शैवयोगेऽस्ति । तथा च यथार्थज्ञाने सुदृढे जाते सति साधकः प्रतिबुद्धयते । उक्तेन भावना समीरणेन प्रदीप्ते आत्मतत्त्वहोमाग्नौ जीवोचितान् सकलान् ज्ञानात्मकान् क्रियात्मकान् भेदप्रधानान् व्यापारांन् आत्मज्ञानाग्नौ होमयन् योगी । स्वयमपि शुद्धामात्मज्योतिःस्वरूपतामधिगच्छति । स्वीये शिभावे प्राप्तदृढनिश्चयः जीवन्मुक्तो भवति, तदनन्तरं च विदेहमुक्तिं लभते ।

एवं व्याख्यातेन प्रकारेण यः प्रकृष्टज्ञानयोगाभ्यासरतः स शेषवर्तनया कथं कालमतिवाहयतींत्याह—

अश्नन् यद्वा तद्वा
संवीतो येन केनचिच्छान्तः ।
यत्र क्वचन निवासी
विमुच्यते सर्वभूतात्मा ॥ ६९ ॥

यत् किञ्चित्पुरः पतितमदनयोग्यं पदार्थम् अश्नन् चमत्कुर्वन् न पुनर्नियमेन, इदं पवित्रमिदपवित्रम्, इदं कदन्नमिदं मिष्टान्नमिति हेयोपादेयकल्पनाविरहादयत्नेनापतितं यदपि तदपि समाहरन् । तथा संवीतो येन इत्यादि । कन्थया चर्मणा वल्कलेन वा तूलपटादिना, दिव्यात्मवस्त्रैर्वा समाच्छादितः—इत्युभयथोत्कर्षापकर्षाभावाच्छरीरीच्छादनार्थंक्रियार्थीभूत्वा नापि किञ्चिद्द्वेष्टि, नापि स्तौतीति । कथमेतत् ? यतः सः "शान्तः" सुखदुःखादिविकल्पनातिक्रान्तः—इति । तथा यत्रक्वचन निवासीति। यत्रक्वचन यादृशे तादृशे स्थाने स्वपरिश्रयमात्रार्थी, न पुनस्तस्य क्षेत्रायतनतीर्थादि पवित्रत्वात् स्वीकार्यं भवति । नापि श्मशानश्वपचसदनाद्यपवित्रत्वात्परिहार्यं स्यात् अयत्नेन यद्यत्स्थानमापतितं तत्तदधिवसति, पवित्रापवित्रकल्पनाकलङ्कविरहात् । विमुच्यते इत्येवमपि शेषवर्तनया परानुग्रहार्थप्रवृत्तः कालमतिवाहयन् विमुच्यते परमशिवीभवति । उक्तञ्च

'येन केनचिदाच्छन्नो येन केनचिदाशितः।
यत्र क्वचन शायी यस्तं देवा ब्राह्मणं विदुः ॥' इति

मोक्षधर्मेष्वपि

अनियतफलभक्ष्यभोज्यपेयं
विधिपरिणामविभक्तदेशकालम्।
हृदयसुखमसेवितं कदर्यै-
र्व्रतमिदमाजगरं शुचिश्चरामि ॥ इति

कथमेवमपि कुर्वन् ज्ञानी स्वयं मुच्येत ? इत्याह **सर्वभूतात्मा** इति। यतः स ज्ञानी सर्वभूतात्मा, सर्वेषां भूतानामात्मा, सर्वाणि च भूतानि तस्यात्मेति कृत्वा न किञ्चिद् बन्धकतया भवति, सर्वं विमुक्तयेऽस्य सपद्यते—इति ॥ ६९ ॥

(६९) आत्मसाक्षात्कारी योगी स्वेच्छया यत् किञ्चिदपि खादन् येन केनापि वस्त्रेण स्वीयं शरीरम् आवृतं कुर्वन् यत्र कुत्रापि निवसन् शान्ते भावे वर्तमानः सर्वभूतानि आत्मस्वरूपं मन्यमानः, जीवन्मुक्त एवावतिष्ठते।

नाप्येवंरूपस्य निरभिमानस्य यत्किञ्चित्कुर्वतोऽपि पुण्यपापसंभवः— इत्याह।

हयमेधशतसहस्रा-
ण्यपि कुरुते ब्रह्मघातलक्षाणि।
परमार्थविन्न पुण्यै-
र्न च पापैः स्पृश्यते विमलः ॥ ७० ॥

य एवं **परमार्थवित्** स्वात्ममहेश्वरस्वभावसतत्त्वज्ञः, सः – अश्वमेधराजसूयाप्तोर्यमादियज्ञान् नि.संख्यान् फलकामनाभिमानविरहात् **कर्तव्यतामात्रमिदम्** इत्येवं कृत्वा क्रीडार्थं यदि कदाचिद्विहितानि कर्माणि विदधाति, अथवा ब्रह्महनन-सुरापानस्तैन्यादीनि प्रमादोपनतानि महापातकान्यविहितान्यपि अशरीरतया चेत्युभयथा **अहं मम** इत्यभिमानाभावात् **परमेश्वरेच्छैवेत्थं विजृम्भते, मम किम यातमिति** बुद्धया न **पुण्यैः** शुभफलैर्नापि **पापैः** अशुभैः स ज्ञानी **स्पृश्यते** मलिनीक्रियते—इति । कथमेतत् ? इत्याह **विमलः** इति । यतस्तस्य विगताः प्रक्षीणा आणवमायीयकार्ममलाः संसरणहेतवः—इति । एवं मलिनस्य हि प्रमातुः विच्छिन्नदेहादिप्रमतृतया आत्मात्मीयाभिमानभावो येन **ममेदं कर्म शुभमिदमशुभमिति** अभिमानदौरात्म्यात् पुण्यपापसञ्चययोगः स्यात्, यस्य कर्मफलसञ्चयो ममत्वहेतुर्मलप्रचयो विगतः स्यात्तस्याभिमानाभावात्कथं पुण्यपापस्पर्शः । यथा श्रीभगवद्गीतासु—

यस्य नाहंकृतो भावो
बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान्
न हन्ति न निवध्यते ।।

इति ।। ७० ।।

(७०) **स्वात्ममहेश्वरस्वभावतां गतो निर्मलो ज्ञानी कर्त्तव्यमात्रं मन्यमानः यदि विहितानि – अश्वमेधशतसहस्राणि कर्माणि करोति, अथवा प्रमादजातानि ब्रह्महननसुरापानादीनि महापातकानि अविहितान्यपि कुरुते, तत्र परमेश्वरेच्छैवेत्थमिति, अहंममत्वाभिमानरहितः सः प्रक्षीणाणवमायीयकार्ममलो निरभिमानो न पुण्यैर्न च पापैर्लिप्यते ।**

एवंविधस्य ज्ञानिनो नियतचर्या परामृशन्नाह—

मदहर्षकोपमन्मथ-

विषादभयलोभमोहपरिवर्जी ।

निःस्तोत्रवषट्कारो

जड इव विचरेदवादमतिः ॥ ७१ ॥

मदो देहप्रमातृताभिमानः **हर्षः** अलब्धस्य लाभात्प्रमोदः, **कोपः** क्रोधः, **मन्मथः** सम्भोगाभिलाषः, **विषादः** इष्टवियोगान्मूढत्वम्, **भयं** शत्रोः सिंहव्याघ्रादेर्वा दरः, **लोभः** कार्पण्यम्, **मोहो** भूतेष्वात्मात्मीयभावः, इत्येतान् देहसंस्कारप्रत्यवमर्शान् मध्ये मध्ये समायातानपि **सर्वं ब्रह्मास्मि** इति परिवर्जयत्यविकल्पसंविद्रूपानुप्रवेशेन स्वात्मप्रत्यवमर्शशेषीभूतान् संपादयति। तथा निर्गतः **स्तोत्रवषट्कारेभ्यः** यः स, एव स्तुत्यस्य व्यतिरिक्तस्याभावान्न तस्य स्तोत्राद्युपयोगो, नापि वषडादिमन्त्रसंश्रयो, भिन्नस्य देवताविशेषस्य विरहात्, केवलं स **जड इव विचरेदवादमतिः**—इति । पूर्णत्वादाकाङ्क्षा-विरहाच्चोन्मत्त इव इतिकर्त्तव्यतारूपे शास्त्रीये कर्मणि प्रमाणोपपन्ने वा प्रमेय-सतत्त्वे प्रमातृभिः सह **इदमुपपन्नमिदं न** इति विचारबहिष्कृतबुद्धिः नापि स्वात्मन्युपदेशमपेक्षते, परानुपदेष्टुं वा प्रमेयमुपन्यस्यतीति दान्तप्रायो भूत्वा सर्वं ब्रह्म अवलोकयन् क्रीडार्थं विहरेदेव—इति जडत्वेन निरूपितः ॥ ७१ ॥

(७१) एवमात्मसाक्षात्कारकारी ज्ञानी, देहाभिमानरहितः, अलब्धलाभात्प्रसादहीनः, क्रोधशून्यः, कामवासनारहित, इष्टवियोगाददूनः, सिंहव्याघ्रादेर्निर्भयः, कार्पण्यविरहित, भूतेषु परिदृष्टस्व त्मभावः, स्तोत्रमन्त्रपाठपराङ्मुखः, देवताविशेषे भक्तिहीनः—आकांक्षाविरहात् जड इव, उन्मत्तः सन्निव सर्वं ब्रह्म अवलोकयन् विहरेत् ।

एवमपि परिवर्ज्यमानेनापि मदादिवर्गेण वयमिव ज्ञानी सति शरीरे किमिव न स्पृश्यते--इत्यत्र कारणमाह —

मदहर्षप्रभृतिरयं

वर्गः प्रभवति विभेदसंमोहात् ।

अद्वैतात्मविबोध-

स्तेन कथं स्पृश्यतां नाम ॥ ७२ ॥

समनन्तरकारिकाव्याख्यातो **मदादिवर्गोऽयं** **विभेदसंमोहात्** इत्यात्मीयरूपो यो **विभेदसंमोहः** अपूर्णत्वख्यातिः, ततः **प्रभवति** पशुप्रमातृभ्यो द्वैतभ्रान्त्या हेयोपादेयतया समुत्पद्यते । यः पुनः **सर्वं ब्रह्मास्मि** —इति परमाद्वयात्मबोधः प्रकृष्टज्ञानी आकाशकल्पः स **तेन** मदादिवर्गेण **कथं नाम स्पृश्यताम्** केन प्रकारेण आविलीक्रियतां, भिन्नं वस्तु भिन्नस्य हि कदाचित्स्वरूपमर्पयताम्, ब्रह्मभूतत्वेन गृहीतो मदादिवर्गो ब्रह्मभूतस्य ज्ञानिनः समानजातेः कथं विरोधाय स्यात् ?—इति ॥ ७२ ॥

(७२) सामान्यं वृद्धिकारणं भवति, विशेषस्तु पृथक्त्वकृद् भवति । परं मदहर्षादिरूपा देहसंस्कारप्रत्यवमर्शाः अपूर्णत्वख्याति-विशिष्टाः पशुप्रमातृभ्यो 'इदं त्याज्यं, इदञ्च ग्राह्यम्, इदं मम, इदं च न मम'' — इति द्वैतभ्रान्त्या जायन्ते । परं परमाद्वयात्मबोधवान् आकाशस्वरूपः प्रकृष्टज्ञानी ''सर्वं ब्रह्मास्मि'' इति विमृशन्मदादिवर्गेण नाविलीक्रियते । यतोहि भिन्नं वस्तु भिन्नं भेदेन योजयति परं ब्रह्म भूतत्वेन परिशीलितो मदादिवर्गः ज्ञानिनः समानत्वात् न विरोधाय कल्पते । अपितु ज्ञानिनो ब्रह्मरूपत्वं सामान्येन परिवर्धयत्येव ।

बाह्यस्तवनहवनवर्गोऽपि द्वैतसमाश्रय एव न तस्य परितोषायालमित्याह—

स्तुत्यं वा होतव्यं

नास्ति व्यतिरिक्तमस्य किंचन च ।

स्तोत्रादिना स तुष्येन्
मुक्तस्तन्निर्नमस्कृतिवषट्कः ॥ ७३ ॥

स्तुत्यं किञ्चिद्दे‌वतारूपं, होतव्यं वा – किञ्चिज्ज्ञानिनोऽद्वयबोध-रूपस्य न व्यतिरिक्तं भिन्नरूपं विद्यते, यत् स्तूयते हूयते वा— इति । नापि कर्त्तव्यं इत्येवंरूपतया च स्तोत्रादिना स आत्मज्ञः परितोषं याति, अभेदबोध-सम्भोगेन हि नित्यानन्दमयत्वात्क्रित्रिममानन्दं नाद्रियते. तस्मान्निर्गतो नमस्कृति-वषट्केभ्यो यः स एव मुक्तो वेदान्तेषु-एवं स्तुतः — इति ॥ ७३ ॥

(७३) परमाद्वयशिव स्वरूपस्य ज्ञानिनः कृते नैव स्तवनीयं किञ्चिद्दे‌वतारूपं, नैव हवनीयम्, नैव च कर्त्तव्यरूपमवशिष्यते । स्तोत्रादिना विरहितः स नित्यानन्दमयः कृत्रिमै स्तवन-हवनादिकर्मभिर्न तुष्टो भवति । अतो नमस्कृतिवषट्-केभ्यो रहित एव तिष्ठति ।

न च तस्य भिन्नेन देवगृहेण उपयोगः, स्वशरीरमेवात्मदेवताधिष्ठानं संविदाश्रयो वा नान्यः कश्चिदिति नो भिन्नं देवगृहमस्येत्याह —

षट्त्रिंशत्तत्त्वभृतं
विग्रहरचनागवाक्षपरिपूर्णम् ।
निजमन्यदथ शरीरं
घटादि वा तस्य देवगृहम् ॥ ७४ ॥

तस्य ज्ञानिनो निजः परकीयो वा देह एव देवतावेश्म, स्वात्मदेवतायाः भोग्याधारत्वात् बाह्यस्तु मेर्वादिप्रासादस्तदा देवगृहीभवति यदा गुरुणा शरीरव्याप्त्या षट्त्रिंशत्तत्त्वकलनरूपया परिकल्पितः स्यात्, तद्गतो बाह्योऽपि देवः स्वात्मव्याप्त्या चिद्घनत्वेन परिगृहीतश्चेत्तदा सोऽपि तत्र देवो भवेत्,

अन्यथा उभयमेतज्जडं शिलाशकलकल्पमेव कथं भक्तानुद्धरेत् मृतान् सामीप्यादि वा नयेत् ? इत्येवं मुख्यया वृत्त्या **शरीरं** संविदाश्रयत्वाद् देवगृहं तद्गतः सर्वेषामपि स्वात्मा देवः, इति देह एव संप्रबुद्धस्य देवगृहम् । कीदृशं तत् ? इत्याह — **षट्त्रिंशत्तत्त्वइति** । बाह्यं षट्त्रिंशत्तत्त्वव्याप्त्या परिकल्प्यते, परं देहदेवगृहं पुनः साक्षात् षट्त्रिंशता तत्त्वैः **भृतं** पोषितम् । बाह्यदेवगृहे गवाक्षरचना भवति इदंतु विग्रहरचनागवाक्षपरिपूर्णम्, इति **विग्रहे** शरीरे **रचना** इन्द्रियद्वारपरिपाटिः सैव तमोरिकल्पना तया **परिपूर्णम्** अक्षुण्णम् इति वाह्यदेवगृहसदृशम् न केबलं शरीरं संविद आश्रयः— इति कृत्वा देवगृहं, यावत् यत्किञ्चिद्वा संविदधिष्ठितं तत्सर्वं तस्य देवगृहं—इत्याह **घटादिवा** इति । घटाद्युपलक्षितं विषयपञ्चकमिदं भोग्यरूपं चक्षुरादिद्वारेण संविदाधिष्ठितम्—

'भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः।' (३ । २)

इति स्पन्दशास्त्रोपदेशदृशा संविन्मयमेव, ज्ञानिनो भूतशरीरवत् घटादि विश्वं भावशरीरमिति कृत्वा तदप्यभिन्नं स्वशीरवत् **देवगृहम्** देवस्य क्रीड़ावतः स्वतन्त्रस्य स्वात्ममहेश्वरस्य **गृहं** भोग्याधिष्ठानमिति ॥ ७४ ॥

(७४) **तस्य सुप्रबुद्धस्य स्वात्मज्ञानिनो निजं शरीरं परकीयं शरीरं घटपटादिकं स्वात्मदेवताया भोग्याधारत्वात् देवालयतुल्यं स्वतन्त्रस्य स्वात्ममहेश्वरस्य संवित्स्वरूपस्य, भोग्याधिष्ठानमस्ति । तच्छरीरम्—षट्त्रिंशत्तत्त्वपरिपोषितम् इन्द्रियद्वारादितमोरिकल्पनापरिपूर्णं वाह्यदेवगृहसदृशमस्ति । अर्थात् तस्य स्वशरीरमेवात्मदेवताधिष्ठानमस्ति, ततो भिन्नेन देवगृहेण न तस्य कार्यमस्ति ।**

बाह्यदेवगृहे किल भक्तः पुष्पाद्याहरणपूर्वं देवपूजापरो दृष्टः, देहदेवगृहे पुनः ज्ञानी किं कुर्वन्नधितिष्ठति ?—इत्याह—

तत्र च परमात्ममहा-

भैरवशिवदेवतां स्वशक्तियुताम् ।

आत्मामर्शनविमल-

द्रव्यैः परिपूजयन्नास्ते ॥ ७५ ॥

तस्मिन्स्वदेहदेवगृहे प्रकृष्टयोगी, **परमः** सर्वातिशायी यश्चैतन्य-लक्षणः **आत्मा** स एव निःशेषशब्दादिविषयोपभोगविलायनप्रगल्भत्वात् **भैरवः** भरण-रवणवमनस्वभावः, स एव **शिवदेवता** प्रकृष्टश्रेयोरूपो देवः, तां **परिपूजयन्नास्ते** अनवरतं वक्ष्यमाणेन क्रमेण तां तर्पयन् परिस्फुरेत् । ननु बाह्यदेवतापरिवारयुता भवति, एतां किं परिवार युतां समर्चयेदित्याह ? **स्वशक्तियुताम्** इति । **स्वाः** चैतन्यरश्मिरूपाश्चिन्निर्वृतीच्छाज्ञानक्रिया-शक्तीनां विभवात्मिका चक्षुरादिकरणशक्तयस्ताभिः **युताम्** समन्तादा-वृताम् । कैः परिपूजयन्नास्ते ? इत्याह **आत्मामर्शन** इत्यादि । **स्वात्मैवेदं सर्वम्** इति यद् **आमर्शनं** सर्वपदार्थानां सविद्रूपतया पूर्णाहन्ताविश्रान्तिल-क्षणो यः परामर्शः तेन द्वैतकालुष्यकलङ्कपरिक्षयात् **विमलानि** यानि शब्दादि-विषयपञ्चकरूपाणि पूजार्थं **द्रव्याणि** जाड्यापगमेन विशुद्धानि, तैःआत्मामर्शन-विमलद्रव्यैः—इति । अयमाशयः—ज्ञानी हेयोपादेयभेदकलङ्कपरित्यागेनायत्नो-पनतं शब्दादिविषयपञ्चकं श्रोत्रादिकरणदेवीभिः समाहृत्यान्तश्चमत्कुर्वन् स्वात्मनाभेदमापादयतीत्येवमनवरतं प्रतिविषयस्वीकारकाले योऽन्तरभेदेन चमत्कारः पूर्णाहन्तास्फुरणमेतदेव स्वात्मदेवतापूजनमतएव शब्दादयो विषयाः पूजोपकरणमित्यवधानवता विषयग्रहणकाले प्रतिक्षणं स्वात्मदेवता-पूजकेन भाव्यमिति रहस्यविदः । एतदेव स्तुतिद्वारेण राजानकरामो दध्रवान्-यथा—

'नित्योद्दामसमुद्यमाहृतजगद्भावोपहारार्पण-

व्यग्राभिस्तव तैजसीप्रभृतिभिर्यच्छक्तिभिस्तर्प्यते ।

तन्मांसास्रवसास्थिकूटकलिले काये श्मशानालये

रूपं दर्शये भैरवं भवनिशासंचारवीरस्य मे ॥'

इति ॥ ७५ ॥

(७५) बह्ये देवगृहे देवपूजकः पञ्चोपचारैः—षोडशोपचारैर्वा पूजापरो भवति, परं स्वदेहरूपे देवगृहे चैतन्यलक्षणो ज्ञानी—निःशेषशब्दादिविषयोपभोगविलायनप्रगल्भाम्, भरण-रवणवमनस्वभावां भैरवस्वरूपां शिवदेवतां प्रकृ-ष्टश्रेयःस्वरूपां निरन्तरं परिपूजयन् आस्ते । अर्थात् ज्ञानिनः—सततं प्रतिविषयस्वीकारकाले योऽन्तरभेदेन चमत्कारः पूर्णाहन्तास्फुरणमेतदेव तस्य स्वात्मदेवता-पूजनम् । शब्दादयो विषया पूजनोपकरणानि ।

पूजान्ते तावत् अग्निहवनेन भाव्यम्,—इति ज्ञानिनः कथं तत् ? इत्याह—

बहिरन्तरपरिकल्पन-

भेदमहाबीजनिचयमर्पयतः ।

तस्यातिदीप्तसंवि-

ज्ज्वलने यत्नाद्विना भवति होमः ॥ ७६ ॥

तस्य एवं-विधस्य स्वात्मदेवतापूजकस्य **अतिदीप्ते** पराहन्ताचमत्कार-भास्वरे चैतन्याग्नौ **यत्नाद्विना** तिलाज्येन्धनादिस्वीकारकदर्थनाया ऋते **होमो** वह्नितर्पणं सम्पद्यते । किं कुर्वतः ? इत्याह—**बहिरन्तर** इत्यादि । **बहिः** नीलादौ प्रमेये यत् स्वपरप्रमातृकल्पनमन्तर्ग्राह्ये सुखादौ च यत् सङ्कल्पन-मित्येवं रूपो यो **भेदः** बाह्याबाह्ययोः प्रमातृप्रमेययोर्निश्चियसंकल्पना-भिमानवृत्तिस्वभावं नानात्वमेतदेव **महाबीजं** प्रमातृप्रमेययोस्ततः समुत्पत्तेः, तस्य कल्पनारूपस्य भेदबीजभूतस्य **निचयो** भेदस्यानन्त्याद्राशिस्तम्—**अर्पयतः** परमाद्वयदृष्ट्याविकल्पकसंविद्रूपानुप्रवेशेन स्वात्मवह्नौ जुह्वतः—इति । अयमाशयः परब्रह्मात्मकस्य योगिनो देहादिप्रमातृताभिमानाभावात् यः स्वरससिद्धः स्वपरप्रमातृप्रमेयकलनपरिक्षयः स एवाकृत्रिमो होमः । यथाह भट्टश्रीवीरवामनकः—

'यत्रेन्धनं द्वैतवनं
मृत्युरेव महापशुः ।
अलौकिकेन यज्ञेन
तेन नित्यं यजामहे ॥ इति ॥ ७६ ॥

(७६) पूजावसाने अग्नौ होमः क्रियते—परमत्र ज्ञानिनः कथं भाव्यम् इति—स्वात्मदेवतापरिपूजकस्य ज्ञानिनः, पराहन्ताचमत्कार-भास्वरो ज्ञानाग्निरतिदीप्यते, अतस्तस्य तिलाज्येन्धनादि-सामाग्र्यादि विनैवाकृत्रिमज्ञानाग्नौ होमः सम्पद्यते । अन्तर्बाह्यात्मकः परिकल्पनस्वरूपो यो भेदः स एव तिल-तण्डुलयवादिराशिः, तस्य परब्रह्मरूपस्य योगिनः देहादि-प्रमातृताभिमानाभावाद् यः स्वपररूपभेदपरिक्षयः स एवास्याकृत्रिमो होमः ।

एवं रूपस्य याजकस्य ध्यानमाह—
ध्यानमनस्तमितं पुन-
रेष हि भगवान् विचित्ररूपाणि ।
सृजति तदेव ध्यानं
संकल्पालिखितसत्यरूपत्वम् ॥ ७७ ॥

नियताकारचिन्तितस्याकारस्यान्यत्र मनोवृत्तेर्गमनात्क्षयो ऽस्ति, इदं पुनरनस्तमितं ध्यानम् यस्मात् एष भगवान् अप्यनन्तः स्वात्मरूपो महेश्वरः क्रियाशक्तिस्वभावविकल्पस्वातन्त्र्येण यानि विचित्राणि रूपाणि सृजति अनवरतं नानापदार्थान् विकल्परूपानाकारान् बुद्धिदर्पणे समुल्लिखति तदेव अस्तोदयवर्जितं एतस्य ध्यानं चिन्तनं नातोऽन्यत् किञ्चित् । इतरत्र तु देवताविशेषे नानावक्त्राङ्गपरिकल्पनया नैयत्यं स्यात् । सर्वो मनोव्यापारः

पराशक्तिस्फारपल्लवभूत: — इति जानानस्यानवच्छिन्नमिदं सर्वं परमेश्वरीभूतम्। तथा सङ्कल्पेन मनसा आलिखितं संविद्भित्तौ चित्रीकृतं सत्यरूपत्वं परमार्थता यस्य ध्यानस्य तत्। एवं यतः सर्वमिदं प्रकाशमानं विकल्पोल्लिखितं मनोव्यापाररूपमपि प्रकाशानतिरिक्तं सत्यं, सर्वत्र संविदनुगमादिति। तदुक्तं श्रीमत्स्वच्छन्दशास्त्रे।

'यत्र यत्र मनो याति
तत्र तत्रैव धारयेत्।
चलित्वा कुत्र गन्तासि
सर्वं शिवमयं यतः ॥'

इति। तथा शैवोपनिषदि

'यत्र यत्र मनो याति
बाह्ये वाभ्यन्तरे प्रिये।
तत्र तत्र शिवावस्था
व्यापकत्वात् क्व यास्यति ॥'

इति। स्वरसोदितमेतद्योगिनो ध्यानमिति ॥ ७७ ॥

(७७) देहादिप्रमातृताभिमानाभाववत: परब्रह्मस्वरूपस्य याजकस्य चिंतनम्, सर्वदोदितम्, परमार्थस्वरूपविशिष्टम्, पारमेश्वर्यरूपम्, बुद्धिदर्पणे सततं मनसा बहुविधान् पदपदार्थस्वरूपान् आकारान् सृजन्नस्ति। अर्थात् योगिनः स्वरसोदितमेतत्सर्वं सर्वदा प्रकाशमानं विकल्पोल्लिखितं मनोव्यापाररूपमपि प्रकाशानतिरिक्तं, चिन्तनमस्ति।

जपश्चास्य कीदृशः स्यादित्याह—?

भुवनावलीं समस्तां

तत्त्वक्रमकल्पनामथाक्षगणम् ।

अन्तर्बोधे परिव-

र्तयति यत्सोऽस्य जप उदितः ॥ ७८ ॥

वक्ष्यमाणेन **क्रमेण** यो विश्वस्य प्रतिक्षणमभेदेन पराहन्ताप्रत्यवमर्शः **सोऽयमस्य जप उदितः** अकृत्रिमत्वेन कथितः । कोऽसौ—इत्याह **भुवनावलीं समस्तां** षट्त्रिंशत्तत्त्वसमूहान्तर्वर्तिनीं चत्वारिंशदुत्तरशतद्वयसंख्यातां प्राकार-पङ्क्तिनिःशेषाम् तथा **तत्त्वक्रमकल्पनाम्** इति **तत्त्वक्रमस्य** आत्मविद्या-शिवाख्यस्य **परिकल्पनाम्** परिच्छेदम्, **अथाक्षगणम्** इत्यन्तर्बहिष्करणरूप-मिन्द्रियसमूहञ्चेति **अन्तर्बोधे** मध्यमप्राणशक्त्यक्षसूत्रभूतायां स्वसंवित्तौ नादबिन्दुप्रवाहक्रमेण **यत्परिवर्तयति** अरघट्टघटीयन्त्रवत् प्रतिप्राणविक्षेप-सृष्टिस्थितिसंहारक्रमेण सर्वमेतत् स्वसंवित्तौ परिभ्रमयति; प्रतिक्षणं नादा-त्मना परामृशतीति यावत् । स एव पूर्णाहन्ताविश्रान्तिलक्षणोऽकृत्रिमोऽस्य जपः । अयमाशयः—जपःकिल वाच्यरूपाया देवताया वाचकस्य मन्त्रस्यो-च्चारः, स चाक्षमालया प्राणशक्तिव्याप्तिकयाक्षपरिवर्तनक्रमेण संख्येयः । परमाद्वययोगिनस्तु स्वा प्राणशक्तिस्तन्तुभूता मध्यमप्राणे प्रवाहक्रमेण नदन्ती स्वरसोदिता सर्वाक्षक्रोडीकारेण सहजैवाक्षमालोच्यते, यतः सर्वम् इदं वाच्यं षट्त्रिंशत्तत्त्वात्मकं विश्वं प्राणशक्तावेव प्रतिष्ठितं सत्प्रतिप्राणविक्षेपमुदय-व्ययक्रमेण परास्वभावा भगवती प्राणस्वरूपमाश्रित्य विमृशन्ती प्रतिप्राण-स्पन्दमवधानवतो योगिनो जपमकृत्रिमं साधयति । अत्र जपसंख्या—

एकविंशत्सहस्राणि

षट्शतानि दिवानिशम् ।

जपो देव्याः समुद्दिष्टः

सुलभो दुर्लभो जडैः ॥'

इति शैवोपनिषदि । शिवसूत्रेषु

'कथा जपः' (३ उ० २७ सू०)

इति । एवमेष वन्द्यचरणानामेव धानवतामेव गोचरः—इति ॥ ७८ ॥

(७८) **अस्य स्वात्ममहेश्वरस्य याजकस्य प्रतिक्षणं नैरन्तर्य्येण यः आणवोपायलभ्यः पराहन्ताप्रत्यवशों विश्रन्तिलक्षणः सोऽस्याकृत्रिमत्वेनालौकिको जपः कथितः ॥ अर्थात् स्वात्ममहेश्वरः स्वीये शुद्धे चित्प्रकाशे समग्रां षट्त्रिंशत्तत्त्वकल्पनामथवा-इन्द्रियसमूहम्, अथवा अष्टादशोत्तरशतसंख्याकम् भुवनवर्गं यद्भ्रामतति तदेवास्यालौकिको जपः कथितः ।**

इदं व्रतमस्येत्याह —

सर्वं समया दृष्टया
यत्पश्यति यच्च संविदं मनुते ।
विश्वश्मशाननिरतां
विग्रहखट्वाङ्गकल्पनाकलिताम् ॥ ७९ ॥
विश्वरसासवपूर्णं
निजकरगं वेद्यखण्डककपालम् ।
रसयति च यत्तदेतद्
व्रतमस्य सुदुर्लभं च सुलभं च ॥ ८० ॥

एवं **यत्** वक्ष्यमाणम् **एतदेवास्य** ज्ञानिनो **व्रतम्** स्वात्मदेवतासमाराधनाय नियमः । कीदृशं ? तदाह **सुदुर्लभञ्च सुलभञ्चेति** । सुष्ठु कृत्वा दुःखेनाख्यातिपरिक्षयादन्योपायपरिहाररूपेण परमेश्वरानुग्रहेण लभ्यते, —इत्यतः **सुदुर्लभम्** तथा सुखेन बाह्यास्थिभस्माद्याभरणाहारनियमादिस्वीकारकदर्थनां च विना लभ्यते, – इत्यतः **सुलभञ्च** । किं तद् व्रतम् ? इत्याह **सर्वमित्यादि** । यत्सर्वमिदं प्रातीतिकं भेदावभासरूपं युक्त्यागमानुभवपरिशीलनेनाभेददृशा **सर्वमिदमेकः स्फुरामि** इति समीक्षते । यथा श्री भगवद्गीतासु—

'सर्वभूतस्थमात्मानं
सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा
सर्वत्र समदर्शनः ॥' (६ | २९)

इत्यादि। एवमभेदबुद्धिदार्ढ्यमेव व्रतम् अन्यच्च **यत् विश्वश्मशाननिरतां संविदं मनुते** तदपि व्रतम्। यथा **विश्वं** ग्राह्यग्राहकस्वभावं घटदेहादिजडलक्षणपदार्थशवशतसमाक्रान्तमिति कृत्वा तदेव **श्मशानं** पितृवनं,— यतः संविदेका भगवत्यजडा, अतोन्यत्तदुल्लासितं सर्वमिदं शवस्थानीयं जडम्, अतो विश्वस्य श्मशानेन सादृश्यम्। तस्मिन् **विश्वश्मशाने** निःशेषेण **रतां संविदं** समुत्पत्तिनिधनतया महाभीषणे मध्यवर्तिनीं **मनुते** अवबुद्ध्यते। व्रती किल श्मशाने वसति, अयं पुनः अलौकिको व्रती **सर्वत्राहमेवैकचित्तस्वपरमार्थः** इति मत्वा जडैः पशुप्रमातृभिः घटादिभिः प्रमेयैश्च परेतस्थानीयैः सह उन्मत्तवत् क्रीडां कुर्वाणः संसारभुवमिमां सर्वप्रमातृप्रमेयनिधनतया भीषणां श्मशानस्वभावामध्यास्ते। अन्यच्च यद् **विग्रहखट्वाङ्गकल्पनाकलितां संविदं मनुते** इति **विग्रहः** शरीरं स एव **खट्वाङ्ग कल्पना** कङ्कालविधिः योगिनः किल स्वशरीरप्रमातृताभिमानदुर्ग्रहसंक्षयात् शरीरातीतं स्वात्मानं मन्यमानस्य संस्कारशेषीभूतो विग्रहः शवप्रायमेव—इत्यवधारयतः स्वशरीरमेव कङ्कालमुद्राकल्पना तया **कलितां** भोग्याधारत्वेन मुद्रिताम्, वीरव्रतिनो हि श्मशानस्थस्य खट्वाङ्गमुद्रया भाव्यम्, अतोऽस्य स्वसंविद्वपुषः स्वशरीरमपि वेद्यतया भिन्नमवधारयतः सैव खट्वाङ्गमुद्रा—इत्येतदप्यस्य व्रतम् तथा **वेद्यखण्डककपालं रसयति** चर्वयति, यच्च शब्दादिविषयपंचकलक्षणं सर्वभोग्यरूपमिदं **वेद्यं** ज्ञेयत्वकार्यत्वाभ्यां परिच्छिन्नम्, इति **खण्डकं** कर्परप्रायं तदेव **कपालं** शिरोऽस्थिशकलं **यद्रसयति** साराहरणक्रमेण पूर्णाहन्ताविश्रान्त्या चमत्कुरुते - इत्येतदपि व्रतम्। **व्रतिना किल** कपालस्थं वीरपानं रस्यते—इत्याह—**विश्वरस इति।** **विश्वस्मिन् वेद्य**-शब्दादिविषयपञ्चकरूपे कपालखण्डे योऽसौ सारभागश्चर्वणामृतमयोंऽशः स एव

परमानन्ददायित्वात् **रसासवः** उत्तमं पानं तेन **पूर्णं** निर्भरम । एतदुक्तं स्यात्—विश्वस्य यः शल्कस्थानीयः कठिनोंऽशः पात्रकल्पः स एव कपालं, तद्गतः सारभागश्चमत्कारक्षम आह्लाददायित्वात्पानमिति कपालं तु व्रतिनः करगतं भवातीत्याह—**निजकरगम्** इति । निजाः स्वात्मीयाः ये कराः चक्षुरादिकरणदेवीस्वभावाश्चिन्मरीचयस्तेषु भोग्यतया तत् वेद्यखण्डकं विषयत्वं गच्छतीति निजकरगम्, यथा पाणिस्थेन कपालेन पानं पीयते तथैव वेद्यखण्डककपालेन विश्वरसासवश्चक्षुरादिसंवित्करैः योगिना समाहृत्यास्वाद्यते । अयमाशयः योगी सर्वदैव यथोपनतं विषयपञ्चकं करणदेवीभिः—आहृत्य युक्त्या स्वचैतन्यभैरवविश्रान्तिमव्युच्छिन्नां भजमानश्चरमक्षणपर्य्यन्तं यथोपदिष्टमद्वयदृशा निर्वाहयति—इत्येतदेवास्य परिशीलितसद्गुरुचरणपङ्कजस्य व्रतमतोऽन्यच्छरीरशोषणमात्रमिति ॥ ७९, ८० ॥

(७९, ८०) स्वरूपसाक्षात्कारे शिवयोगिनः पाशुपतं व्रतं स्वतः सिद्धयति । कापालिकनाम्नि पाशुपते व्रते साधकः शुद्धयशुद्धयादिकं, भक्ष्याभक्ष्यादिकं, समस्तं विश्वमेकं चिद्रूपमात्रं परमशिवं समदृष्टया पश्यन् श्मशाने वसन्नपि कङ्काल मुद्रां बधानो नरकपालाऽस्थिमुद्रां परिवहन् सुरापो भवति, समस्तं जगच्छ्मशानरूपं मन्यमानः स्वात्मानं शुद्धं संविद्रूपं पश्यति । स स्वविग्रहं खट्वाङ्गरूपं मन्यमानस्तमेवाश्रयते । इत्थं तस्य वेद्यखण्डककपालं विश्वरसासवपरिपूर्णं सदैव रसयति ।

प्राक् प्रतिपादितं संकलयन्नस्योपदेशस्योत्कृष्टत्वमाह—

इति जन्मनाशहीनं
परमार्थमहेश्वराख्यमुपलभ्य ।
उपलब्धृताप्रकाशात्
कृतकृत्यस्तिष्ठति यथेष्टम् ॥ ८१ ॥

इति समनन्तरोक्तेन प्रकारेण यत् प्रतिपादितं रहस्यं **परमार्थमहेश्वराख्यम्** तात्त्विकं महेश्वरं **उपलभ्य** स्वात्मनि दृढप्रतिपत्त्या सम्यगनुभूय । कीदृक् ? आह—**जन्मनाशहीनमिति** । येनाधिगतेनोत्पत्तिमरणे न स्यातामिति यावत् । **कृतकृत्यस्तिष्ठति यथेष्टमिति** योगी—एतत्प्राप्य कर्त्तव्यतान्तरस्याभावान्निष्पन्नपरपुरुषार्थो **यथेष्टं** स्वेच्छातिक्रमं विना स्वातन्त्र्येण चक्रभ्रमवद् धृतशरीरः **तिष्ठति** कालमतिवाहयन्नास्ते । कथम् ? आह—**उपलब्धृताप्रकाशादिति** । एतद्रहस्यपरिशीलनेन सर्वासु दशास्वनुभवितृतया **प्रकाशः** परिस्फुरणं तस्मादिति, शरीरस्थोऽपि पूर्णानन्दमयः—इति यावत् ॥८१॥

(८१) **अनेन प्रकारेण जन्ममरणविहीनं परमार्थतत्त्व परिपूर्णं पारमार्थिकं रूपं पारमेश्वरं साक्षात्कृत्य शिवयोगी वास्तविकेन प्रमातृताप्रकाशेन कृतकृत्यः सन् स्वेच्छया यावज्जीवं संसारे प्रारब्धंकर्मानुभवन् यथेष्टं जीवनं यापयति ।**

इत्थं स्वात्मानं यः कश्चिज्जीवतां मध्यात् जानानः स सर्वस्तद्रूपः स्यात्—इत्यधिकारिनियमाभावमाह—

व्यापिनमभिहितमित्थं
सर्वात्मानं विधूतनानात्वम् ।
निरुपमपरमानन्दं
यो वेत्ति स तन्मयो भवति ॥ ८२ ॥

इत्थम् इत्युक्तेन प्रकारेण **व्यापिनम्** अनवच्छिन्नचिदानन्दैकघनं शिवम् **अभिहितम्** युक्त्यागमानुभवपरिशीलनक्रमेणावेदितम्, **यो वेत्ति** यः कश्चिदेव प्राणिप्रायो जानाति, **स:** सर्वः त्यक्तसङ्कोचः **तन्मयः** शिव एव स्यादिति । अत्र स्वात्मज्ञाने नाधिकारिनियमः, यतो ये केचन जन्म मरणादिदोषाघ्राताः तिर्यञ्चोऽपि वा ते सर्वे स्वात्ममहेश्वरप्रत्यभिज्ञानात्तन्मया भवन्तीति यच्छब्दस्य परामर्शः । कीदृशञ्च ? **सर्वात्मानमिति** सर्वेषां प्रमातृ प्रमे-

याणामात्मा सर्वाणि वा प्रमातृप्रमेयाणि यस्यात्मा तं सर्वोत्तीर्णसर्वमयमिति यावत् अत एव **विधूतं** न्यक्कृतं सर्वदा सर्वत्र चिद्रूपतया स्फुरणात् **नानात्वम्** भेदानन्त्यं येन तमेवाकाङ्क्षा विरहात् **निरुपमो** विशेषण रहितः प्रकृष्टः **आनन्दो** यस्य तमेवंविधमिति स्वात्मानं जानानः सर्वः शिवरूपी स्यादिति ॥ ८२ ॥

(८२) अनेन पूर्वोक्तेन प्रकारेण सर्वेषामात्मस्वरूपं सर्वत्र व्यापकं भेदभावरहितं विशेषणरहितं परमानन्दं सर्वोत्तीर्णं स्वात्मानं जानन् साधकः शिवरूपतां याति ।

एवमधिगतस्वात्ममहेश्वरः स्वशरीराधिकारपरिक्षये कुत्र शरीरं परित्यजेत् किं वा यातीत्यादि संशयं परिहरति—

तीर्थे श्वपचगृहे वा

नष्टस्मृतिरपि परित्यजन्देहम् ।

ज्ञानसमकालमुक्तः

कैवल्यं याति हृतशोकः ॥ ८३ ॥

एवं परिशीलितस्वस्वरूपो ज्ञानी **सर्वमिदं स्वात्मप्रकाशस्वातन्त्र्यमिति** परमाद्वयदृशा गाढं समाश्वस्तहृदयः, **तीर्थे** प्रयागपुष्करकुरुक्षेत्रादौ महापुण्ये स्थाने, अथवा श्वपचसदनेऽनन्त्यजनगृहोपलक्षितेऽतिपापीयसि शरीरं मुञ्चन्नित्युभयथा स्वीकारपरित्यागकदर्थनाविरहितोऽप्यात्मज्ञानादेव **कैवल्यं याति** कलेवरपरिक्षयात्प्रधानादिकार्यकारणवर्गेभ्योऽन्यां चिदानन्दैकघनां तुर्यातीतरूपां केवलतां यातीति यावत् । यतोऽस्य सर्वमिदं विश्वं स्वात्मना पूर्णं समदृशा परमेश्वराधिष्ठितं पश्यतो न क्षेत्राक्षेत्रप्रविभागः, अत एव हृतः पराकृतो विकल्पशङ्कासमुत्थः **शोको** येन स एवं । यथोक्तं –

'हिमवति गङ्गाद्वारे

वाराणस्यां कुरौ प्रयागे वा ।

वेश्मनि चण्डालादेः

शितवस्त्वविदां समं मरणम् ।'

इति श्रीनिर्वाणयोगोत्तरे । नाप्यस्य देहपातावसरे स्मृत्युपयोगः—इत्याह—**नष्टस्मृतिरपि**—**इति** । आस्तां संस्मृतिः इत्यपिशब्दार्थः । यदि वा स ज्ञानी शरीरत्यागकाले तदुत्थवातपित्तश्लेष्माभिभवात् **नष्टस्मृतिः** काष्ठपाषाणतुल्यत्वात् विगतस्वात्मसंबोधः कलेवरमवशो भूत्वा त्यजति, तथापि प्रागधिगतस्वात्मज्ञानः कैवल्यमवश्यं याति, ततो न स्वात्मज्ञानाधिगमे प्रमयसमये स्मरणास्मरणे विशेषोऽस्ति । ननु तीर्थातीर्थप्रविभागोऽस्य स्वात्मज्ञानविदो मा भूत्, यत्पुनरन्तकाले स नष्टस्मृतिरपीति यदेव स्वात्मज्ञानमुपायतया गृहीतं, तस्य देहपातावसरे तु विस्मरण चेत्तर्हि कथं स मुक्तः स्यात् ? यदुक्तम्

'अन्तकालेऽपि मामेव

स्मरन्मुक्त्वा कलेवरम् ।

यः प्रयाति स मद्भावं

याति नास्त्यत्र संशयः ॥' (८ | ५)

इति श्रीगीतासु ।

एवमप्यत्र स्मरणस्यैवोपयोगः, यदपि परमेश्वरस्मरणाभावेऽप्यन्तकाले तद्भावापत्तिः स्यात्, तर्हि सर्वः पशुजनः प्रमयसमये मूढोऽपि विशेषाभावात्परमेश्वरसमापत्ति यायात्, वाक्यानि चैवमादीन्यप्रमाणानि स्युः, न चैवमित्यत्रोत्तरमाह **ज्ञानसमकालमुक्तः** इति । सत्यं नास्य स्मरणेनोपयोगः, किन्तु सद्गुरुणा यदैव तस्य कर्णमूले स्वात्ममहेश्वरज्ञानोपदेश कृतस्तस्मिन्नेव काले **अहमेव सर्वमिदं** इत्यधिरूढस्वात्मज्ञानपरमार्थो विगलितमायादिकञ्चुकभावो नान्यत्किञ्चिदपेक्षते, केवलं संस्कारशेषतया चक्रभ्रमवच्छरीरं वहमानः,—इति न पुनस्तस्योत्तरकाले स्मरणास्मरणकदर्थना यस्मादज्ञानजनिताणवमायीयकञ्चुकसम्बन्धे सति देहकञ्चुकं प्रभवति, स्वात्मज्ञानोपदेशेना-

ज्ञानजनितकञ्चुकक्षयात् कथं देहकञ्चुकं विनष्टप्रायं पर्यन्ते ज्ञानिनो यन्त्रणां कर्तुमलम् ?—इति स्वात्मज्ञानकथनावसर एव स जीवन्नेव मुक्तः स्यात् । यथोक्तं कुलरत्नमालिकायां साहस्रिकायाम्

'यदा गुरुवरः सम्यक्
कथयेत्तदसंशयम् ।
मुक्तस्तत्रैव कालेऽसौ
यन्त्रवत्केवलं वसेत् ॥'

इति । श्रीमन्निशाटनेऽपि –

'गोदोहमिषुपातं वा
नयनोन्मीलनात्मकम ।
सकृद्युक्तः परे तत्त्वे
स मुक्तो मोचयेत्परान् ॥
यस्मात्पूर्वं परे न्यस्तो
येनात्मा ब्रह्मणि क्षणम् ।
स्मरणं तु कथं तस्य
प्राणान्ते समुपस्थिते ॥' इति ।

अथवात्मविदः पर्यन्तक्षणः स्वानुभवैकसाक्षी केनानुभूयते, यद्वशात्तस्य स्मरणमस्मरणं वा परिकल्पेत, यावता तत्रार्वाग्दृशां नास्ति गोचरः— इति सर्वज्ञास्तत्र प्रष्टव्याः, न पुनः शरीरचेष्टामात्रान्मरणावसरेऽधिगतपरमार्थस्यापि देहत्यागक्षणः शुभाशुभत्वेनानुमातुं शक्यः । तस्मादवश्यमेव सदा तद्भावभावितं स्वात्मज्ञानविदं स्वात्मस्थ एव परमेश्वरो मरणावसरे स्वं स्वरूपं काष्ठपाषाणतुल्यमपि स्मारयति । यदुक्तम्

'स्वस्थचेष्टाश्च ये मर्त्याः

स्मरन्ति मम नारद ।

काष्ठपाषाणतुल्यांस्तान्-

अन्तकाले स्मराम्यहम् ॥'

तथा

'स्थिरे चेतसि सुस्वस्थे

शरीरे सति यो नरः ।

धातुसाम्ये स्थिते स्मर्ता

विश्वरूपं च मामकम् ॥

ततस्तु म्रियमाणं तं

काष्ठपाषाणसंनिभम् ।

अहं स्मरामि मद्भक्तं

नयामि परमां गतिम् ॥'

इति भगवता लक्ष्मीसंहितायामुक्तम् । एवमत्र सदा तद्भावभावितत्त्वमेव हेतुः, अन्यथा पूर्वानुभवसंस्कारदार्ढ्यं विना कथमन्ते स्मृतिरपि स्यात्, — इति न केनचिदपि ज्ञानिनो मरणावसरे समुपयोगः — इति ॥ ८३ ॥

(८३) साधकस्य वास्तविकायाः निजपारमेश्वरार्याः शक्त्याः अभिव्यक्तिरेव मोक्षोऽस्ति । असौ पवित्रे वाराणसीतीर्थे, श्वपचगृहे वा स्वं शरीरं त्यजन् स्वं स्वरूपं, स्वेष्टदेवतां वा मूर्च्छादिसमये स्मरेत् नवा स्मरेत् तथापि विदेहमुक्तिं प्राप्नोति अर्थात् सर्वबन्धनमुक्तः हतशोकः स ज्ञानसमकालमेव स्वस्वरूपस्य साक्षात्कारतया बन्धनमुक्तो भवति । तदेवोक्तं हि निर्वाणयोगोत्तरे हिमवति गंगाद्वारे वाराणस्यां कुरौ प्रयागे वा । वेश्मनि चाण्डालादेः शिवतत्त्वविदां समं मरणम् ।

यदि पुनस्तीर्थाद्याश्रयणमुक्तप्रकारेण न कुत्रचिदप्यङ्गभावं याति तर्हि किमिति विद्वद्भिस्तत्समाश्रीयते ? इति विषयविभागमाह

पुण्याय तोर्थसेवा

निरयाय श्वपचसदननिधनगतिः ।

पुण्यापुण्यकलङ्क-

स्पर्शाभावे तु किं तेन ।८४।'

येषां विदुषामपि देहादिप्रमातृताग्रहः साम्प्रतं न विगलित स्वात्मज्ञानचर्यायां च न तथा समाश्वासस्तेषामिष्टापूर्तादिधर्मसंग्रहं कुर्वतामधर्मसंग्रहं वा, प्रयागादितीर्थसेवा मरणावसरे क्षेत्रपरिग्रहः **पुण्याय** उत्तमलोक प्राप्तये निश्चितं स्यादेव । तथैव **श्वपचसदननिधनगतिः** इति । श्वपाकादिगृहोपलक्षिते पापीयसि स्थाने **निधनगतिः** प्रमयप्राप्तिः **निरयाय** अवीच्यादिनरकपातायैतेषां किमिति न भवेत् ? देहप्रमातृताग्रहस्य विद्यमानत्वात् । मरणस्थानानुगुणं भोगमपि भुक्त्वा शुभाशुभेषु देहेषु जायन्ते पुनर्म्रियन्ते च, इत्यनवरतजन्ममरणप्रबन्धा देहाद्यात्ममानिनो निःशेषेण विगलितः तस्य चिन्नभःस्वभावस्य धर्माधर्मस्वभाववासनास्पर्शप्रक्षये वृत्ते सति **किं तेन** ? एवं स यतः शुभाशुभकर्मभाजां तीर्थादि परिग्रहस्ततस्तेन तीर्थसेवादिना विमलस्य ज्ञानिनो नास्त्युपयोगः । यदुक्तं मानवे धर्मशास्त्रे

यमो वैवस्वतो राजा

यस्तवैष हृदि स्थितः ।

तेन चेदविवादस्त्वं

मा गङ्गां मा गयां गमः ॥

इति । अत्र देहात्ममानितैव हृदयवर्तिनी यमः, सा यैः पूर्णस्वात्ममहेश्वर स्वभावमुपलभ्य संभक्षिता, तेषां कथमेव तीर्थादिसेवाप्रयासः ?— इति सिद्धान्तः ॥ ८४ ॥

(८४) पूर्णस्वात्ममहेश्वरस्वभावमुपगतस्य ज्ञानिनः कृते पवित्र-तीर्थस्थानानां सेवनं न पुण्याय, नैव च चाण्डालगृहे मरणं पापाय भवति यतो ह्यसौ पुण्यपापरूपेण कलंकेन ताभ्यामुपचीयमानेन च कलंकपंकेन सर्वथा अस्पृष्टो भवति । तस्य कृते, उभयमपि कर्म नोपयुक्तं भवति । नैव च अनुयुक्तं भवति ।

ननु प्राक् प्रतिपादितं— यथा ज्ञानदग्धाणवमायीयकार्ममलस्वरूप आत्मा पिण्डपातात्स्वरूपस्थ एव न पुनर्भवप्ररोहं विधत्ते दग्धबीजमिवाङ्कुरमिति । स्वात्मज्ञानावि-र्भावसमकालं देहकञ्चुकभङ्गश्चेत्तर्हि—उत्तरत्र मा विधत्ताम्, यत् पुनर्विद्यमाने देहादिकञ्चुकबन्धे कथंकारं स तद्गतधर्माच्छुरितो न स्यात्, तदाच्छुरितः सन् मृतः कथं न संसारी ?—इति चोद्यमपवदति —

तुषकम्बुकसुपृथक्कृत-
तण्डुलकणतुषदलान्तरक्षेपः ।
तण्डुलकणस्य कुरुते
न पुनस्तद्रूपतादात्म्यम् ।। ८५ ।।
तद्वत्कञ्चुकपटली-
पृथक् कृता संविदत्र संस्कारात् ।
तिष्ठन्त्यपि मुक्तात्मा
तत्स्पर्शविवर्जिता भवति ।। ८६ ।।

तुषकम्बुकाभ्यां सुष्ठु पृथक्कृतो विश्लिष्टो यः तण्डुलकणः तस्य यः तुषदलान्तरक्षेपः प्रागिव पुनस्तत्रैव विन्यासः, स यथा तुषदलान्तरप्रक्षेपस्तण्डुलकणस्य तद्रूपतयाङ्कुरजननक्षमत्वेन स्थितोऽपि तादात्म्यम् गाढावष्टम्भं न कुरुते अयःशलाकावद्भिन्नावेव तुषतण्डुलौ तिष्ठतः, न पुनरेककार्य-

जननव्यग्रौ भवतः, तद्वत् तथैव ज्ञानिनः इयं संवित्, चेतना **कञ्चुकपटल्याः** आणवमलादिकञ्चुकसमूहात् **पृथक्कृता— "अहमेव स्वात्ममहेश्वर-स्वभावो विश्वात्मना सर्वदा सर्वत्र स्फुरामि"** इति स्वात्मज्ञानपरिशीलन-दाढर्यात् समुद्धृता **अत्र** इत्यस्यां कञ्चुकपटल्यां कंचित्कालं शेषवर्तनया देह-भावेन **निष्ठन्त्यपि** स्थिता सती · **विमुक्तात्मा** – प्रध्वस्तबन्धा **तत्स्पर्शवर्जिता भवति**, तस्याः देहादिकञ्चुकपटल्याः **स्पर्शः** पुण्यापुण्यरूपकार्ममलोप-जनितो य उपरागः संसाराङ्कुरजननक्षमः, तेन **विवर्जिता परिहृता सम्प-द्यते**, यथा तुषदलान्तरे क्षिप्तः तण्डुलोऽङ्कुरप्ररोहस्पर्शरहितो भवतीति : इदमुक्तं स्यात्— अज्ञानकारणकस्तावत् संसारः तत्र समुदितस्वात्मज्ञानदलित-कञ्चुकस्य योगिनः संविन्न पुनः संसारहेतुः, अज्ञानजनितसामग्रीवैकल्यान्नापि तस्य शेषवर्तनया संस्कारवशेन तिष्ठन्नयं देहकञ्चुकबन्धो ज्ञानाग्निदग्धाज्ञान-मूलः स्वगतधर्माविर्भाविन संसारप्ररोहं दातुमलमिति – ज्ञानी जीवन्नेव तुरीय-रूपो देहाभावात्तुर्यातीतरूपः— इत्युभयथा पुनर्न काचित्संसारशङ्का—इति ॥ ८५, ८६ ॥

(८५, ८६) **यथा तुषकम्बुकाभ्यां सम्यक् विश्लिष्टस्तण्डुलकणः पुनरपि भिन्नाभ्यां तुषकम्बुकाभ्यां संश्लिष्टः सन् न यथापूर्वं तद्रूपतामायाति नैव चोत्पादनशक्तिविशिष्टो भवति तथा — वस्तुतः शुद्धस्वतन्त्रसंविन्मात्ररूपः सर्वकञ्चुकविनिर्मुक्तः साधकः कालकलाद्यावरणै-र्मुक्तः आणवादिमलैर्हीनः सन् पूर्वसंस्कारप्रभावै-राविष्टोऽपि कञ्चुकैरावेष्टितो बन्धनैश्च बद्धो न भवति। प्रारब्धानां कर्मणां समाप्तिपर्यन्तं संस्कार-प्रभावैः कार्यं कुर्वन्नपि कर्मबन्धनैर्न बध्यते । असौ सपङ्के जले स्थितिमतोऽपि निर्मलस्य पङ्कजस्येव कञ्चुकैर्मलैश्च न बध्यते । शास्त्रीया तस्येयं विदेहा मुक्तिः । वस्तुतः—अज्ञानं बन्धनम् ज्ञानञ्च मुक्तिः, अत एकदा मुक्तः सर्वदा मुक्तोऽवतिष्ठते ।**

ननु शेषवर्तनया यावच्छरीरावस्थितं योगिसंवेदनमधिगतस्वस्वरूप-मपि देहोपाधिकृतमालिन्यस्यापि तावदंशेन विद्यमानत्वादशुद्धमेवेति दृष्टान्तेन परिहरति—

कुशलतमशिल्पिकल्पित-
विमलीभावः समुद्गकोपाधेः ।
मलिनोऽपि मणिरुपाधे-
र्विच्छेदे स्वच्छपरमार्थः ॥ ८७ ॥

एवं सद्गुरुशासन-
विमलस्थिति वेदनं तनूपाधेः ।
मुक्तमप्युपाध्यन्तर-
शून्यमिवाभाति शिवरूपम् ॥ ८८ ॥

यथा **मणिः** अतिप्रवीणवैकटिकसमुद्द्योतितनैर्मल्यः सन् समुद्गक-विश्लिष्टत्वात् **मलिनोऽपि धूसरप्रायो भवति**, स एव पुनः समुद्गकोपाधि-विच्छेदे आवरणविशेषाभावे **स्वच्छपरमार्थः** यथावन्निर्मलस्वरूपः संपद्यते । **एवमनेनैव** प्रकारेणेदं **वेदनं सद्गुरुशासनविमलस्थिति** परिपूर्णं स्वात्मज्ञानविद् यो दैशिकप्रवरस्तस्य **यच्छासनं** स्वात्मज्ञानरहस्यमुखाम्नायस्तस्य परिशीलनेन विगता कालिका रूपस्याणवमलस्य मामीयकार्ममलभित्तिभूतस्य स्थितिर्यस्य, तदेवविधं मौलिकमलप्रक्षयान्नभोरूपमपि वेदनं **तनूपाधेः** – **तनुः** शरीरं तल्लक्षणा **उपाधिः** विशेषणं ततो **मुक्तं** पृथक्कृतं विशेषणान्तराभा-वातत् **शिवरूपमाभात्येव** देहभङ्गात्परमशिवत्वेन भासये—इति यावत् । यथासमुद्गकोपाधिविरहान्मणिः स्वस्वरूपो भाति, तथैव स्वस्वरूपावबोधाद्विमलमपि—अशुद्धाभिमतशरीरोपाधिक्षयाद्विशुद्धमेव संवेदनं भासते । ननु मणिर्यथा समुद्गकोपाधेर्विमुक्तोऽपि पुनरन्यतमोपाधिपरिग्रहात्समलः संपद्यते, तथैव तनूपाधेर्मुक्तमपि संवेदनं मणिवदुपाध्यन्तरं चेद् गृह्णाति, तर्हि पुनरपि सोपाधित्वादशुद्धमेवेति परिहरति — **उपाध्यन्तरशून्यमपि** - **इति** । न दृष्टान्त-

दार्ष्टान्तिकयोः सर्वथा साम्यम्, यतः पिण्डपातात्तस्य महाप्रकाशवपुषः परमाद्वयरूपस्य सर्वमिदमुपाध्यभिमतं स्वाङ्गकल्पं भासते, अतो व्यतिरिक्तस्य उपाध्यन्तरस्याभावान्न पुनस्तदुपाध्यन्तरेण विशिष्यते—इति न मणिना उपाधिग्रहणस्य साम्यम्। अज्ञानमूलं किल शरीरोपाधिग्रहणं, तच्चेत्स्वात्मज्ञानकुठारेण दलितं कथंकारं पुनरुपाधिसंश्रयो भवेत्? यदुक्तम्

'अज्ञानेनावृतं ज्ञानं
तेन मुह्यन्ति जन्तवः॥
ज्ञानेन तु तदज्ञानं
येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं
प्रकाशयति तत्परम्॥' (३ | १६)

इति श्रीगीतासु। तस्मात्स्वस्वरूपज्ञानाद्योगिनः स्वसंवेदनं सदैव शुद्धमेवेति॥ ८७, ८८॥

(८७ ८८) यथा सुप्रवीणः स्वर्णकारः शाणोत्कषणेन रत्नं निर्मलं विधाय स्थगेन स्थगयति, तच्च रत्नस्याङ्गं परं तस्य निर्मलरूपस्थगने बाह्यो हेतुरुपाधिः कथ्यते। एवमेव यदा सद्गुरुः कस्य चित्साधकस्य संविदं दीक्षया निर्मलां विधत्ते, सा च संवित् शुद्धेनापरिमितेन शिवरूपेण संगता सत्यपि प्रारब्धकर्मसमाप्तिपर्यन्तं शरीररूपे स्थगे स्थगिता भवति, शरीरस्थगेन च तस्या निर्मलत्वमपि समलमिवाभाति। परं भिन्ने सति स्थगे तद्रत्नं यथापूर्वं पूर्णं चकास्ति, तथैव प्रारब्धकर्मणां भोगसमाप्तौ शरीररूपे स्थगे नष्टे सति योगिनः निर्मला संवित् परिपूर्णं चकास्ति नैव च मालिन्यं पुनस्तं स्प्रष्टुं प्रभवति। अत्र संविद्रत्नयोरयमस्ति महान् भेदो यद्

रत्नं एकस्मिन् स्थगे भिन्ने स्थगान्तरेण स्थगयितुं शक्यते। परं एकदा देहाद्युपाधिविरहिता संवित् नान्येन देहादिरूपेणावरणेनावृता भवतीति भावः। अर्थात् स्वस्वरूपज्ञानाद् योगिनः स्वसंवेदनं सदैव शुद्धमेव।

सर्वोपाध्युत्पत्तौ यथावत्परिशीलितव्यापारमनःसंस्कारप्ररूढिरेव निमित्तं, न पुनर्नूतनत्वेन किमप्यायातीत्यावेदयति—

शास्त्रादिप्रामाण्याद्

अविचलितश्रद्धयापि तन्मयताम्।

प्राप्तः स एव पूर्वं

स्वर्गं नरकं मनुयत्वम्॥ ८९॥

आगमप्रामाण्याद् गुरूपदेशपारम्पर्यकथानाद्युक्तिपरिशीलनात् प्राग्वासनाप्ररूढया श्रद्धया वा स्वात्मज्ञाने, इष्टापूर्ते पाशवे कर्मणि वा कृताभ्यासः प्रमाता तदैव तत्संस्कारप्ररोहेण **तन्मयताम्** तत्तदभ्यस्तवस्तु-स्वरूपतां **प्राप्तः** सन्नुत्तरत्र देहपाताद्वासनानुगुण्येम **स्वर्गं** निरतिशयां प्रीतिं **नरकं** अवीच्यादिदुःखं **मनुष्यत्वं** सुखदुःखोभयरूपं मनुष्यभावं प्राप्नोति न पुनरनभ्यस्तवासनस्यापि पुरुषस्य देहपातादेव यत्किञ्चिदापतति। यतः सर्वः प्रमाता येनाशयेन यदभ्यस्यति—तदैव स तद्रूपो भवति, किन्तु मरणसमये स्फुटतया यदभिलषितं वस्तु तत्प्रमातुरभिव्यक्तिं यातीति नाभ्यस्तवस्तुनः कदाचिद्विपर्ययः स्यात्, नाप्यनभ्यस्तवस्तुस्वरूपं किञ्चिदपूर्वत्वेनापतेत्—इति, सर्वत्र पूर्वाभ्यास एव कारणमिति भाव.॥ ८९॥

(८९) शास्त्रवचनप्रामाण्यात् गुरूणामुपदेशविशेषात्, स्वानुभवादिभिश्चेदं सिद्ध्यति यन्मानवे यादृश्यः वासना वर्धिष्यन्ते तदनुकूलामेव गतिमन्तकालेऽसौ प्राप्नोति। अतः

शास्त्रसामर्थ्याद् दृढया श्रद्धया विश्वासेन च तादात्म्यभाव-मापन्नो जीवः कदाचित्स्वर्गं कदाचिन्नरकं कदाचिच्च मानवत्वं प्राप्नोति । अत्रास्ति कारणं कर्मणाम् कर्मवासनानाम्, तदुत्थानां विश्वेषां महिम्नां च प्रभावः ।

एवं सदा तद्भावभावितत्वं स्वात्मविदो देहत्यागावसरे पूर्णप्रथाहेतुः । न पुनः लोकपरिदृश्यः पुण्यापुण्यरूपो मरणावसरः कश्चित् स्वर्गनिरयादि-कारणं परिकल्पनीयमित्याह—

अन्त्यः क्षणस्तु तस्मिन्

पुण्यां पापां च वा स्थितिं पुष्यन् ।

मूढानां सहकारी-

भावं गच्छति गतौ तु न स हेतुः ॥ ९० ॥

येऽपि तदात्मत्वेन विदुः

पशुपक्षिसरीसृपादयः स्वगतिम् ।

तेऽपि पुरातनसंबोध-

संस्कृतास्तां गतिं यान्ति ॥ ९१ ॥

एवं प्रतिपादिते ज्ञानिनि **अन्त्यः क्षणः** चरमो देहविनाशसहभावी कालो धातुदोषवशेन दुष्टव्याध्यनुभवाद्वा समीपस्थितैः प्रमातृभिरनुमितां **पुण्यां** पापमयीं **वा स्थितिं पुष्यन्** सेवमानः सन् **मूढानां** देहात्ममानिनां प्रमातॄणामेव **सहकारीभावम्** कारणत्वं **गच्छति** । गच्छतु वराकः, नैतावता निर्भग्न-देहात्ममानित्वे सदा स्वात्ममहेश्वरतानिभालनचतुरे **तस्मिन्** योगिनि **सः** अन्त्यः क्षणो **गतौ** देहाद् देहान्तरप्राप्तौ **हेतुः** कारणं भवेत् । कुतः—एतदागतम् ? इति निदर्शयन्नाह येऽपि इति । येऽपि केनाप्याशयवशेन शापादिना वा पापयोनयः पशुरूपतामपि प्राप्ताः **स्वगतिम्** आत्मस्थितिं मरणावसरे **आत्मत्वेन** जानीयुः,

ते मूढाः सन्तोऽपि प्रागभ्यस्तस्वात्मज्ञानवासनाप्रबोधानुगृहीताः स्वात्मस्थितिं च लभन्ते। गजेन्द्रमोक्षणादौ यथा हस्तिना पशुस्वभावेनापि सता प्राक्परिशीलितपरमेश्वरभक्तिसंस्कारप्रबुद्धेन विष्णुं भगवन्तं स्तुत्वा सम्यक् कञ्चुकं विहाय स्वस्वरूपमुपलब्धम्, कस्तत्र स्मरणे हेतुरभूत्। अयंभावः— शरीराद्युत्थधातुदोषववशात्काष्ठपाषाणचेष्टो ज्ञानी पुण्यं पापं—आलविडालादिकं वा यत् किञ्चित् प्रलपन् देहं त्यजति, नैतावता स्वस्थचेष्टतया यदभ्यस्तं ज्ञानादिकं तस्य विप्रलोपः स्यात्, शरीरादिगता धर्माः शरीरादावेव निपतन्ति, न पुनः सदा भावितं वस्तु स्थगयितुं प्रभवन्ति – इत्यामरणक्षणं सर्वत्र प्ररूढिरेव परमार्थः। यथा गीतासूक्तम्

'यं यं वापि स्मरन्भावं
त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय
सदा तद्भावभावितः॥' (८। ६)

तथा

'तेषां सततयुक्तानां
भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं
येन मामुपयान्ति ते॥' (१०। १०)

इति भावितान्तःकरणतैव पर्यन्तगतिदानहेतुः॥ ९०, ९१॥

(९०) ज्ञानिनो महामानवस्य ज्ञानसमकालमेव मुक्तिर्भवति, परं प्रारब्धकर्मणां फलभोगान् संपूर्णाननुभवितुं संसारे ऽवस्थितोऽप्यसौ तद्गतैर्बन्धनैर्न बद्धयते अतः शरीरत्यागे सति तस्य विदेहा मुक्तिर्जायते। परं मोहग्रस्तानां कृते प्राप्तव्यगतौ (वन्त्यः) अन्त्यः क्षणः हेतुर्न भवति। अतः पुण्यपापादयोऽग्रिमायां भविष्यन्त्यां गतौ हेतवो न भवन्ति।

(९१) परिपूर्णपरमेश्वरतामुपगताः जीवाः कदाचित् पशु-
पक्षिरूपां यस्यां कस्यां गतौ सन्तः, पूर्वजन्मप्रबल-
संस्कारैः प्राक्तनजन्मस्मृतिभाजः पूर्वजातिस्मराः
साम्प्रतमपि तत्तद्विज्ञानजानां संस्काराणां संस्मरणैः
समलङ्कृताः शिवभावगतिं मुक्तिरूपाम्, अधिगच्छन्ति ।
अर्थात् मुक्तिद्वारमुपागताः साधकाः प्रमादशापादि-
दोषैः पशुयोनिमुपागताः सन्तः पूर्वजातिस्मराः
भवन्त्येव । तत्तद्योनिष्वपि तेषां प्राक्तनं ज्ञानं परि-
पक्वं भवति, यस्य प्रभावेण ते शैवदर्शनस्य साधनानु-
सारं मुक्तौ अग्रसराः जायन्ते ।

एवं दर्शितदृष्ट्या यतः सदा तद्भावभावितत्वमपहस्त्य नूतनत्वेन शरीरविनाशे नापूर्वं किञ्चित्समापतेद्—ज्ञानिनः, यतो देह एव विनाशी केवलं स एव नश्यति, न पुनः वासनाप्ररोहः इति दर्शयन्नाह—

स्वर्गमयो निरयमय-
स्तदयं देहान्तरालगः पुरुषः ।
तद्भङ्गे स्वौचित्याद्
देहान्तरयोगमभ्येति ॥ ९२ ॥

एवं ज्ञानावसरे
स्वात्मा सकृदस्य यादृगवभातः ।
तादृश एव तदासौ
न देहपातेऽन्यथा भवति ॥ ९३ ॥

तत् तस्मात् शरीरघटादिनिविष्टः पुरुषः सर्वस्य कार्ममलाधि-वासितात्मा स्वर्गाद्यभिप्रायपूर्वकृतकर्मफलवासितान्तःकरणः—**स्वर्गमयः** प्ररूढ-स्वर्गफलवासनाविशिष्टत्वात्स्वर्गफलभोक्तेति यावत् । एवं दुष्कृतपूर्वकर्मवासना-

प्ररूढो नरकफलभोक्ता, केवलं देह उभयकर्मफलभोगायतनं तद्भङ्गे स्वौचित्यात् इति, तस्मिन् देहक्षये **स्वस्य** आत्मनो यथाहितवासनानुगुण्यादन्येन भोगायतनेन शरीरान्तरेण समनन्तरं सम्बन्धमुपयाति, उत्तरकालं येन विशिष्टकर्मवासनादत्तफलभोगभागी भवति। तथैव **ज्ञानावसरे** उपदेश्यस्य गुरूपदिष्टस्वात्मप्रकाशनकाले **स्वात्मा** चैतन्यं **सकृत्** एकवारं **यादृक्** यादृशः **अवभातः** उपदेशक्रमानुसारेण परिपूर्णस्वातन्त्र्यलक्षणां मितां वा परामर्शदशां गतः, **तादृश एव सदा असौ** येनैव स्वरूपेण ज्ञानिना स्वात्मा सर्वकाल परामृष्टस्ताद्रूप्येण वासनाप्ररोहात्तस्य प्रथते, **न** पुनः **देहपाते** प्रकाशितोऽपि स्वात्मा ज्ञानिनः **अन्यथा** समाच्छादितो **भवति** । नहि भातमभातं स्यात्, अपरथा न कश्चित् किञ्चिदभ्यसेदिति सर्वव्यवहारविप्रलोपो भवेत् ।

'धर्मेण गमनमूर्ध्वं
गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चापवर्गो
विपर्ययादिष्यते बन्धः ॥'

इत्यादि सर्वञ्च त्रुट्येत्, तस्मान्मरणकाले शरीरं यथा अस्तु तथा अस्तु, केवलं वासनाप्ररोहः स्वात्मगतः सर्वस्य बन्धे मोक्षे च हेतुरिति ॥ ९२, ९३ ॥

(९२) **अग्निष्टोमादियज्ञानामनुष्ठानैः स्वर्गादिवासनाधिवासिताः ज्ञानिनः अथवा ब्रह्महत्यादिपापैर्नरकादिवासनासंयुक्ताः, स्थूलशरीरमाश्रिताः सन्तः शरीरनाशे सति स्वस्ववासनारूपैः संस्कारैः नूतनेन शरीरसम्बन्धेन सम्बधाः भवन्ति ।**

(९३) **योगिनः कृते अनेन पूर्वोक्तेन प्रकारेण स्वस्वरूपस्य वास्तविकतासाक्षात्कारकाले यथैकवारं ज्ञानमुदयति तत्सर्वदा-तथैव सुदृढं व्यवस्थितञ्च भवति । तच्छरीरान्तेऽपि सा-**

स्वात्मस्वरूपप्रत्यभिज्ञा न परिवर्तते । अर्थात् योगिनः सकृज्जातं स्वरूपज्ञानं सदातनं जायते ।

यदि पुनर्धातुवैषम्याच्छरीरे मरणव्यथोपलब्धिः स्यात् नैतावता अभ्यास प्ररोहे काचित् क्षतिः—इत्यावेदितामेवस्थितिमुपलब्धुं परिघटयते—

करणगणसंप्रमोषः

स्मृतिनाशः श्वासकलिलताच्छेदः ।

मर्मसु रुजाविशेषाः

शरीरसंस्कारजो भोगः ॥ ९४ ॥

स कथं विग्रहयोगे

सति न भवेत्तन मोहयोगेऽपि ।

मरणावसरे ज्ञानी

न च्यवते स्वात्मपरमार्थात ॥ ९५ ॥

करणगणस्य बाह्यान्तर्गतस्य त्रयोदशात्मकस्य सम्यक् **प्रमोषः** स्वरूप-विप्रलोपः, यथा चक्षुरादीनीन्द्रियाणि रूपादिविषयालोचनायां न प्रगल्भन्ते, वागादिकर्मेन्द्रियाण्यप्येवं वचनादानादौ न प्रवर्तन्ते, नापि बुद्धिर्यथार्थमर्थमध्यवस्यति, मनसोऽनवस्थितिः, अहङ्कारोऽपि मध्ये मध्ये संस्कारतया आस्ते । तथा **स्मृतिनाशः** अनुभूतविषयस्य संप्रमोषः, बन्धुभिरर्थ्यमानोऽपि मुमूर्षुः पुरोऽवस्थितं वस्तु शतशोऽनुभूतमपि न प्रत्यभिजानाति, अत एव सदा तद्भावभावितत्वं विना ब्रह्मविद्यादिकथनमन्तकाले दानमन्यत्किञ्चिद्वा तस्यामवस्थायां नभश्चित्रमिव न चित्ते प्ररोहति, किंतु तदितिकर्तव्यतामात्रं कार्यमिति नियोगः । तथा **श्वासः** कण्ठ्यो वायुः, तस्य **कलिलता** कण्ठदेशे गद्गदिका हिक्का वा । अन्यच्च **मर्मसुच्छेदः** अस्थिसन्धिषु त्रोटः । **रुजाविशेषाः** ज्वरातिसारप्रभृतयः—इति । एवं यः **शरीरस्य** भूतकञ्चुकस्य वातपित्तश्लेष्मधातुवैषम्यात् **शरीरसंस्कारजो भोगः** देहजो दुःखानुभवः

स कथं केन प्रकारेण विग्रहयोगे सति ज्ञानिनोऽपि न भवेत् स्यादेव तेन हेतुना ज्ञानी सदा अधस्पदीकृतदेहाद्यभिमानः समाविष्टस्वात्ममहेश्वरभावश्च, मरणक्षणजनितशारीराज्ञानसम्बन्धेऽपि स्वात्मपरमार्थात् प्ररूढचैतन्यप्रत्यवमर्शसतत्त्वात् न च्यवते नान्यथाभाव याति । यतोऽसौ ज्ञानी न्यक्कृतदेहसम्बन्धो न तज्जेन भोगेन तन्मयीकर्तुं पार्यते, केवलं लोकवच्चेच्छरीरपातसमनन्तरं क्षणं नोपलभते—इत्येतावता तस्य स्वस्थहृदयस्य स्वसङ्कल्पिताभिप्रायेण स्वस्थचेष्टतया अभ्यस्तभगवद्भक्तेर्न किञ्चिदपूर्वं समापतति, तस्माद् ज्ञानी स्वात्मप्रथासमनन्तरमेव मुक्तः, न शरीरसंस्कारोऽस्य बन्धदायीति शतशः प्राक्प्रतिपादितम् । यस्तु सदा देहात्ममानी पुण्यपापमयः, स कथं देहसंस्कारोद्भूतसुखदुःखादिभोगजनित तन्मयत्वं नायाति । यदुक्तम् —

'यदा सत्त्वे प्रवृद्धे तु
प्रलयं याति देहभृत् ।
तदोत्तमविदां लोका-
नमलान्प्रतिपद्यते ॥' (१३ | १४)

इत्यादि । सत्त्वादयो गुणाः प्रकृतिधर्मास्तन्मयस्यैव नियन्त्रणां विदधते, येन पुनस्ततो विविक्ततया परिशीलिता न तं प्रति एते केचन इति ज्ञानिनोऽन्य एव पन्थाः । ये पुनरदृष्टगुरुचरणाः पशुप्रमातारस्ते स्वगतान्धर्मानन्यत्रापादयन्ति । यथा यद्ययं ज्ञानी स्यात्—किमिति व्याध्याद्युपहतशरीरो भुङ्क्ते, परिदधाति च ? यदि वा मरणसमये जाड्यमायातः, स्मृतमनेन न किञ्चिदित्येव बहुप्रकारमविद्योपहतत्वाद्विवदमानाश्च केन पर्यनुयुज्यन्ताम् । यद्ययं ज्ञानी स्याद्देहधर्मसंस्कारयुक्तश्च भवेत्, किमेतावता च तस्य दुष्येत् ? ज्ञानिनः स्वात्मप्रकाशस्तत्तदवस्थाविचित्रोऽपि स्वात्मप्रकाश एव, न पुनस्तस्य स्वात्मानुभवितृतया विप्रलोपः स्यात् । येन ज्ञानं नश्येत् । पूर्णषाड्गुण्यमहिमापि भगवान् वासुदेवः कृष्णावतारे व्याधशराघातजनितव्यथो भूतशरीरं त्यक्तवान्, इत्येवं कृत्वा किं तस्य जगत्प्रभोः स्वस्वरूपविप्रलोपोऽभूत् ? इत्याकीटात्सदाशिवान्तस्यापि देहसंस्कार एतादृश एव, किन्त्वेकः स्वात्मप्रत्यवमर्शमात्र-

सनाथदेहः, अपरस्तु देहाद्यात्ममानितासतत्त्वः—इतीयान् विशेषः । तस्माच्छरीरधर्माः ज्ञान्यज्ञानिनोः सदृशा एव, नैतावता फलसाम्यमित्येतदेव गीतासूक्तम् ।

'सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥'
(३ । ३३)

इति ॥ ९४, ९५ ॥

(९४, ९५) बाह्यकरणैरन्तः करणैर्मनोबुद्ध्यहङ्काररूपैस्त्रयोदशैर्यस्य कस्यापीन्द्रियस्य स्वकार्यासमर्थतायां कर्मेन्द्रियाणां ज्ञानेन्द्रियाणां वा क्रमशः समष्टिरूपेण वा वार्धक्ये जाते सति यद्वैकल्यं जायते तेन स्मरणशक्तेर्नाशः, श्वासप्रश्वासहिक्कायोगः, मर्मसु वेदना एते सर्वे विकाराः शरीरेण जायमानस्य स्वप्रारब्धशेषस्य भोगरूपाः सन्ति, अतः शरीरसम्बन्धे विद्यमाने सति ज्ञानिनः कृते स भोगः–अवश्यमेव भोक्तव्यो भवति । परं ज्ञानिनः तस्य शरीरस्य प्राक्तनसम्बन्धकारणात् शरीरेन्द्रियसम्बन्धविशिष्टे विद्यमानेऽपि स ज्ञानी पञ्चत्वकाले स्वपारमार्थिकात् ऐश्वर्यमयात् शुद्धादसीमात् स्वरूपात् अन्यथाभावं न गच्छति ।

इदानीमक्रमेण क्रमेण च ज्ञानयोगपरिशीलने विचित्रपरशक्तिपातमेव कारणं प्रतिपादयन् फलभेदमाह –

परमार्थमार्गमेनं
झटिति यदा गुरुमुखात् समभ्येति ।

अतितीव्रशक्तिपातात्

तदैव निर्विघ्नमेव शिवः ॥ ९६ ॥

यस्मिन्नेव काले जनः पश्चिमजन्मा **गुरुमुखात्** प्रवरदैशिकवक्त्रात् **एनम्** शतशः प्रतिपादितं **परमार्थमार्गम्** पूर्णस्वातन्त्र्यलक्षणं स्वात्मसंबोधमुखाम्नायरहस्यसरणिं यः कश्चिद् **अभ्येति** समभियाति, स **तदैव** तस्मिन्नेवावसरे गुरूपदेशसमनन्तरमेवानन्तरायं कृत्वा **शिव एव** स्यात् । श्रीकुले यथोक्तम्—

'हेलया क्रीडया वापि
आदराद्वाथ तत्त्ववित् ।
यस्य संपातयेद् दृष्टिं
स मुक्तस्तत्क्षणात्प्रिये ।'

इति । ननु कथमेवंविध मुखाम्नायरहस्यमेवोपनयेदित्याह— **अतितीव्रशक्तिपातादिति** । अतिशयेन **तीव्रः** कर्कशो योऽसौ अनुग्रहाख्यायाः पारमेश्वर्याः शक्तेः पातः पशुहृत्कमलावतरणं, येन पशुरपि गुर्वाम्नायवेदनाच्छिवीभवति, जीवन्नेव मुक्तः—इति यावत् । यथा ताम्रद्रव्यं सिद्धरसपातात् सुवर्णीभवति । अयमर्थः—परमेश्वरानुग्रहोपाय एव स्वात्मज्ञानलाभः— इति नात्र नियतिशक्तिसमुत्थं जपध्यानयज्ञादिकमुपायतया क्रमते । अनुग्रहशक्तिविद्धहृदयस्य तु हठादेवाक्रमं देवतामुखाम्नायरहस्यं हृदयमावर्जयति, येन झटित्येव परमेश्वरीभावं याति इत्यपर्यनुयोज्यो विचित्रः पारमेश्वरः शक्तिपातः—इति ॥ ९६ ॥

(९६) यदा कोऽपि साधकः परमेश्वरस्यातितीव्रशक्तिपातप्रभावात् पारमार्थिकमेनं शैवं मोक्षमार्गं गुरुकृपया प्राप्नोति तदैव बाधाविनिर्मुक्तोऽसौ सद्यः शिवरूपतां कलयति ।

यस्य पुनर्मध्यमन्दमन्दतरादिभेदेन प्रवृत्तः शक्तिपातः, तस्य गुरूपदे-

शमामरणक्षण यावद्योगक्रमेण विमृशत: पिण्डपातात् शिवत्वं स्यात् — इति प्रतिपादयति—

सर्वोत्तीर्णं रूपं
सोपानपदक्रमेण संश्रयत: ।
परतत्त्वरूढिलाभे
पर्यन्ते शिवमयीभाव: ॥ ९७ ॥

एवं किल शक्तिपातमन्दत्वात्पूर्णज्ञानोपदेशानासादनेन **सर्वोत्तीर्णं रूपं** सर्वतत्त्वपर्यन्तवर्तिस्वभावं **संश्रयत:** साक्षात्कुर्वत:, कथम् ? इत्याह **सोपान-पदक्रमेण इति** । कन्द-नाभि-हृत्कण्ठ लम्बिका-बिन्दु नादशक्तिरूपाणि **सोपानानि** ऊर्ध्वमाक्रमणाय तीर्थान्येव तेषां **पदम्** आसादनम् तत्र हाना-दानरूप: क्रम: शनै: शनै: कन्दे ततो नाभौ ततो हृदि - इत्येवमाक्रमणं तेन — इति । एवं यावत् परमार्थप्ररोहोपलब्धौ पिण्डपातावसरे योगिनस्तस्य क्रमेण शिवतास्वभावा स्थितिर्भवति । इत्येषा क्रममुक्ति: कथिता ॥ ९७ ॥

(९७) मध्यमवेगवन्त: साधका: पारमेश्वरशक्तिपातप्रभावादा-रोहणसोपानानां भूमिकाक्रमेण सर्वोन्नतं परमशिवभाव-मधिगच्छन्तो योगिनोऽपि परमशिवतत्त्वलाभे लब्धे सति परमशिवमयीभावतामेकतामुपयान्ति ।

एवमपि क्रमयोगमभ्यस्यतो योगिन: समाश्वस्तस्यापि सत: तथा-रूढिर्न स्यात्, अभीष्टप्राप्तावन्तरायो जायते, यदि परमनासादिततत्त्वस्य मरणं स्यात् तदा किं भवेय् ? इत्याशङ्कां परिहरति —

तस्य तु परमार्थमयीं
धारामगतस्य मध्यविश्रान्ते: ।

तत्पदलाभोत्सुक-

चेतसोऽपि मरणं कदाचित्स्यात् ॥ ९८ ॥

योगभ्रष्टः शास्त्रे

कथितोऽसौ चित्रभोगभुवनपतिः ।

विश्रान्तिस्थानवशाद्

भूत्वा जन्मान्तरे शिवीभवति ॥ ९९ ॥

एवमुल्लङ्घनक्रमेण योगमभ्यस्यतः केनाप्यन्तरायेण **मध्यविश्रान्तेः** कुत्रचिच्चक्राधारेप्यनुभवोपलब्धेस्तत्रैव परितोषं गतस्य, अत एव **परमार्थमयीं धारामगतस्य** परतत्त्वरूपां प्रतिज्ञातां दशां सर्वाध्वोत्तीर्णामप्राप्तवतो, यदि वा **तत्पदलाभोत्सुकचेतसोऽपि** प्रतिज्ञातपरमार्थसत्तासादनसाभिलाषस्यापि **कदाचित्** मध्ये विपत्तिः संभाव्यते, तदैतस्यालब्धलाभस्यापि पिण्डपातात्का गतिः ? —इत्याह **योगभ्रष्टः** इत्यादि । स **योगात्** समाधेरुभयथा **भ्रष्टः** चलितः **शास्त्रे** आगमग्रन्थे **कथितः** उक्तः । कीदृग्भवेत् ? इत्याह — **चित्र** इत्यादि । पिण्डपातादेव **चित्रभोगानि** नानाश्चर्यस्त्र्यन्नपानमाल्यवस्त्रानुलेपनगीतवाद्यादिप्रधानानि यानि **भुवनानि** स्वविश्रान्त्यनुगुणानि तत्त्वेश्वरस्थानानि, तेषु **पतिः** ईश्वरो भवति मरणसमनन्तरमेव दिव्यैर्भोगैर्युज्यते — इति यावत् । तद्भोगाधिकारपरिक्षये पुनरपि **स योगभ्रष्टः**, कथं स्याद् — इत्याह **विश्रान्ति** — इत्यादि । **विश्रान्तिस्थानस्य** कन्दादेः प्रदेशस्य **वशात्** तदभ्याससंस्कारप्रबोधसामर्थ्यात् स **जन्मान्तरे** द्वितीये जन्मनि **भूत्वा** संसारे अधिकारिशरीरं योगाभ्यासयोग्यं प्राप्य, पूर्वाभ्यस्तं योगमप्रयासेन स्वीकृत्य, हेलया परमार्थमयीं प्राग्जन्मप्रतिज्ञातां दशामधिरुह्य पिण्डपाताच्छिव एव भवति ॥ ९९ ॥

(९९) **अनुक्रमं योगाभ्यासं कुर्वतो योगिनः शिवभावत्वप्राप्तये औत्सुक्ये सति कदाचित् मध्यभूमिकायामेव विश्रान्तिकारणात् परमार्थरूपां शिवभावतां दशा-मप्राप्तस्यापि पञ्चत्वगतिः— भवितुमर्हति । असावपूर्णो योगी योगभ्रष्टः कथितः ।**

असौ विचित्राणां सुलभानां भुवनानामधिपतिर्जायते ।
कञ्चित्कालं तथा भूत्वायं कस्मिंश्चिदन्यजन्मनि
शक्तिपाताच्छिवभावमधिगच्छति ।

अथाभ्यस्यतोऽपि योगं योगिनो मनश्चाञ्चल्याद् विश्रान्तिमेकदेशेऽपि मनागप्यलभमानस्य, योगं प्रति श्रद्धावतश्च पिण्डपातात् का गतिः स्यात् ? इत्याह

परमार्थमार्गमेन
ह्यभ्यस्याप्राप्य योगमपि नाम ।
सुरलोकभोगभागी
मुदितमना मोदते सुचिरम् ॥ १०० ॥
विषयेषु सार्वभौमः
सर्वजनैः पूज्यते यथा राजा ।
भुवनेषु सर्वदेवै-
र्योगभ्रष्टस्तथा पूज्यः ॥ १०१ ॥

एनम् इति शतशः प्रतिपादितं स्वात्मज्ञानसतत्त्वं पन्थानम् **अभ्यस्य** श्रद्धाभक्तिभ्यां सेवित्वापि चित्तदोषानवस्थानेन यथावद्योगलक्षणां विश्रान्तिं जन्ममध्येऽप्यनधिगतः सन् मृतश्चेत्तदा स योगभ्रष्टो ज्ञानयोगविषयप्ररूढ-श्रद्धाभक्तिप्रसादसामर्थ्येन देवलोकभोगभागी, साह्लादचित्तः सुचिरं कालं हर्षं प्रयाति, सुरैरपि भुवनेषु निजनिजस्थानेषु पूज्यो भवति । क इव ?—इत्याह **सार्व** इत्यादि । **यथा सार्वभौमो राजा** सप्तद्वीपेश्वरो राजा चक्रवर्ती **विषयेषु** नानामण्डलेषु **सर्वजनैः पूज्यते** समभ्यर्च्यते **तथैव** अयं प्रक्षीणपुण्यापुण्य-विषयः समुत्पन्नवैराग्यः पश्चिमजन्मा वन्द्योऽस्माकं, यस्य स्वात्मनि जिज्ञासार्थं प्राग्जन्मनि-उद्यमोऽभूत् — इति सुरैरपि स्तूयते — इति यावत् ॥१००, १०१ ॥

(१००, १०१) अस्य परमाद्वैतरूपज्ञानमार्गस्य, शाम्भवादि-योगरूपस्य च अभ्यासं कृत्वापि योगफलं न लब्ध्वा साधकः

देवलोकप्राप्तव्यानां भोगानां भोक्ता भूत्वा प्रसन्नमनसा चिरकालं यावदानन्दमनुभवति । यथा चक्रवर्ती राजा स्वीयेषु समस्तप्रदेशेषु पूज्यते तथैव योगभ्रष्टोऽपि देवैः पूज्यो भवति ।

तस्य लोकान्तरभोगाधिकारनिवृत्तेः अनन्तरं किं स्यात् ? इत्याह

महता कालेन पुन-
मनुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यममृतं
यस्मादावर्तते न पुनः ॥ १०२ ॥

देवलोकेषु यथानिर्दिष्टेषु भोगान् भुक्त्वा, अतिदीर्घेण कालेन स योगभ्रष्टः संसारेऽस्मिन् मनुष्यभावमागत्य योगाभ्याससाधनयोग्यं शरीरमासाद्य प्राग्जन्मनि मनश्चाञ्चल्याद्यो योगो दुष्प्रापोऽभूत्तमेव योगं प्राग्जातभक्तिश्रद्धाप्ररूढयोगवासनासंस्कारप्रबोधमनायासेन प्राप्य समभ्यस्य च देहान्ते दिव्यममृतम् परतत्त्वस्वरूपमुपलभते, परस्वरूपतादाढर्यं गच्छतीति यावत् । अत एव तस्मात् पुनरावर्तनं तस्य न स्यादिति । एवं महति कल्याणे स्वात्मज्ञानविषये मनागपि प्रत्यवमर्शः संसारसरणाय न भवति । यदुक्तं श्री गीतासु—

'नेहातिक्रमनाशोऽस्ति
प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य
त्रायते महतो भयात् ॥' (२ | ४)

इति । तथा

'अयतिः श्रद्धयोपेतो
योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिम् ....॥' (६ | ३७)

इत्यादिप्रश्नादारभ्य

'अनेकजन्मसंसिद्ध-

स्ततो याति परां गतिम् ॥' (७ | ४५)

इत्युत्तरपर्यन्तो ग्रन्थो मुनिना प्रतिपादितोऽपि स्मर्त्तव्यः इति ॥ १०२ ॥

(१०२) **असौ क्रमयोगयुक्तः बहुकालं यावज्जाते सति पुनर्मानुष्यं लब्ध्वा योगाभ्यासं च कृत्वा उत्कृष्टतरां तादृशीं आध्यात्मिकीं स्थितिं लभते, यस्याः स्थितेः न पुनः मानुष्यं लभते। अर्थात् स सर्वथा मुक्तो भवति ।**

एवमनेन ज्ञानयोगक्रमेण जन्तोः मनागपि स्पृष्टस्य सत इयान् विभूत्यतिशयो यः प्रवक्तुं न पार्यते; तस्मात्सर्वात्मना विवेकार्द्रहृदयैः जननमरणनिवृत्तौ सावधानैर्भाव्यमिति निरूपयति—

तस्मात् सन्मार्गेऽस्मिन्

निरतो यः कश्चिदेति स शिवत्वम् ।

इति मत्वा परमार्थे

यथातथापि प्रयतनीयम् ॥ १०३ ॥

यतः एवं स्वात्मप्रत्यवमर्शाभ्यासः प्रतिपादितक्रमवशादुत्तमफललाभः, **तस्मात्** एतस्मिन्सुशोभने **मार्गे** प्रकृष्टमुक्तिप्रापके पथि **यः कश्चिन्निरतः** इत्यधिकारिनियमाभावः प्रदर्शितः । **यः कश्चित्** जनो जननमरणव्याध्यादिक्लेशशतपरिपीडितो **निरतो** विवेकबुद्ध्या निःशेषेण रतस्तत्रैव श्रद्दधानो भूत्वा निमग्नः **स** जन्तुरचिराल्लघुनैव कालेन **शिवत्वमेति** सकलसांसारिकक्लेशानवधूय परश्रेयोरूपदशामेकेनैव जन्मना प्राप्नोति । यथा शिवधर्मोत्तरे शास्त्रे—

'इहैकभविको मोक्ष

एष तावत्परीक्ष्यताम् ।

अनेकभविका मुक्ति-

र्भवतां केन वार्यते ।'

इति । इति मत्वा एवं विमृश्य तस्मिन् परमार्थे यथा तथा येन केनापि प्रकारेण प्रयतनीयम् प्रकर्षेण समुद्यमः कार्यः । प्रधाने यत्नः फलवान् इति कृत्वा अत्रार्थे मनागप्यवलेपो न विधेयः, येन योगाभ्यासेन स्वात्मप्ररूढि-श्चेत्समुत्पन्ना, सिद्धं नः समीहितम्, न चेद्दिव्यलोकान्तरप्राप्तिः । ततोऽपि प्रत्यावृत्तस्य प्राक्समभ्यस्तयोगवासनाप्रबोधबलेन पुनरपि योगसम्बन्धः, इति श्रेयोमार्गपरिशीलनान्न विरुद्धं किंचित् कर्तुः समापतति — इति परम-पुरुषार्थसाधनायां मनागप्यवलेपो न कार्यः — इति शिवम् ।। १०३ ।।

(१०३) अतोऽस्मिन् सर्वोत्कृष्टे योगमार्गे यः कोऽपि संलग्नो भवति स परिपूर्णपारमैश्वर्यं ज्ञानं शिवरूपत्वं लभते । अतः कल्या-णाभिनिवेशाय सर्वैः सर्वदा सर्वथा तीव्रैर्मध्यैर्मन्दैर्मन्दतरैर्वा प्रयासैरवश्यं प्रयतनीयम् ।

एवं शास्त्राकारः शेषभट्टारकोक्तं परमार्थसारोपदेशं शिवाद्वयशासन-क्रमेण युक्त्यनुभवागमसनाथं प्रतिपाद्य, स्वात्मनः परितोषमात्रार्थितया स्वाभिधानप्रदर्शनपूर्वकम्—"अयमेवोपदेशः परपुरुषार्थसाधनोपायः" इति निरूपयन् ग्रन्थार्थोपसंहारमाह

इदमभिनवगुप्तोदित-

संक्षेपं ध्यायतः परं ब्रह्म ।

अचिरादेव शिवत्वं

निजहृदयावेशमभ्येति ।। १०४ ।।

इदं प्रथमानं वितत्य प्रतिपादितं यत् **परं** प्रकृष्टं **ब्रह्म** बृंहकत्वात्परिपूर्णानन्दमयं स्वात्मस्वरूपं **ध्यायतः** अनायासेन स्वात्मनि प्रत्यवमृशतो जनस्य **अचिरात्** शीघ्रमेव, नतु पुनर्बहूनां जन्मनामन्ते—इति। तदेवंविधस्य ब्रह्मभूतस्य **शिवत्वमभ्येति** निःश्रेयसप्राप्तिः संभवति । कथं ? **निजहृदयावेशं** कृत्वा **निजं हृदयम्** परामर्शस्थानमाविश्य। कीदृशं तद्ब्रह्म ? कीर्तनीयनाम्ना **अभिनवगुप्तेन उदितः** प्रकाशितः **संक्षेपः** तात्पर्यं यत्र तदेवंविधम्। अत्र च नामव्याजेनेदमप्युक्तं स्यात्—यथा **अभिनवो योऽन्यैरदृष्टः परब्रह्मरहस्यातिशयो गुप्तश्च** अवच्छन्न इवाभूत्स एवंविध—**उदितः** प्रकाशितः **संक्षेपो** यत्र तदेवं विधं ब्रह्म—इति । एवमावेदयता दुर्लभता उपदेशस्य प्रतिपादिता स्यात् ॥ १०४ ॥

(१०४) **श्रीमहामाहेश्वराचार्यवर्यैरभिनवगुप्तपादैः संक्षेपेण वर्णितं-परमार्थसाररूपं ध्यान—चिन्तन—मनन—भावनादिभिः परिशीलनप्रवृत्तस्य साधकस्य हृदि एकस्मिन्नेव जन्मनि परिपूर्णः शिवभावः आवेशरूपेण समायाति । अर्थात् परमार्थसारस्य परिशीलनेन परमाद्वैतपरब्रह्मभावस्य भावनाया अभ्यासात् साधकः शीघ्रमेव शिवभावमाकलयति ।**

ग्रन्थपरिमाणं निरूपयन्नस्मिन् प्रकरणे कर्तृत्वमाह—

आर्याशतेन तदिदं

संक्षिप्तं शास्त्रसारमतिगूढम् ।

अभिनवगुप्तेन मया

शिवचरणस्मरणदीप्तेन ॥ १०५ ॥

इदं शास्त्रसारं बहूनां ग्रन्थानां यत् प्रकृष्टं सतत्त्वं तत् मया **संक्षिप्तं** ग्रन्थसहस्त्रैरप्युपपादयितुमशक्यम्, तदेव लघुना वृत्तशतपरिमाणेन स्वीकृत्योक्तम्—

इत्यनेन प्रतिभाकौशलमुक्तं भवेत् । कीदृशेन मया ? **शिवचरणस्मरणदीप्तेन** इति । **शिवस्य** परश्रेयः- स्वभावस्य स्वात्मस्थस्य चिदानन्दैकमूर्तेः यानि **चरणानि** चिद्रश्मयस्तेषां **स्मरणं** शब्दादिविषयग्रहणकाले निभालनं प्रतिक्षणं स्वानुभवाप्रमोषः, तेन **दीप्तः** पराहन्ताचमत्कारभास्वरः, अत एव कीर्तनीयाभिधानेन । अन्यथा कथं देहाद्यात्ममानिनोऽज्ञातस्वात्ममहेश्वरसतत्त्वस्य — इयति महार्थोपदेशेऽस्य कर्तृताधिकारित्वमुपपद्यते ? यतो यो यत्स्वभावः स तत्स्वभावं विवेक्तुं प्रगल्भते, इत्युपदेष्टुः समाविष्टमहेश्वरस्वभावोऽनेन वाक्येनोक्तः स्यादिति शिवम् ॥ १०५ ॥

(१०५) श्रीशिवचरणकृपाप्रसादाल्लब्धानां चिन्निर्वृतीच्छाज्ञानक्रियारूपाणां शक्तीनां प्रभावात् — अभिनवगुप्तनामधेयेन मया परमार्थसाररूपमतीवरहस्यात्मकं दुर्बोधं समस्तशास्त्राणां सारभूतं शैवशास्त्रमार्याच्छन्दोभिनिबद्धेन श्लोकशतकेन संक्षेपेण लिपिबद्धं कृतमस्ति ।

इति श्री महामाहेश्वराचार्याभिनवगुप्तविरचितः परमार्थसारः ॥

—:०:—

श्रीमतः क्षेमराजस्य
सद्गुर्वाम्नायशालिनः ।
साक्षात्कृतमहेशस्य
तस्यान्तेवासिना मया ॥ १ ॥
श्रीवितस्तापुरीधाम्ना
विरक्तेन तपस्विना ।
विवृतिर्योगनाम्नेयं
पूर्णाद्वयमयी कृता ॥ २ ॥

— :०:—

संपूर्णेयं परमार्थसारसंग्रहविवृतिः कृतिस्तत्रभवत्परममाहेश्वरश्रीराजानकयोगराजस्य ॥

समर्पणम्

काश्मीरशैवकोशस्य,
निदेष्ट्रा पाण्डितेन हि ।
बलजिन्नाथविदुषा,
दर्शितेन पथा मया ॥ १ ॥
श्रीपरमार्थसारस्य
सुगमा सारबोधिका ।
सुधांशोश्चन्द्रिकानाम्नी
या टीका निर्मिता नवा ॥ २ ॥
जम्मूप्रान्तस्थिते हीरा-
नगराख्ये च मण्डले ।
ग्रामे राजपुरे रम्ये
द्विजवंशे सढोत्तरे ॥ ३ ॥
गुरुवंशावतंसस्य
गङ्गारामस्य सूनवे ।
एतया शिवलीनाय
पित्रे वेदविदे मम ॥ ५ ॥
श्रीन्द्रदत्ताय भक्त्या स्यात्
पादयोः कुसुमाञ्जलिः ।
संस्कृताध्यापने यस्य
मदर्थे महती स्पृहा ॥ ५ ॥
तस्मै प्रणतयः पित्रे
द्वारिकानाथशास्त्रिणः ।
विद्वदाज्ञाविधेयस्य
स्वल्पज्ञस्यापि सादरम् ॥ ६ ॥

—:o:—

परमार्थसारस्य

कारिकानुक्रमणी

का.	का. सं.	पृ.
अग्न्यभिदग्धं बीजं	६२	८५
अज्ञानकालनिचितं	५५	७७
अज्ञानतिमिरयोगाद्	२५	४०
अतिगूढहृदयगञ्ज	५९	८१
अधुनैव किञ्चिदेव	१७	३२
अन्त्यः क्षणस्तु तस्मिन्	९०	११८
अश्नन् यद्वा तद्वा	६९	९२
अहमेव विश्वरूपः	४९	७०
आत्मज्ञो न कुतश्चन	५८	८०
आदर्शे मलरहिते	९	२२
आधारकारिकाभिः	३	११
आर्याशतेन तदिदं	१०५	१३२
इति जन्मनाशहीनं	८१	१०६
इति युक्तिभिरपि सिद्धं	६७	८९
इति शक्तिचक्रयन्त्रं	४७	६९
इत्थं तत्त्वसमूहे	५२	७४
इत्थं द्वैतविकल्पे	५१	७३
इत्थं विभ्रमयुगलक	४०	६१
इत्थं सकलविकल्पान्	६८	९१

का.	का. सं.	पृ.
इदमभिनवगुप्तोदित	१०४	१३१
इष्यत इति वेद्यत इति	४४	६६
एकस्मिन् घटगगने	३७	५७
एतत्तदन्धकारं	३०	४६
एतत् संसर्गवशात्	२२	३७
एवं ज्ञानावसरे	९३	१२०
एवं सद्गुरुशासन	८८	११५
एषां ग्राह्यो विषयः	२१	३७
कम्बुकमिव तण्डुलकण	१८	३४
करणगणसम्प्रमोषः	९४	१२२
कर्मफलं शुभमशुभम्	५३	७५
कुशलतमशिल्पिकल्पित	८७	११५
गच्छति गच्छति जल इव	७	१९
गर्भाधिवासपूर्वक	२	११
जलधरधूमरजोभिर्	३६	५६
जाग्रद्विश्वं भेदाद्	३५	५३
ज्ञानप्राप्तौ कृतमपि	५६	७८
तत्र च परमात्ममहा	७५	९९
तत्रान्तर्विश्वमिदं	५	१५
तद् ब्रह्म परं शुद्धं	४३	६४
तद्वत् कञ्चुकपटली	८६	११३
तद्वद्धर्माधर्म	२९	४५
तस्मात् सन्मार्गेऽस्मिन्	१०३	१३०
तस्य तु परमार्थमयीं	९८	१२६
तिमिरादपि तिमिरमिदं	३१	४७
तीर्थे श्वपचगृहे वा	८३	१०८
तुष इव तण्डुलकणिकां	२३	३८

का.	का. सा.	पृ.
तुषकम्बुकर्किशारुक	५७	७९
तुषकम्बुकसुपृथक्कृत	८५	११३
दर्पणबिम्बे यद्वन्	१२	२६
दिक्कालकलनविकलं	६५	८७
देहप्राणविमर्शन	३२	४८
द्रष्टा श्रोता घ्राता	५०	७०
ध्यानमनस्तमितं	७७	१०१
नानाविधवर्णानां	६	१७
निजशक्तिवैभवभराद्	४	१३
परं परस्थं गहनादनादिं	१	९
परमं यत् स्वातन्त्र्यं	१५	३०
परमार्थमार्गमेनं झटिति	९६	१२४
परमार्थभार्गमेनं ह्यभ्यस्याप्राप्य	१००	१२८
परमावरणं मल इह	२४	३९
परिमितबुद्धित्वेन	६३	८६
पुण्याय तीर्थसेवा	८४	११२
पुनरपि च पंचशक्ति	४६	६८
पृथ्वीप्रकृतिर्माया	४१	६२
बहिरन्तरपरिकल्पन	७६	१००
भारूपं परिपूर्णम्	१०	२४
भिन्नाज्ञानग्रन्थिः	६१	८४
भुवनावलीं समस्तां	७८	१०३
मदहर्षकोपमन्मथ	७१	९५
मदहर्षप्रभृतिरयं	७२	९६
मय्येव भाति विश्वं	४८	६९
महता कालेन पुनर्	१०२	१२९

का.	का. सा.	पृ.
मायापरिगृहवशात्	१६	३१
मोक्षस्य नैव किञ्चिद्	६०	८२
यदनात्मन्यपि	३९	५९
यदि पुनरमलं बोधं	६४	८७
येऽपि तदात्मत्वेन	९१	११८
योगभ्रष्टः शास्त्रे	९९	१२७
रज्ज्वां नास्ति भुजङ्गः	२८	४४
रशनाकुण्डलकटकं	४२	६३
रसफाणितशर्करिका	२६	४१
राहुरदृश्योऽपि यथा	८	२०
लोकव्यहारकृतां	५४	७६
विज्ञानान्तर्यामि	२७	४२
विमलतमपरमभैरव	१३	२६
विश्वरसासवपूर्णं	८०	१०४
विषयेषु सार्वभौमः	१०१	१२८
व्यापिनमभिहितमित्थं	८२	१०७
शक्तित्रिशूलपरिगम	४५	६७
शान्ते शान्त इवायं	३८	५८
शास्त्रादिप्रामाण्यात्	८९	११७
शिवशक्तिसदाशिवतां	१४	२९
श्रोत्रं त्वगक्षिरसना	२०	३६
षट्त्रिंशत्तत्त्वभृतं	७४	९७
स कथं विगृह्योगे	९५	१२२
सर्वविकल्पविहीनं	११	२४
सर्वं समया दृष्ट्या	७९	१०४
सर्वोत्तीर्णं रूपं	९७	१२६

का.	का. सा.	पृ.
सुखदुःखमोहमात्रं	१९	३५
सृष्टिस्थितिसंहाराः	३४	५१
सृष्टयादिविधिसुवेधसं	६६	८७
स्तुत्यं वा होतव्यं	७३	९६
स्वज्ञानविभवभासन	३३	५०
स्वर्गमयो निरयमयः	९२	१२०
हयमेधशतसहस्रा	७०	९३

परमार्थसारस्य

विषयानुक्रमणी

विषयाः	का.	पृ.
अज्ञाननाशप्रकारः	३३	५०—५१
अज्ञानस्वरूपम्	३०, ३१, ३२	४६—४९
अद्वैतभावनाप्रभावः	४१, ४२	६२—६४
अद्वैतसिद्धान्तः	२६	४१
अन्तःकरणानि	१९	३५
अन्तः सृष्टिः	४५	६७
अण्डचतुष्टयम्	४	१३—१४
अवस्थाचतुष्टयम्	३५	५३—५५
आत्मज्ञदृष्टिः	४७ तः ५०	६९—७२
आत्मस्वरूपसाक्षात्कारः	४७ तः ५०	६९—७२
आवरणत्रयम्	२४	३९
आवरणव्यपगमः	१८	३४
उपसंहारः	१०५	१३२—१३३
उपोद्घातः	१ तः ३	९—१२
कञ्चुकषट्कम्	१६, १७	३१—३३
कर्मणो निष्फलत्वम्	५५, ५६	७७—७८
	६२, ६७	८५—९०

विषयाः	का.	पृ.
कर्मनाशः	५५, ६२	७७, ८५
कर्मसंस्कारफलम्	६३	८६—८७
कापालिक-पाशुपतव्रतम्	७९,८०	१०४—१०६
कोशत्रयम्	२४	३९
क्रममोक्षः	९७	१२६
चित्स्वरूपस्यानावृतत्वम्	३४, ३६	५१—५२ ५६
जपः (परः)	७८	१०३
जीवन्मुक्तस्य व्यवहारः	६९ तः ८१	९२—१०७
जीवन्मुक्तिः	५९, ६१	८१—८२ ८४—८५
ज्ञानसंस्कारफलम्	६४ तः ६६	८७—८८
ज्ञानिनो दृष्टिः	४७ तः ५०	६९—७२
ज्ञानिनः मुक्तिरेव	८३ तः ९०	१०८—११९
ज्ञानिनः शरीरधर्माः	९४, ९५	१२२—१२४
ज्ञानिनः स्थितिः	५८, ५९	८०—८२
तन्मात्राणि	२१	३७
तिर्यंचामपि मोक्षः	९१	११८—११९
तुर्यप्रकाशोऽनावृत एव	३४	५१—५२
द्वैतावभासः	२५	४०
द्वैतावभासेऽप्येकत्वम्	२६	४१
निःस्तोत्रवषट्कारो	७१	९५
परतत्त्वस्वरूपम्	१०, ११, ३७	२४—२६ ५७—५८
परमार्थमार्गमाहात्म्यम्	१०३	१३०—१३१
परमेश्वरस्यैकरूपता	३८	५८—५९
परा पूजा	७५	९९
पशुतत्त्वम्	१६	३१—३२

विषयाः	का	पृ.
पुनर्जन्मसिद्धान्तः	६३	८६—८७
पुम्स्तत्त्वम्	१६	३१—३२
प्रकाशानुग्रहाभावे सर्वस्याभावः	४४	६६—६७
प्रकृतेः स्वरूपम्	१९	३५
प्रतिबिम्ववादः	१२, १३	२६—२८
प्रमातॄणामभेदः	२७	४२—४३
बन्धमोक्षचित्रा क्रीडा	३३	५०—५१
बहिस्सृष्टिप्रकारः	४६	६८—६९
ब्राह्यकरणानि	२१	३७
व्रह्मणि लयः	५१	७३—७४
ब्रह्मस्वरूपम्	४३	६४—६६
भूतपञ्चकम्	२२	३७—३८
भ्रान्तिदलनक्रमः	३९	५९—६०
भ्रान्तिद्वैविध्यम्	३९	५९—६०
भ्रान्तिसामर्थ्यम्	२८, २९	४४—४५
मङ्गलम्	१	९—११
मुक्तस्य स्थितिः	६०	८२—८४
मोक्षस्य लक्षणम्	६०	८२—८४
मोक्षस्य साधनम्	८२	१०७—१०८
योगभ्रष्टः	९८ तः १०२	१२६—१३०
योगभ्रष्टस्य गतिः	९९ तः १०२	१२७—१३०
योगिनः कृतकृत्यता	८१	१०६—१०७
वासनावशाद् देहान्ते गतिः	९२, ९३	१२०—१२१
व्यावहारिकी सत्ता	२७	४२—४३
शक्तिपातफलम्	९६	१२४—१२५
शक्तिस्वरूपम्	१५	३०—३१
शाक्तोपायस्तत्फलं च	६८ तः ७३	९१—९७

विषयाः	का.	पृ.
शाक्तोपाये आयतनम्	७४	९७—९८
शाक्तोपाये जपः	७८	१०३—१०४
शाक्तोपाये ध्यानम्	७७	१०१—१०२
शाक्तोपाये पाशुपतव्रतम्	७९, ८०	१०४—१०६
शाक्तोपाये पूजा	७५	९९—१००
शाक्तोपाये यागः	६८	९१
शाक्तोपाये होमः	७६	१००—१०१
शास्त्रस्य फलम्	१०४	१३१—१३२
शिव एव गृहीतपशुभावः	५	१५—१६
शिवस्य सर्वरूपता	१८	३४
शुद्धतत्त्वानि	१४	२९—३०
संसृतिः	५४	७६
संसृतेर्मुक्तिः	५७	७९
साक्षात्कारिणः स्थितिः	५२, ५३	७४—७६
सृष्टिः पारमेश्वरशक्तितः	४५, ४६	६७—६९
स्वस्वरूपप्रकाशनप्रकारः	३३	५०—५१
स्वातन्त्र्यसिद्धान्तः	१५	३०—३१
होमः परः	७६	१००—१०१

परमार्थसारटीकायां स्मृतानां

ग्रन्थकाराणामनुक्रमणी

अवधूतसिद्धपादाः २३
ग्रन्थकार (अभिनवगुप्तः) ८०
परमेष्ठिपादाः (उत्पलदेवः) ८०
भट्ट कल्लटः ६४
भट्टदिवाकरवत्सः ५४, ७४
भर्तृहरिः ६५
मुनिः (व्यासः) १३०
राजानकरामः (रामकण्ठः) ९९
शम्भुभट्टारकः (शम्भुनाथः) ४१

परमार्थसारटीकायां स्मृतानां

ग्रन्थानामनुक्रमणी

अजडप्रमातृसिद्धिः ५६
उत्पलस्तोत्रावली (शिवस्तोत्रावली) ८०
कक्ष्यास्तोत्रम् ७४
कालिकाक्रमः ६३
कुलरत्नमालिका ११०
गीताः १९, २२, ४१, ६१, ७७, ९४, १०५, १०९, ११६, ११९, १२४, १२९
तन्त्रसारः २८, ५०
त्रिशका (परात्रिंशका) ६६
निर्वाणयोगोत्तरम् १०९
निशाटनम् ११०
प्रमाणवार्तिकम् १८
मानवधर्मशास्त्रम् (मनुस्मृतिः) ११२
मार्कण्डेय पुराणम् ४७
मोक्षधर्मः ९३
लक्ष्मीसंहिता १११
विष्णुधर्मोत्तरम् ८३
शिवधर्मोत्तरम् १३०
शिवसूत्रम् ५२, ५३, १०४
शैवोपनिषद् (विज्ञानभैरवः) १०४
श्रीकुलम् १२५
श्वेमाश्वतरोपनिषद् ७१
सर्वमङ्गलाशास्त्रम् १३
स्पन्दशास्त्रम् १०, २५, ५५ (स्पन्दकारिका) ९८

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य प्रकाशनानि

क्रम सं०	प्रकाशनम्	सं०/लि०	मूल्यम्
१	काश्मीर शैव दर्शन	डा० बलजिन्नाथ पण्डित:	३०-००
२	विक्रमांकदेवचरितस्य साहित्यिकं सर्वेक्षणम्	डा० प्रियतमचन्द्र शास्त्री	३०-००
३	जैन जीवन दर्शन की पृष्ठभूमि	डा० दयानन्द भार्गव	२०-००
४	ऋचारहस्यम्	डा० दयानन्द भार्गव:	२०-००
५	ग्रहलाघवम् (पहला भाग)	डा० रामचन्द्र पाण्डेय:	१२-५०
६	न्याय-सार-विचार:	डा० उमारमण झा	२१-००
७	दश पदार्थी	डा० उमारमण झा	१३-५०
८	ग्रहलाघवम् (दूसरा भाग)	डा० रामचन्द्र पाण्डेय:	२०-८०
९	ज्योतिषरत्नमाला	श्री बिहारी लाल शास्त्री	३६-२५
१०	रघुनाथगुणोदय:	डा० गंगादत्त विनोद:	२७-१५
११	ललितास्तवरत्नम्	भगवद्दुर्वासस: (यन्त्रस्थम्)	